# न्यायदर्शनम्

## कक्षा ९

नेपालसर्वकार:
शिक्षाविज्ञानप्रविधिमन्त्रालय:
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

# न्यायदर्शनम्

कक्षा ९

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८२

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति। विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते। अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते। शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति ।शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम्। एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते। तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः। एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते। इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य न्यायदर्शनविषयकपाठ्यक्रमस्याधारेण नवम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते।

इदं पुस्तकं प्रा. पद्मप्रसादः भट्टराई, डा. रमा भट्टराई, उपप्रा. माधवः घिमिरे, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति। अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति।

अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः युवराजः पौडेल, प्रा.डा. माधवशरण उपाध्यायः, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, निश्चलः अधिकारी, शिवराजः लामिछाने, राजुः श्रेष्ठ-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य चित्राङ्कनं कुलदीपजङ्गबहादुर गुरुङ- इत्याख्येन महानुभावेन रूपसज्जा च भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः
**शिक्षाविज्ञानप्रविधिमन्त्रालयः**
पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | **न्यायवैशेषिकपारिभाषिकशब्दार्थपरिचयः** | |
| | (क) न्यायवैशेषिकदर्शनयोः संक्षिप्तः परिचयः | १ |
| | (ख) न्यायवैशेषिकपारिभाषिकशब्दार्थपरिचयः | ३ |
| द्वितीयः | **सविभागं वैशेषिकदर्शनाभिमतपदार्थोद्देशः** | |
| | (क) ग्रन्थपरिचयः | १४ |
| | (ख) मङ्गलश्लोकः | १५ |
| | (ग) पदार्थविभागः | १७ |
| | (घ) द्रव्यपदार्थविभागः | १७ |
| | (ङ) गुणपदार्थविभागः | १८ |
| | (च) कर्मपदार्थविभागः | १९ |
| | (छ) सामान्यपदार्थविभागः | २० |
| | (ज) विशेषपदार्थविभागः | २१ |
| | (झ) समवायपदार्थविभागः | २१ |
| | (ञ) अभावपदार्थविभागः | २२ |
| | (ट) सभेदं पृथिवीनिरूपणम् | २३ |
| | (ठ) सभेदमपां लक्षणनिरूपणम् | २५ |
| | (ड) सभेदं तेजोनिरूपणम् | २५ |
| | (ढ) सभेदं वायुनिरूपणम् | २६ |
| | (ण) आकाशनिरूपणम् | २७ |
| | (त) कालनिरूपणम् | २७ |
| | (थ) दिङ्निरूपणम् | २८ |
| | (द) सभेदमात्मनिरूपणम् | २९ |
| | (ध) सभेदं मनोनिरूपणम् | ३० |
| तृतीयः | **प्रत्यक्षप्रमान्तगुणानां बोधः** | |
| | (क) गुणपदार्थनिरूपणम् | ३५ |
| | (ख) कारणनिरूपणम् | ४८ |
| | (ग) प्रत्यक्षप्रमानिरूपणम् | ५६ |
| | (घ) लौकिकसन्निकर्षनिरूपणम् | ५८ |

| | | |
|---|---|---|
| **चतुर्थः** | **अनुमानोपमानशब्दप्रमाणप्रकाशनम्** | |
| | (क) अनुमाननिरूपणम् | ६६ |
| | (ख) अनुमितिनिरूपणम् | ६९ |
| | (ग) परामर्शनिरूपणम् | ७२ |
| | (घ) व्याप्तिनिरूपणम् | ७६ |
| | (ङ) पक्षधर्मतानिरूपणम् | ७९ |
| | (च) सभेदमनुमानप्रक्रियानिरूपणम् | ८० |
| | (छ) पञ्चावयववाक्यनिरूपणम् | ८३ |
| | (ज) स्वार्थानुमितिपरार्थानुमित्योः करणनिर्धारणम् | ८५ |
| | (झ) लिङ्गभेदनिरूपणम् | ८६ |
| | (ञ) अन्वयव्यतिरेक्यनुमाननिरूपणम् | ८७ |
| | (ट) केवलान्वयिलक्षणनिरूपणम् | ८९ |
| | (ठ) केवलव्यतिरेक्यनुमानलक्षणनिरूपणम् | ९० |
| | (ड) पक्षनिरूपणम् | ९३ |
| | (ढ) हेत्वाभासविभागनिरूपणम् | ९५ |
| | (ण) उपमाननिरूपणप्रकरणम् | १०७ |
| | (त) शब्दप्रमाणनिरूपणप्रकरणम् | १०८ |
| **पञ्चमः** | **अवशिष्टगुणतोऽभावपदार्थान्ताः** | |
| | (क) अयथार्थानुभवनिरूपणम् | १२० |
| | (ख) स्मृतिभेदनिरूपणम् | १२१ |
| | (ग) सुखनिरूपणम् | १२२ |
| | (घ) दुःखनिरूपणम् | १२२ |
| | (ङ) इच्छाक्रोधकृतिनिरूपणम् | १२२ |
| | (च) धर्माधर्मनिरूपणम् | १२३ |
| | (छ) आत्मनो विशेषगुणनिरूपणम् | १२४ |
| | (ज) सभेदं संस्कारलक्षणनिरूपणम् | १२४ |
| | (झ) सभेदं कर्मलक्षणनिरूपणम् | १२५ |
| | (ञ) सभेदं सामान्यलक्षणनिरूपणम् | १२६ |
| | (ट) विशेषलक्षणनिरूपणम् | १२८ |
| | (ठ) समवायस्वरूपनिरूपणम् | १२८ |
| | (ड) अभावचतुष्टयनिरूपणम् | १२९ |
| | (ढ) सप्तपदार्थवादस्थापनम् | १३१ |

प्रथमः पाठः

# न्यायवैशेषिकपारिभाषिकशब्दार्थपरिचयः

## न्यायवैशेषिकदर्शनयोः संक्षिप्तः परिचयः

दृश्यते = ज्ञायते, साक्षात्क्रियते आत्मतत्त्वमनेनेति करणव्युत्पत्त्या निष्पन्नं दर्शनपदं ज्ञानसाधनार्थकम् । येन आत्मतत्त्वं निर्धायते = निश्चीयते तद्दर्शनम् = दर्शनशास्त्रमित्यर्थः । तच्च वैदिकावैदिकभेदेन द्विविधम् । अनया रीत्या वेदस्य प्रामाण्याप्रामाण्यमादाय वैदिकावैदिकभेदेन पौरस्त्यदर्शनानि द्वेधा विभक्तानि सन्ति । तत्र यानि दर्शनानि वेदस्य प्रामाण्यमङ्गीकुर्वन्ति तानि वैदिकानि । यानि तस्य प्रामाण्यं नाङ्गीकुर्वन्ति तान्यवैदिकानीति तु वस्तुस्थितिः । वेदप्रामाण्यवादीनि न्यायवैशेषिक-साङ्ख्ययोगमीमांसावेदान्ताख्यानि षड् दर्शनानि सन्ति । वेदप्रामाण्यविरोधीनि चार्वाकजैनबौद्धानि दर्शनानि प्रसिद्धयन्ति । बौद्धेष्वपि वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकभेदेन चत्वारो बौद्धदर्शनसम्प्रदायाः प्रसिद्धाः । एवमाहत्य वैदिकावैदिकभेदेन द्वादशदर्शनानि पौरस्त्यक्षेत्रे प्रसिद्धानि ।

वेदप्रामाण्यवादिदर्शनेषु न्यायदर्शनस्य स्थानं सर्वोत्कृष्टं वर्तते । इदमेव न्यायदर्शनं प्रमाणप्रधानं मन्यते । अतः प्रमाणशास्त्रमिति नाम्ना चास्य प्रसिद्धिर्विद्यते । तथैव न्यायदर्शनं तर्कशास्त्रम्, हेतुविद्या, आन्वीक्षिकी न्यायविद्या इत्यादिभिर्बहुभिः नामभिरभिधीयते । न्यायदर्शनस्य बीजानि उपनिषदादावपि प्राप्यन्ते । छान्दोग्योपनिषदि “ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदम् आथर्वणं चतुर्थम् इतिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यम्” (छा.उ. ७१।२) इत्यत्र प्रयुक्तं वाकोवाक्यपदं न्यायशास्त्रस्य वाचकमिति विद्वांसो वर्णयन्ति । यद्यपि न्यायशास्त्रारम्भः कदा अभूदिति स्पष्टतया वक्तुं न शक्यते । तथापि पृथक् पृथग् रूपेण स्थितान् न्यायदर्शनसम्बद्धपदार्थानेकत्र चित्वा न्यायसूत्राणि प्रणीतवान् महर्षिर्गौतमः । अतोऽस्य दर्शनस्य प्रवर्तको महर्षिर्गौतमो वर्तते ।

नि = ईयते = प्राप्यते विवक्षितार्थसिद्धिर्येन स न्याय इति न्यायशब्दस्य व्युत्पत्तिः । तथा च येन विवक्षितार्थसिद्धिर्जायते स न्याय इति न्यायपदस्यार्थः । ‘**प्रमाणैरर्थपरीक्षणं न्यायः**’ इति भाष्यकारो

वात्स्यायनोऽवर्णयत् । न्यायस्य अपरं प्रसिद्धं नाम आन्वीक्षिकी । अन्वीक्षया = अनुमित्या प्रवृत्ता न्यायविद्या एव आन्वीक्षिकी कथ्यते । पौरस्त्यदर्शने पदार्थविवेचनदृष्ट्या न्यायस्य प्रभावः सर्वातिशयेन दृश्यते । विक्रमपूर्वपञ्चमशतकादारभ्य अद्यावधि न्यायदर्शनस्य विमला धारा अबाधरूपेण प्रवहति । न्यायदर्शनविकासस्य द्वे धारे दृष्टिपथमायाते । प्रथमा सूत्रकाराद् गौतमादारभ्यते द्वितीया च गङ्गेशोपाध्यायात् । प्रथमायां प्राचीनन्यायधारायां पदार्थमीमांसाया द्वितीयायां नव्यन्यायधारायां प्रमाणमीमांसायाः प्राधान्यं दृश्यते ।

वैशेषिकं न्यायशास्त्रसदृशं शास्त्रं वर्तते । एतयोरुभयोरपि दर्शनयोरात्माऽपवर्गयोः समानरूपेण विवेचकत्वात्, तथैव पदार्थप्रधानत्वाच्च उभयोः न्यायशास्त्रनाम्ना प्रसिद्धिः । तत्र वैशेषिकदर्शनस्य प्रवर्तको महर्षिः कणादोऽस्ति । कणादस्य कणभुक्, काश्यप, उलूक इत्यादीनि बहूनि नामानि प्रसिद्धानि सन्ति । अयं कश्यपवंशे समुत्पन्नः । अतोऽस्य काश्यप इत्याख्यापि प्रसिद्धास्ति । सामान्येषु विशेषाख्यपदार्थस्य विशेषरूपेण स्वीकारात् तथैव विवेचनाच्चास्य दर्शनस्य नाम वैशेषिकमिति प्रख्यातं वर्तते ।

**अधिकृत्य कृते ग्रन्थे (पा.सू. ४।३।८७)** इति पाणिनिसूत्रेण विशेषशब्दात् ठक्प्रत्ययेन निष्पन्नो वैशेषिकशब्दः कणादप्रवर्तितदर्शनस्य वाचकः । अस्माद् भवार्णवाद् विमुक्तये पदार्थतत्त्वज्ञानमावश्यकमिति वैशेषिका निगदन्ति । इह जगति यानि वस्तूनि येन केनापि नाम्ना व्यवह्रियन्ते तानि सर्वाण्यपि पदार्थत्वेन परिचीयन्ते । पदार्थानां स्वरूपपरिज्ञानाय तयोर्दर्शनयोः तर्कसरणिर्ज्ञातव्या भवति । विदुषा अन्नम्भट्टेन वैशेषिकदर्शनस्य पदार्थान् न्यायदर्शनस्य प्रमाणानि चादाय बालानां सहजतया परिबोधाय प्रवेशाय च तर्कसङ्ग्रहो नामकः प्रकरणग्रन्थो विरचितः । तत्र प्रयुक्तानां कतिपयपारिभाषिकशब्दानामर्थबोधाय अयं पाठो निर्धारितोऽस्ति ।

न्यायवैशेषिकदर्शनाभ्यां या तर्कसरणिः पदार्थविवेचनाय प्रयुक्ता वर्तते, सा अत्यन्तं वैज्ञानिकी व्युत्पादिका दृष्टिप्रदायिनी चास्ति । व्याकरणमीमांसादिशास्त्रेष्वपि ह्येषा सरणिः समादृता समवलम्बिता चेति । न्यायदर्शने नव्यन्यायप्रतिपादितपदार्थविवेचने च प्रतियोगी, अनुयोगी, प्रतियोगिता, अनुयोगिता, कार्यता, कारणता, अवच्छेदकता इत्यादयो व्युत्पादकाः परिष्कारोपयोगिनः शब्दाः यथाप्रकरणं पदार्थविवेचनप्रसङ्गे प्राचुर्येणोपयुज्यन्ते । छात्राणाङ्कृते तेषां सम्बद्धप्रकरणान्तर्गतानां न्यायवैशेषिकदर्शनोक्तकतिपयपारिभाषिकशब्दानां सारल्येन अर्थबोधाय अयमुपक्रमः प्रतन्यते ।

# न्यायवैशेषिकपारिभाषिकशब्दार्थपरिचयः

**उद्देशः**

**"नाममात्रेण वस्तुसङ्कीर्तनम्"**

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति न्यायभाष्यकारो वात्स्यायनो भाष्यग्रन्थे स्पष्टमुक्तवान् । एताश्च शास्त्रप्रवृत्तये हेतुभूताः सन्ति । तत्राद्यो हेतुरुद्देशः । तल्लक्षणञ्च **नाममात्रेण वस्तुसङ्कीर्तनम्** । अर्थात् कस्यापि वस्तुनो नाममात्रं गृहीत्वा तस्य सङ्कीर्तनम् = यथार्थकथनं यत् क्रियते तदुद्देशो भवति । यथा "**द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः**" इति कथनमुद्देशोऽस्ति । अत्र द्रव्यादिपदार्थानां लक्षणं परीक्षा च न विधीयते, केवलं तेषां नाममात्रेण निर्देशो वर्तते । अतः स उद्देशः, उद्देशग्रन्थो वा ।

**लक्षणम्**

**"वस्तुनोऽसाधारणधर्मः"**

लक्ष्यते ज्ञायतेऽनेनेति व्युत्पत्त्या करणार्थे ल्युट्प्रत्यये कृते लक्षणशब्दो निष्पद्यते । येन स्वरूपेण पदार्थो ज्ञायते तदेव स्वरूपं लक्षणमित्युच्यते । तच्चेतरभेदस्यानुमापकं भवति । तथा च वस्तुनोऽसाधारणधर्मो लक्षणमिति लक्षणस्य लक्षणम् । असाधारणत्वं नाम अव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यत्वम् । अथवा लक्ष्यतावच्छेदकसमनियतत्वं वा ।

यत्र यत्र लक्ष्यतावच्छेदकं तत्र तत्र लक्षणम् । यत्र यत्र लक्षणं तत्र लक्ष्यतावच्छेदकम् । यथा गोत्वं लक्ष्यतावच्छेदकं, सास्नादिमत्त्वं तल्लक्षणम् । तयोः समनियतत्वमस्ति । लक्ष्यैकदेशवृत्तित्वे सति लक्ष्यैकदेशावृत्तित्वमव्याप्तिः । यथा गोः कपिलत्वम् । कपिलत्वमिति लक्षणं रक्तादिविशिष्टगोषु न सङ्गच्छते ।

अतो गोः कपिलत्वं लक्षणमव्याप्तिदोषयुक्तं भवति ।

अतिव्याप्तिर्नाम लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम् । यथा गोः शृङ्गित्वम् । शृङ्गित्वञ्च लक्ष्यभूतासु गोषु अलक्ष्यभूतेषु तदितराजमहिषादिषु च वर्तते । अतो गोः शृङ्गित्वं लक्षणमतिव्याप्तिदोषग्रस्तम् ।

लक्ष्यमात्रावृत्तित्वमसम्भवस्य लक्षणम् । यथा गोरेकशफवत्त्वम् । अथवा पृथिव्या ज्ञानवत्त्वं लक्षणमसम्भवदोषयुक्तं भवति तत्र ज्ञानाभावात्, एतादृशदोषत्रयशून्यमेव निर्दुष्टं लक्षणं भवितुमर्हति । एवमेव अन्यानि उदाहरणानि यथायथं ज्ञेयानि ।

## परीक्षा

**"लक्षितस्य लक्षणं सम्भवति न वेति विचारविशेषः"** ।

परितः=सर्वतः, ईक्षा= दर्शनम्, परीक्षा इति कथ्यते । लक्षितस्य लक्षणं सम्भवति न वेति विचारविशेष इत्यर्थः । अर्थाद् यस्य पदार्थस्य यल्लक्षणं विधीयते, तत्समीचीनमस्ति न वेति विचारविशेष एव लक्षणपरीक्षा । यथा गन्धवती पृथिवीति पृथिवीलक्षणं विहितं तत्र **उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठतीति** नियमानुसारेण उत्पत्तिकालिकपृथिव्यां गन्धो नास्ति, साऽपि पृथिवीति तादृशपृथिव्यामिदं लक्षणं न सङ्गच्छत इति सम्यग् विचार्य गन्धसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं जातिघटितं पृथिवीलक्षणमुच्यते । अनया रीत्या परितो विचार्य निर्दुष्टं लक्षणं व्यवस्थापयितुं शक्यते । अतो विहितानां लक्षणानां सम्यगीक्षणं सर्वथाऽवश्यकम् । परीक्षया लक्षणगता दोषा अपाक्रियन्ते । अत्रोद्देशस्य पक्षज्ञानं फलम्, लक्षणस्येतरभेदज्ञानम्, परीक्षाया लक्षणे दोषपरिहारः फलमिति मन्तव्यम् ।

## लक्षणता

**"लक्षणे विद्यमानो धर्मः"**

लक्षणस्य भावो लक्षणतेति व्युत्पत्त्या लक्षणशब्दाद् भावार्थे **तस्य भावस्त्वतलौ** (पा.सू. ५।१।११९) इति पाणिनिसूत्रेण तल्प्रत्यये सति लक्षणतेति शब्दो निष्पन्नो भवति । लक्षणे विद्यमानो धर्मस्तदर्थः । यथा गन्धवत्त्वं पृथिव्या लक्षणमित्युक्तौ गन्धवत्त्वं लक्षणम् । गन्धवत्त्वे (गन्धे) च लक्षणता विद्यते । तादृशलक्षणतावच्छेदको धर्मो गन्धत्वम्, **यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्नः** इति नियमात् गन्धनिष्ठा लक्षणता लक्षणतावच्छेदकगन्धत्वावच्छिन्ना भवति तथैव येन सम्बन्धेन लक्षणं लक्ष्ये तिष्ठति स सम्बन्धो लक्ष्यतावच्छेदक इति नियमाद् गन्धनिष्ठा लक्षणता लक्ष्यतावच्छेदकसमवायसम्बन्धावच्छिन्ना भवति, गन्धे गन्धत्वस्य समवायात् ।

## लक्ष्यता

**"लक्ष्ये विद्यमानो धर्मः"**

लक्षणेन च यद् ज्ञायते तल्लक्ष्यं भवति । लक्ष्यस्य भावो लक्ष्यता । यथा सास्नया गौः ज्ञायते । गौरत्र लक्ष्यं वर्तते । लक्ष्ये लक्ष्यता तिष्ठति । गोरूपे लक्ष्ये लक्ष्यतास्ति । वर्तमान इत्यस्मिन्नर्थे नव्यनैयायिकैर्निष्ठशब्दः प्रयुज्यते । अतो गवि विद्यमाना लक्ष्यतेति तात्पर्ये गोनिष्ठा लक्ष्यतेति कथ्यते । गोनिष्ठा लक्ष्यता गोत्वधर्मावच्छिन्ना भवति ।

**पक्षः**

**"सन्दिग्धसाध्यवान् पक्षः'"**

साध्यसन्देहो यत्र क्रियते स पक्षो भवति। 'सन्दिग्धसाध्यवान् पक्षः' इति तर्कसङ्ग्रहे। एवमुक्ते सति साध्यसन्देहं विनापि क्वचिदनुमानसम्भवात् लक्षणमिदं किञ्चित् परिष्करणीयमभूत्। यथा साध्यसन्देहं विनापि घनगर्जितेन मेघानुमानं भवति। अतः सिषाधयिषाविरहविशिष्ट-सिद्ध्यभाववान् पक्षः इति पक्षस्य लक्षणं स्वीकर्तव्यं भवति। सिषाधयिषा साधयितुमिच्छा, यथा 'पर्वते वह्निमनुमिनुयाम्' अथवा 'पर्वते वह्निं साधयेयम्' इत्याकारिका इच्छा। तया शून्या तदभावविशिष्टा, सिषाधयिषाविरहविशिष्टा इति, सिद्धिर्नाम पक्षे साध्यनिश्चयः, यथा पर्वतो वह्निमान् इति। एतादृशो निश्चयः यत्र न विद्यते स पक्षः, अर्थात् सिषाधयिषाविरहविशिष्टसिद्ध्यभाववान् पक्षः। यत्र साधनेच्छा नास्ति सिद्धिरपि नास्ति स पक्ष इत्यभिप्रायः। तत्र पक्षे वृत्तित्वज्ञानाद् अनुमितिर्भवति, तादृशे पक्षे हेतोर्वृत्तित्वज्ञानं हि साध्यव्याप्यहेतुमान् पक्ष इति परामर्शात्मकं ज्ञानम्। तदेव अनुमितौ कारणम्। अत एव सिषाधयिषाविरहविशिष्टसिद्धिरनुमितौ प्रतिबन्धिका यत्र सिषाधयिषा नास्ति, सिद्धिश्च वर्तते तत्र अनुमितिर्न भवति। तदभावश्च प्रतिबन्धकाभावविधया अनुमितौ कारणम्। तादृशाभावः सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता इति।

**साध्यम्**

**"साधनार्हम्"**

पक्षे यत् साधनीयं भवति तदेव साध्यं निगद्यते। अथवा यस्यानुमानेन साध्यसाधकेन हेतुना सन्दिग्धस्य असिद्धस्य वा साध्यस्य निश्चयः क्रियमाणो वर्तते तदेव साध्यसंज्ञकं भवति। यथा 'पर्वतो वह्निमान्' धूमाद् इत्यत्र वह्निः साध्यो भवति। तथैव येषु अनुमानवाक्येषु मतुप्प्रत्ययान्तम्, इन्प्रत्ययान्तं वा पदं श्रूयते तदंशं विहाय यावानंशोऽवशिष्यते तत्साध्यं भवति। यथा पर्वतो वह्निमान् धूमात्, अयं संयोगी एतद्वृक्षत्वादित्यत्र वह्निमानिति स्थले मतुप्प्रत्ययान्तं पदं संयोगीत्यत्र च इन्प्रत्ययान्तं पदं श्रूयते, तावन्तमंशं विहाय यथाक्रमं वह्निः, संयोगश्चेति साध्यमिति निश्चीयते। एवमेव यत्र तादृशं प्रत्ययान्तपदरहितं पदं प्रयुक्तं भवति तत्र त्वमिति संयोज्य साध्यबोधकं पदमित्यवगम्यते। यथा– अयमात्मा ज्ञानादित्यत्र अनुमानवाक्यप्रयोगावसरे आत्मेति पदं प्रयुज्यते। तत्र साध्यं किम्? इति जिज्ञासायामात्मत्वं साध्यं भवतीत्युच्यते। अनया रीत्या सर्वत्र साध्यबोधकानि पदानि यथायथं निश्चेतुं शक्यन्ते।

**हेतुः**

**"पञ्चम्यन्तं तृतीयान्तं वा हेतुवचनम्"**

हेतोर्निरूपणक्रमे न्यायसूत्रे '**उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः**' '**तथा वैधर्म्यात्**' इत्युक्तं वर्तते । येन कारणेन साध्यस्य निश्चयो विधीयते तदेव कारणं हेतुशब्दाभिधं वर्तते । अतो ज्ञापको बोधको गमको वा हेतुर्भवति । लिङ्गमित्यस्यापरं नाम । यथा पर्वतो वह्निमान् धूमाद् इत्यत्र पर्वते वह्नौ साध्यमाने धूमो हेतुर्भवति । यथा वह्निधूमयोर्महानसादौ सादृश्यं दृष्टम् । तत्सादृश्यात् पर्वतेऽपि धूमसत्त्वे वह्निसत्त्वं प्राप्नोतीति उदाहरणसाधर्म्यात् साध्यस्य साधकं हेतुरुच्यते । एवमेवोदाहरणवैधर्म्यादपि साध्यसाधकं हेतुर्भवति । यथा यो न वह्निमान् स न धूमवान् यथा जलह्रदः इत्युच्यमाने व्यतिरेकव्याप्त्यापि धूमः पर्वते वह्निसाधको भवति । तथैव यस्मिन्ननुमानवाक्ये पञ्चम्यन्तं तृतीयान्तं वा पदं श्रूयते स साध्यसाधको हेतुर्भवति । यथा– घटोऽभिधेयः प्रमेयत्वादित्यत्र प्रमेयत्वादिति पञ्चम्यन्तं पदं श्रूयते । अतो घटात्मके पक्षे अभिधेयत्वसाधने प्रमेयत्वं हेतुः । तथैवान्यत्रापि यथायथं बोध्यम् ।

**दृष्टान्तः**

**"लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं सः"**

लौकिकाः शास्त्रीयज्ञानरहिताः सामान्या जनाः शास्त्रीयज्ञानवन्तो विशिष्टा जनाश्च यमर्थं निर्विवादं स्वीकुर्वन्ति, अथवा तयोः बुद्धिसाम्यं यस्मिन्नर्थे (विषये) भवति स एवार्थो दृष्टान्त इत्यभिधीयते । "**लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः**" इति दृष्टान्तलक्षणसूत्रं गौतमनिर्दिष्टम् । एवमेव पञ्चावयवाक्येषु यदुदाहरणवाक्यं तदपि दृष्टान्तरूपेण गृह्यते । यथा– महानसादिकं शास्त्रीयज्ञानरहिताः सामान्या जनाः शास्त्रीयज्ञानवन्तश्च विशिष्टा जना वह्निधूमयोः सामानाधिकरण्यविशिष्टमेव बुध्यन्ते । अतो वह्न्यादिसाधने महानसादिर्दृष्टान्त इत्युच्यते ।

**सपक्षः**

**"निश्चितसाध्यवान्"**

यत्र साध्यमवश्यमस्तीति निश्चयो जायते स सपक्षो भवति । '**निश्चितसाध्यवान् सपक्षः**' इति तर्कसङ्ग्रहे सपक्षस्य लक्षणं निर्दिष्टवान् अन्नम्भट्टः । अथवा साध्यप्रकारकनिश्चयविशेष्यत्वं

सपक्षत्वमिति सपक्षस्य लक्षणम् । यथा पर्वते धूमेन हेतुना वह्नौ साध्यमाने महानसं सपक्षो भवति । यतो हि महानसे धूमस्य वह्निसाहचर्यं भूयो भूयः प्रत्यक्षीकृतमिति तत्र (महानसे) वह्निरूपसाध्यनिश्चयो वर्तत एव । स च निश्चयः महानसं वह्निमद् इत्याकारकः । तद्विषयो महानसम् सपक्ष इति । एवमेवान्यत्रापि चिन्तनीयम् ।

**विपक्षः**

**"निश्चितसाध्याभाववान्"**

साध्याभावप्रकारकनिश्चयविशेष्यत्वं विपक्षत्वमिति विपक्षस्य लक्षणम् । यत्र साध्यं नास्तीति निश्चयः पूर्वत एव वर्तते स विपक्ष इत्याशयः । यथा पर्वते धूमेन हेतुना वह्नौ साध्यमाने महाह्रदे पूर्वत एव वह्निर्नास्तीति निश्चयो वर्तते । तादृशो निश्चयश्च ह्रदो वह्न्यभाववानित्याकारकः । अतो महाह्रदे साध्याभावस्य निश्चयात् तस्य (महाह्रदस्य ) विपक्षत्वं सिद्ध्यति ।

**अवच्छेदकम्**

**"अन्यूनानतिरिक्तो धर्मः"**

अवच्छिनत्ति=विशिनष्टि=व्यावर्तयतीति अवच्छेदकम् । अन्यूनानतिप्रसक्तधर्म एव अवच्छेदको भवति । समानाधिकरणयोर्धर्मयोर्मध्ये विशेषणतया प्रतीयमानो धर्मोऽवच्छेदको भवति । विशेष्यतया प्रतीयमानो धर्मश्चावच्छिन्नो भवति । सर्वदैव अवच्छेदको धर्मोऽवच्छेद्यधर्मसमानाधिकरणो भवति । यथा मनुष्यत्वधर्मो मनुष्यनिष्ठां लक्ष्यतां पश्वादिनिष्ठलक्ष्यताभ्यो व्यावर्तयति । तस्मात् मनुष्यत्वं मनुष्यनिष्ठलक्ष्यताया अवच्छेदकं भवति । अत्रान्यूनानतिप्रसक्तधर्मो मनुष्यत्वम् । एतच्च मनुष्यनिष्ठायाः लक्ष्यताया अवच्छेदकम् । उदाहरणान्तरमुच्यते- यथा गन्धवती पृथिवीत्यत्र पृथिवी लक्ष्या, लक्ष्यता पृथिव्याम्, तादृशलक्ष्यताया अवच्छेदकधर्मः पृथिवीत्वम्, तच्च पृथिवीमात्रवृत्तिकम् । एतेन लक्ष्यतावच्छेदकं पृथिवीत्वं विशेष्यभूतां सर्वां पृथिवीं व्यावर्तयति । अत्र लक्ष्यतावच्छेदकं घटत्वादिकं न भवितुमर्हति न्यूनवृत्तित्वात्, न वा तादृशमवच्छेदकं द्रव्यत्वादिकमधिकवृत्तित्वात् । किञ्च यत्र लक्ष्यता वर्तते तत्रैव लक्ष्यतावच्छेदकादिकमप्यपेक्षते । तथा च लक्ष्यतासमानाधिकरणं लक्ष्यतावच्छेदकपृथिवीत्वमस्ति । यतो हि लक्ष्यताधिकरणपृथिव्यां लक्ष्यतावच्छेदकपृथिवीत्वमिति समानाधिकरणयोरेव धर्मयोरवच्छेद्यावच्छेदकभावश्चोपपन्नो भवति ।

### अवच्छिन्नम्

**"अवच्छेदार्हः पदार्थः"**

अवच्छिन्नावच्छेद्यौ पर्यायौ । अवच्छेदार्हः पदार्थः । अवच्छेदकतानिरूपकं विशिष्टं वेत्यर्थः । यथा– घटत्वेनावच्छेद्या घटप्रतियोगिता 'यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्नः' इति नियमात् । यथा पृथिवीत्वं पृथिवीनिष्ठलक्ष्यताया अवच्छेदकं वर्तते । अतः पृथिवीनिष्ठा लक्ष्यता पृथिवीत्वावच्छिन्ना भवति ।

### व्याप्यत्वम्

**"व्याप्त्याश्रयत्वम्"**

व्याप्यव्यापकविषयकं चिन्तनं तावद् अनुमानप्रमाणनिरूपणावसरे विशेषतः क्रियते नैयायिकैः । तत्र व्याप्यत्वं नाम व्याप्त्याश्रयत्वम् । तद्घटकीभूता या व्याप्तिस्तस्या लक्षणं तु तदभाववदवृत्तित्वम् । अत्र तत्पदेन साध्यो ग्रहीतव्यः । अतः साध्याभाववदवृत्तित्वं तल्लक्षणम् । तदभावः, साध्याभावः । तदभाववानित्यस्य साध्याभाववान् इत्यर्थः । अवृत्तित्वं नाम वृत्तित्वाभावः । तादृशवृत्तित्वाभाव एव व्याप्यत्वम् । यथा पर्वतो वह्निमान् धूमादित्यत्र धूमेन हेतुना पर्वते वह्नौ साध्यमाने धूमो वह्निव्याप्यो वर्तते । अत्र साध्यो वह्निः, तद्वान् महानसादिः, तदभाववान् जलह्रदादिः । तत्र वृत्तित्वं मीनादेः, अवृत्तित्वञ्च धूमस्येति लक्षणसमन्वयः । एतादृशी व्याप्तिः स्वरूपसम्बन्धेन साध्यसाधके हेतौ तिष्ठति । अतः साध्यव्याप्यो हेतुर्भवति । हेतुव्यापकञ्च साध्यमिति साध्यसाधनयोर्व्याप्यव्यापकभावः । साध्यनिरूपितव्याप्तिमान् हेतुरित्यर्थः । तथैव न्यूनदेशवृत्तित्वं व्याप्यत्वमित्यपि लक्षणं भवितुमर्हति, साध्यापेक्षया हेतोर्न्यूनवृत्तित्वात् ।

### व्यापकत्वम्

**"तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्"**

तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, हेतुमन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, साधनवन्निष्ठात्यन्ताभावाप्रतियोगित्वं वा व्यापकत्वमिति व्यापकलक्षणम् । अत्र तत्पदेन हेतुर्गृह्यते । तद्वान् हेतुमान् । यथा धूमेन हेतुना पर्वते वह्नौ साध्यमाने हेतुमान् पर्वतः । तन्निष्ठात्यन्ताभावस्य योऽप्रतियोगी स व्यापक इति कथ्यते । यथा साध्यसाधनयोर्वह्निधूमयोर्मध्ये वह्निर्व्यापकः, धूमश्च व्याप्यः । अत्र लक्षणस्थतत्पदेनात्र धूमो ग्रहीतव्यः । तद्वान् धूमवान् पर्वतादिः । तन्निष्ठात्यन्ताभावो

घटो नास्तीत्याकरकाभावस्तत्प्रतियोगी घटो न तु साध्यो वह्निः। प्रतियोगिता प्रतियोगिनि घटे, अप्रतियोगी वह्निः, अप्रतियोगित्वं वह्नौ वर्तत इति भवति लक्षणसमन्वयः। अनेन प्रकारेण हेतुनिष्ठा व्याप्यतानिरूपिता व्यापकता साध्ये वर्तते। अतो हेतुव्यापकत्वं साध्यस्यास्तीति निश्चीयते।

## प्रतियोगिता

**"प्रतियोगिनो भावः"**

यस्याभावः स प्रतियोगी। प्रतियोगिनो भावः प्रतियोगिता इति। प्रतियोगिन्शब्दात् भावार्थे '**तस्य भावस्त्वतलौ**' इति पाणिनीयसूत्रेण तल्प्रत्यये सति प्रतियोगिताशब्दो निष्पद्यते। यथा भूतले घटो नास्तीत्यनेन वाक्येन भूतले घटस्याभावो वर्तत इति ज्ञायते। अतो घटो नास्तीत्याकारकाभावस्य प्रतियोगी घटः, प्रतियोगिता घटनिष्ठा। सा घटनिष्ठा प्रतियोगिता केनचित् सम्बन्धेन केनचिद् धर्मेण च अवच्छिन्ना भवति। अर्थात् प्रतियोगितावच्छेदकं धर्मसम्बन्धभेदेन द्विविधं भवति। येन सम्बन्धेन स्वाधिकरणे भूतलादौ घटो वर्तते, स एव प्रतियोगितावच्छेदकसम्बन्धः, तेन सम्बन्धेन अवच्छिन्ना घटनिष्ठा प्रतियोगिता।

येन धर्मेण च प्रतियोगिपदार्थस्य भानं भवति स धर्मः प्रतियोगितावच्छेदको धर्मो भवति। यथा संयोगेन घटाभाववद् भूतलमित्युक्तौ घटनिष्ठा या प्रतियोगिता सा प्रतियोगितावच्छेदकघटत्वधर्मेण प्रतियोगितावच्छेदकसंयोगसम्बन्धेन चावच्छिन्ना भवति। घटत्वञ्च अन्यूनानतिप्रसक्तधर्मो वर्तते। यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति नियमात् घटनिष्ठा प्रतियोगिता घटत्वधर्मावच्छिन्ना भवति। एवमेवान्यत्रापि चिन्तनीयम्।

## अनुयोगिता

**"अनुयोगिनो भावः"**

यस्मिन्नभावः प्रतीयते सोऽनुयोगी। तत्राभावस्य भानमाधारत्वेन भवति। यथा भूतले घटो नास्तीत्यत्र भूतले घटस्याभावो वर्तते। अतोऽत्र घटः प्रतियोगी, भूतलञ्चानुयोगी। यदा घटः प्रतियोगी तदा प्रतियोगिता घटनिष्ठा। यदा च भूतलमनुयोगि तदा अनुयोगिता भूतलनिष्ठा भवति। तथैव घटवद् भूतलमित्यत्र संयोगेन घटविशिष्टं भूतलं भवति, तत्र संयोगो नाम घटभूतलयोः संसर्गः। अस्यां प्रतीतौ घटपदार्थस्य आधेयतया भानं भूतलपदार्थस्य आधारतया। आधारत्वेन प्रतीयमानपदार्थ एव अनुयोगी भवति। अतोऽत्र भूतलमनुयोगी।

## कार्यता

### "प्रागभावप्रतियोगिता"

क्रियते यत् तत् कार्यमिति व्युत्पत्त्या कृधातोः ण्यत्प्रत्यये सति निष्पन्नो भवति कार्यशब्दः । जन्याः सर्वेऽपि पदार्थाः कार्यत्वेनाभिधीयन्ते । तच्च कार्यं प्रागभावप्रतियोगि इत्युक्तं तर्कसङ्ग्रहे । एवं सति घटादिकार्योत्पत्तेः पूर्वमिह घटो भविष्यतीति या प्रतीतिर्जायते । तादृशप्रतीतौ घटोत्पत्तिप्राक्कालिको घटाभावो विषयीभूतोऽस्ति । स एव प्रागभावनाम्ना व्यवह्रियते । यस्याभावः सः प्रतियोगीति नियमात्, उक्तघटप्रागभावप्रतियोगित्वस्य घटे विद्यमानत्वात् घटः कार्यमित्युच्यते । कार्यस्य भावो कार्यता इत्यत्र भावार्थे तल्प्रत्ययः । कार्यञ्च घटादिकम् । तथा सति कार्यता घटनिष्ठा भवति । यथा पृथिवीनिष्ठायाः लक्ष्यतायाः अवच्छेदकं पृथिवीत्वं भवति तद्वद् घटनिष्ठायाः कार्यताया अवच्छेदकं घटत्वं भवति । अतः कार्यनिष्ठो धर्मः कार्यता ।

तथैव 'दण्डेन घटः' इत्यत्र दण्डजन्यो घटो भवति, अत्र घटकारणं दण्डस्तज्जन्यं घटकार्यम्, तादृशघटकार्ये च कार्यताख्यो धर्मो वर्तते । एतादृशकार्यत्वं सावयवानां पदार्थानामेव भवितुमर्हति न तु निरवयवानामिति ।

## कारणता

### "कार्याव्यवहितपूर्ववृत्तिता"

कार्यते येन तत् कारणमिति कारणशब्दस्य व्युत्पत्तिः । यद् वस्तु कार्यं जनयति तत्कारणं भवति, यच्च उत्पद्यते तद् कार्यमिति । कारणे कारणता तिष्ठति । कारणतायाञ्च कार्योत्पादनसामर्थ्यमपेक्षितमस्ति । कार्योत्पत्त्यर्थं कारणस्य सक्रियत्वमावश्यकम् । एतदेव अर्थक्रियाकारित्वपदेनोच्यते । क्रियासिद्धान्तोऽप्ययमेव । यथा घटस्योत्पत्तये मृत्तिका कारणम्, ततश्चोत्पन्नो घटः कार्यं भवति । अन्यथासिद्धशून्यत्वे सति कार्यनियतवृत्तित्वं कारणत्वम् इति कारणस्य लक्षणं वर्तते । तादृशे कारणे कारणताधर्मस्तिष्ठति । अस्यैव नामान्तरं जनकत्वम् । वस्तुन उत्पत्तेः प्राक् यावन्ति साधनानि नियमेन अपेक्षितानि भवन्ति, तानि सर्वाणि कारणानि । तादृशकारणेषु विद्यमानः प्रतीयमानश्च धर्मः कारणता कारणत्वं वा ।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| पारिभाषिकशब्दः | = | अर्थविशेषबोधकः शास्त्रीयः शब्दः । |
| गौतमः | = | न्यायसूत्रप्रणेता । |
| वात्स्यायनः | = | न्यायभाष्यकर्ता । |
| समनियतत्वम् | = | तद्व्याप्यत्वे सति तद्व्यापकत्वम् । |
| वस्तुसङ्कीर्तनम् | = | वस्तुनो नामग्रहणम् । |
| लक्षणम् | = | येन स्वरूपेण पदार्थो ज्ञायते तदेव स्वरूपम् । |
| अव्याप्तिः | = | लक्ष्यैकदेशवृत्तित्वे सति लक्ष्यैकदेशावृत्तित्वम् । |
| परीक्षा | = | लक्षितस्य लक्षणं सम्भवति न वेति विचारः । |
| सन्देहः | = | संशयः । |
| लक्ष्यम् | = | लक्षणेन यद् ज्ञायते तद् वस्तु । |
| सम्बन्धः | = | वैशिष्ट्यम् । |
| असाधारणत्वम् | = | लक्ष्यतावच्छेदकसमनियतत्वम् । |
| घटत्वावच्छिन्नः | = | घटत्वावच्छेद्यः । |
| अवच्छेदकः | = | अन्यूनानतिप्रसक्तधर्मः । |
| व्यापकत्वम् | = | तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम् । |
| कारणम् | = | कार्यनियतपूर्ववृत्ति । |

## अभ्यासः

### १. रिक्तस्थानं पूरयत

(क) येन सम्बन्धेन लक्षणं ... तिष्ठति स सम्बन्धो लक्ष्यतावच्छेदकः ।

(ख) यो धर्मो यस्यावच्छेदकः स ... इति नियमात् ।

(ग) अन्यथासिद्धिशून्यत्वे सति ... कारणत्वमिति कारणस्य लक्षणम् ।

### २. परस्परं मेलयत

| | |
|---|---|
| परीक्षा | पक्षे यत् साधनीयं भवति |
| साध्यम् | साध्यसाधकम् |
| हेतुः | लक्षितस्य लक्षणं सम्भवति न वेति विचारः |
| सपक्षः | निश्चितसाध्याभाववान् |
| विपक्षः | निश्चितसाध्यवान् |

### ३. अतिसंक्षिप्तमुत्तरं देयम्

(क) शास्त्रप्रवृत्तये हेतवः के सन्ति ?

(ख) किं नाम लक्ष्यम् ?

(ग) किं नाम असाधारणत्वम् ?

(घ) अतिव्याप्तेः किं लक्षणम् ?

(ङ) पृथिव्या अवच्छेदको धर्मः कः ?

(च) सपक्षस्य किं लक्षणम् ?

### ४. वर्णनात्मकमुत्तरं देयम्

(क) सोदाहरणं लक्षणस्य लक्षणं निरूपयत ।

(ख) लक्ष्यतायाः स्वरूपं प्रदर्श्य पक्षलक्षणं निर्दिशत ।

(ग) सोदाहरणं हेतुलक्षणं प्रदर्शयत ।

(घ) कार्यलक्षणं विलिख्य तस्यैकमुदाहरणं दत्त ।

(ङ) व्याप्यव्यापकयोः स्वरूपं सोदाहरणं निर्धारयत ।

(च) अवच्छेदकावच्छिन्नपदयोः पारिभाषिकमर्थं स्फुटीकुरुत ।

(छ) कारणलक्षणं विलिख्य कारणतां परिचाययत ।

## ५. कक्षाभ्यासो गृहाभ्यासश्च

(क) दृष्टान्तविषये मित्रैः सह संवादं कुरुत ।

(ख) अवच्छेदकावच्छिन्नशब्दयोः प्रयोगं विधाय एकमनुच्छेदं रचयत ।

(ग) पक्षस्वरूपमादाय गुरुणा सखिभिश्च सह चर्चां कुरुत ।

## ६. परियोजनाकार्यम्

**'वैदिकदर्शनेषु न्यायदर्शनस्य स्थानम्'** इति शीर्षकमादाय एका सङ्क्षिप्ता परियोजना निर्मातव्या ।

## ७. रचनात्मकोऽभ्यासः

(क) किमप्येकमनुमानवाक्यमाश्रित्य पक्षसाध्यहेतूनां निर्धारणं कुरुत ।

(ख) **'पारिभाषिकशब्दार्थज्ञानस्यावश्यकत्वम्'** इति शीर्षके नातिविस्तृतमेकं निबन्धं लिखत ।

## ८. सर्जनात्मकोऽभ्यासः

(क) **'प्रतियोगित्वानुयोगित्वयोर्वैशिष्ट्यम्'** इति शीर्षकमवलम्ब्य सप्रयोगमनुच्छेदमेकं रचयत ।

(ख) **'वैशेषिकदर्शनस्य महत्त्वम्'** इति शीर्षके अन्तर्जालसहायेन अनुच्छेदद्वयं रचयत ।

द्वितीयः पाठः

# सविभागं वैशेषिकदर्शनाभिमतपदार्थोद्देशः

## ग्रन्थपरिचयः

न्यायशास्त्रे वैशेषिकशास्त्रे च बहुभिः विद्वद्भिः बहवो ग्रन्था रचिताः सन्ति । किन्तु पश्चात्काले ते सर्वेऽपि ग्रन्था न्यायशास्त्राध्येतॄणां तत्र प्रवेशोत्सुकानां वा बालानां कृते दुर्बोध्याः, दुर्ग्राह्याः प्रायः क्लेशसाध्याश्च सञ्जाताः । यद्यपि प्रवेशकरणाय विश्वनाथपञ्चाननभट्टाचार्यविरचिता **'न्यायसिद्धान्तमुक्तावली'** आसीत् तथापि सा अल्पमतिमतां कृते क्लेशसाध्या एवासीत् । अतस्तादृशस्य ग्रन्थस्य महती आवश्यकतानुभूता येन बालाः सरलतया न्यायशास्त्रं ज्ञातुं समर्थाः भवेयुः । तामेवावश्यकतां पूरयितुं विदुषा अन्नम्भट्टेन **'तर्कसङ्ग्रहः'** नामकोऽत्यल्पः परन्तु अत्युपकारी न्यायवैशेषिकपदार्थानां परिचायको ग्रन्थो रचितः ।

'बालस्वभावः सर्वदा सारल्यमेवापेक्षते' इति वचनानुसारेण न्यायवैशेषिकदर्शनयोः प्रवेशस्य कृते एकस्य द्वारस्याभाव आसीदेव । अनेन रचितेन तर्कसङ्ग्रहेण ग्रन्थेन सोऽभावः पूरितः । अस्मिन् तर्कसङ्ग्रहे वैशेषिकोक्तसप्तपदार्थाः, न्यायोक्तानि चत्वारि प्रमाणानि च सरलतया सूत्ररूपेण प्रतिपादितानि सन्ति । अत्र विद्यमानः प्रमेयभागो वैशेषिकदर्शनस्य, प्रमाणभागस्तु न्यायदर्शनस्य इत्यपि बुधाः कथयन्ति । अनयोः शास्त्रयोः समानतन्त्रत्वञ्च प्रसिद्धम् । अस्य तर्कसङ्ग्रहग्रन्थस्य व्युत्पत्तिसम्पादनदृष्ट्या महत्त्वमस्ति ।

तस्मादयं ग्रन्थः पाठ्यक्रमे स्वीकृतो वर्तते । अस्यानुवादो व्याख्या वा बह्वीषु भाषासु जाता । अस्य बहुविधा व्याख्याग्रन्था रचिताः सन्ति । अधुना च टीकारचनाक्रमः प्रचलत्येव । तासु टीकासु ग्रन्थकर्तुः एव **'दीपिका'** इति नाम्नी टीका प्रसिद्धा वर्तते । अस्य **पदकृत्यम्, न्यायबोधिनी, सिद्धान्तचन्द्रोदय** प्रभृतयष्टीकाः प्राप्यन्ते । अयम् अन्नम्भट्टो दाक्षिणात्यः, आन्ध्रदेशीयः तैलङ्गब्राह्मण आसीत् । अयं

विद्यानगरीं काशीं गत्वा शास्त्राणि अधीतवान् । अस्य रचनाकालः सप्तदशशताब्दी ई.सं.१६२३ आसीदिति मनीषिभिरुच्यते । यावत्पर्यन्तं जगति दर्शनशास्त्रं जीवति तावत्पर्यन्तमयमन्नम्भट्टो विद्वत्सभायां सादरेण जीवति इति नात्र संशयलेशोऽपि ।

प्रारिप्सितस्य तर्कसङ्ग्रहाख्यग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं ग्रन्थादौ त्रिविधेषु नमस्कार-वस्तुनिर्देशाशीर्वादात्मकेषु मङ्गलेष्वन्यतमं नमस्कारात्मकं मङ्गलमाचरन् शिष्यप्रवृत्तयेऽनुबन्धचतुष्टयं निर्दिशति ग्रन्थकारोऽन्नम्भट्टः-

## तर्कसङ्ग्रहः

### मङ्गलश्लोकः

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।**
**बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ।**

**अन्वयः-** हृदि विश्वेशं निधाय गुरुवन्दनञ्च विधाय बालानां सुखबोधाय (मया अन्नम्भट्टेन) तर्कसङ्ग्रहः क्रियते ।

**व्याख्या-** विश्वेशम् = जगत्कर्तारं परमात्मानम्, हृदि = मनसि, निधाय = नितरां ध्यात्वा सदा तद्ध्यानपरायणो भूत्वेत्यर्थः, एतेनेश्वरो जगन्निमित्तकारणमिति न्यायदर्शनसिद्धान्तः सङ्केतितः, गुरोर्वन्दनं गुरुवन्दनम् = विद्यागुरुनमस्कारम्, विधाय = कृत्वा गुरौ स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारं विधाय कृत्वेत्यर्थः । एतेन शिष्यैर्गुरुः प्रकाशनीय इत्याशयः प्रकटितो भवति, 'गुरुं प्रकाशयेद्धीमान्' इति शास्त्रानुरोधात् । अत एवोच्यते -

**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः** ॥ इति ॥

बालानाम् = यैर्व्याकरणादिशास्त्रमधीतम्, किन्तु, न्यायशास्त्रं नाधीतम्, त एवात्र बालाः, तथा च व्याकरणञ्च, काव्यञ्च, कोशश्च = व्याकरणकाव्यकोशाः, अधीता व्याकरणकाव्यकोशाः येन स अधीतव्याकरणकाव्यकोशः, न अधीतम् = अनधीतम्, न्यायश्च तद् शास्त्रम् = न्यायशास्त्रम्, अनधीतं न्यायशास्त्रं येन, स अनधीतन्यायशास्त्रः, एवम्भूतानां तेषां

अधीतव्याकरणकाव्यकोशानामनधीतन्यायशास्त्राणां ग्रहणधारणपटूनां न्यायशास्त्रजिज्ञासूनाम्, बालानाम्, सुखेन = अनायासेन, अल्पप्रयत्नेन वा, बोधाय = पदार्थतत्त्वज्ञानाय, स्वल्पपरिश्रमेणैव पदार्थतत्त्वज्ञानायेत्यर्थः, (मया अन्नम्भट्टेन) तर्कसङ्ग्रहः = एतन्नामको ग्रन्थः, तर्क्यन्ते = प्रमितिविषयीक्रियन्त इति तर्काः द्रव्यादिसप्तपदार्थास्तेषां सङ्ग्रहः = संक्षेपेणोद्देशलक्षणपरीक्षाः, ता यस्मिन् ग्रन्थे वर्तन्ते स ग्रन्थः, एतादृशस्तर्कसङ्ग्रहाख्यो ग्रन्थः क्रियते = विरच्यत इत्यर्थः ।

तत्रोद्देशो नाम नाममात्रेण वस्तुसङ्कीर्तनम्, यथा द्रव्यं गुण इत्यादि । असाधारणधर्मो लक्षणम्, यथा गन्धवत्त्वं पृथिव्या लक्षणम् । लक्षितस्य लक्षणं सम्भवति न वेति परीक्षणं परीक्षा । तथा चोद्देशलक्षणपरीक्षाणामुल्लेखनेन ज्ञायते यत् पदार्थतत्त्वज्ञानमितरभेदानुमित्या जायते, सा चानुमितिः 'पक्षसाध्यहेतुज्ञानसाध्या' इत्युद्देशस्य पक्षज्ञानम्, अर्थात् पदार्था द्रव्यादयः सप्त वर्तन्ते, द्रव्याणि पृथिव्यादीनि नव सन्ति, इत्यादिपक्षस्य ज्ञानमेव फलम्, लक्षणस्य इतरभेदज्ञानम्, इतरः = अन्यः, अयमस्माद् भिन्नः, यथा पृथिवी जलाद् भिन्न इत्याकारकं भेदज्ञानं लक्षणेन जायते । एतदेव लक्षणस्य फलम्, परीक्षाया लक्षणे दोषाणां परिहारः फलमिति ।

एवञ्च 'बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः' इति वाक्येन तर्कसङ्ग्रहग्रन्थस्यानुबन्धचतुष्टयं प्रदर्शितं ग्रन्थकृताऽन्नम्भट्टेन । तत्रानुबन्धत्वं नाम ग्रन्थाध्ययनप्रवृत्तिप्रयोजकज्ञानविषयत्वम् । यथोक्तम्–

**सम्बन्धश्चाधिकारी च विषयश्च प्रयोजनम् ।**
**विनानुबन्धं ग्रन्थादौ मङ्गलं नैव शस्यते । इति ।**

तत्र ग्रन्थारम्भप्रवृत्तिप्रयोजकं ज्ञानं 'तर्कसङ्ग्रहो मदिष्टसाधनम्' इत्याकारकम् । तद्विषयाः सम्बन्धाधिकारिविषयप्रयोजनानि, अथ च पदार्थतत्त्वज्ञानं प्रयोजनमथवा तत्त्वज्ञानपुरस्सरं मोक्षः प्रयोजनं तच्च 'सुखबोधाय' इति पदेन सङ्केतितम् । द्रव्यादिपदार्था अस्य ग्रन्थस्य प्रतिपाद्या विषयाः, ते च तर्क्यन्ते = प्रमितिविषयीक्रियन्त इति तर्काः द्रव्यादिपदार्थास्तेषां सङ्ग्रह इति व्युत्पत्त्या 'तर्कसङ्ग्रहः' इति पदेन ते पदार्थाः सूचिताः सन्ति । एतद्ग्रन्थोक्तपदार्थतत्त्वग्रहणधारणसमर्थो बालोऽधिकारी । स च बाल इति पदेन सूचितः । बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः इति वाक्येन विषयग्रन्थयोः प्रतिपाद्यप्रतिपादकभावो दर्शितः ।

## पदार्थविभागः

**मूलम्– द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः ।**

**व्याख्या-** द्रव्याणि च गुणाश्च कर्माणि च सामान्यञ्च विशेषाश्च समवायश्च अभावश्चेति द्वन्द्वसमासे कृते द्रव्यगुणकर्मसामान्यविशेषसमवायाभावा इति समस्तं पदसमूहात्मकं पदार्थानां विभाजकं वाक्यमुपपन्नं भवति । तथा च द्रव्याणि, गुणाः, कर्माणि, सामान्यम्, विशेषाः, समवायः, अभावश्चेति सप्तपदार्थाः न्यायमतेन वैशेषिकमतेन च स्वीकृताः सन्तीति निश्चीयते । तत्र सङ्ख्यावाचकं सप्तपदञ्च यत्र यत्र पदार्थत्वं तत्र तत्र द्रव्याद्यन्यतमत्वमिति व्याप्तिलाभार्थकम् । उक्तञ्च न्यायबोधिन्याम्–**तत्र सप्तग्रहणं पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्याप्तिलाभाय** इति ।

वैशेषिकाः पदजन्यप्रतीतिविषयत्वं पदार्थत्वमिति पदार्थस्य लक्षणं निर्दिष्टवन्तः । इह जगति यानि वस्तूनि येन केनापि नाम्ना व्यवह्रियन्ते तानि सर्वाण्यपि पदार्थत्वेनाभिधीयन्ते ।

तत्र केचन भावाभावरूपेण पदार्थान् विभजन्ते । एवं सति पदार्थो द्विविधो भवति । भावपदार्थः सत्तावान् भावभिन्नोऽभावात्मकः पदार्थ इति पदार्थस्य विभागः । भावरूपेण वैशेषिकसूत्रे द्रव्यादीन् षट्पदार्थानुद्दिश्य तस्य निरूपणं विहितमस्ति । तदुत्तरवर्तिभिराचार्यैः वैशेषिकदर्शनेऽभावाख्यः सप्तमः पदार्थोऽपि प्रतिपादितः । अतो मूले द्रव्यगुणेत्यादिना त एव पदार्था उद्दिष्टाः । तत्राभावस्य प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावभेदेन चतुर्विधत्वं वर्ण्यते ।

## द्रव्यपदार्थविभागः

**मूलम्– तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।**

**व्याख्या-** उपर्युक्तेषु सप्तपदार्थेषु द्रव्यं गुणकर्मणामाश्रयरूपेण प्रसिद्धम् । अतस्तस्य द्रव्यस्य प्रथमत उल्लेखो विहितः । **क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम् (वै.सू. १।१।१५)** इति द्रव्यस्य लक्षणं कणादेन सूत्रे निर्दिष्टम् । कर्माश्रयो गुणाश्रयः समवायिकारणं वा द्रव्यं वर्तते । अर्थात् यस्मिन् पदार्थे समवायेन गुणः कर्म वा तिष्ठति यच्च भावकार्यमात्रस्य समवायिकारणं भवति तद्

द्रव्यम् । तानि च द्रव्याणि नव एव सन्ति- पृथिवी, आपः, तेजः, वायुः, आकाशम्, कालः, दिक्, आत्मा, मनश्चेति मूले पृथिव्यप्तेजो ... इत्यादिपदेन दर्शितानि । यद्यपि "तमः खलु चलं नीलं परापरविभागवत्" इत्यनेन मीमांसकाः तमसो दशमद्रव्यत्वं स्वीकुर्वन्ति । किन्तु वैशेषिकमते तमो न पृथग् द्रव्यं भवितुं शक्नोति तस्याभावेनैव गतार्थत्वात् ।

वस्तुतस्तु तमः तेजसोऽभाव एव वर्तते । 'तमः खलु चलम्' इति यदुच्यते तत्र रूपवत्ताप्रतीतिस्तु भ्रमरूपेति निरूपितमस्ति न्यायबोधिन्याम् । न च तमसोऽभाव एव तेज इति कथं न स्वीक्रियत इति वाच्यम्, सर्वानुभवसिद्धस्य उष्णस्पर्शस्याश्रयद्रव्यस्यापलपितुमशक्यत्वात् । मूले द्रव्याणि नव एवेति कथनेन अन्ययोगव्यवच्छेदो विहितो ग्रन्थकृता । यानि कानि च द्रव्याणि लोके वर्तन्ते तानि सर्वाण्यपि पृथिव्यादिनवद्रव्येषु अन्तर्भवन्ति न ततोऽधिकानि न ततो न्यूनानीत्यभिप्रायः ।

यस्मिन् द्रव्ये कर्म विद्यते तद् मूर्तं भवति । अर्थाद् यस्य द्रव्यस्य परिमाणं परिच्छिन्नं भवति तद् द्रव्यं मूर्तम् । मूर्तभिन्नं द्रव्यं विभुरुच्यते । सर्वमूर्तद्रव्येण सह यस्य संयोगो भवति तत् सर्वमूर्तद्रव्यसंयोगि विभु द्रव्यम् । आकाशकालदिगात्मानो विभुद्रव्याणि सन्ति । एतदतिरिक्तं सर्वं द्रव्यं मूर्तमेव ।

यथोक्तं सूत्रे- **पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि** (वै.सू. १।१।५) । तत्र नवद्रव्येषु नित्यानित्यद्रव्याणि यथाक्रमं निर्दिश्यन्ते- पृथिवीजलतेजोवायुद्रव्याणि नित्यानित्यानि च सन्ति । भूतचतुष्टयस्य परमाणवस्तथैव आकाशकालदिगात्ममनांसि च नित्यानि एव ।

## गुणपदार्थविभागः

**मूलम्–रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्द-बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः ।**

**व्याख्या-** द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं गुणस्य लक्षणम् । **द्रव्याश्रयगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्** (वै.सू. १।१।१६) । यः पदार्थो न द्रव्यं न वा कर्म परन्तु सामान्यवान् वर्तते स एव पदार्थो गुणः । गुणत्वाभिसम्बन्धाद् वा गुण इत्यभिधीयते । सामान्यं केवलं द्रव्यगुणकर्मसु तिष्ठति । अतो यः सामान्यवान् पदार्थः द्रव्यकर्मभ्यां भिन्नः स एव गुणः । स च गुणो द्रव्याश्रितः असमवायिकारणस्वरूपश्चास्ति ।

अस्मिन् वैशेषिकदर्शने रूपम्, रसः, गन्धः, स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, गुरुत्वम्, द्रवत्वम्, स्नेहः, शब्दः, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारश्चेति गुणानां चतुर्विंशतिप्रकाराः परिगणिताः सन्ति । यद्यपि कणादसूत्रे तु रूपरसादयः सप्तदशसङ्ख्यका गुणा साक्षादुक्ताः । परन्त्वनन्तरकालिकैः तत्र गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्माधर्म-शब्दाख्यान् गुणान् संयोज्य चतुर्विंशतिप्रकाराः परिगणिताः । त एव मूले दर्शिताः ।

## कर्मपदार्थविभागः

**मूलम्– उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।**

**व्याख्या-** गुणविभागानन्तरं क्रमप्राप्तः कर्मविभागप्रकारः प्रदर्श्यते । पदार्थानामुद्देशप्रकरणं प्रचलद् वर्तते । अतः कर्मणां विभागपूर्वकमुद्देशमात्रमत्र विहितम् । पश्चाद् एतेषां लक्षणं विधास्यति ग्रन्थकारः । एवं सत्यपि कर्मणो लक्षणमपि बालानां सौकर्याय अत्र प्रदर्श्यते । संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म इति । कर्मणो लक्षणमित्थमाह कणादः- **एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम् (वै.सू. १।१।१७)** । संयोगभिन्नं संयोगस्य असमवायिकारणं कर्म कर्मत्वसम्बन्धाद् इति वा कर्म इत्युक्तं प्रशस्तपादभाष्ये । चलनात्मकं कर्म इति पश्चादुच्यते । कर्म द्रव्यमात्रे तिष्ठति । सम्प्रति यथाक्रमं उत्क्षेपणम् अपक्षेपणम् आकुञ्चनं प्रसारणं गमनञ्चेति भेदेन कर्म पञ्चविधं मूलपङ्क्तेस्तात्पर्यम् । न वास्मिन् सन्दर्भे “कर्तुरीप्सिततमं कर्म” इति सूत्रेण निर्दिष्टं न वा वेदान्तदर्शनोक्तं नित्यनैमित्तिकादिकं कर्म अवधेयम् । अत्र क्रियामात्रस्य कर्मत्वमुच्यते ।

१. द्रव्यस्य ऊर्ध्वदेशेन संयोगस्य कारणं यत् कर्म भवति तदुत्क्षेपणम् ।

२. द्रव्यस्य अधोदेशेन संयोगस्य कारणं यत् कर्म भवति तदपक्षेपणम् ।

३. द्रव्यस्य सन्निकृष्टसंयोगस्य कारणं यत् कर्म तदाकुञ्चनम् ।

४. द्रव्यस्य विप्रकृष्टसंयोगस्य कारणं यत् कर्म तत् प्रसारणम् ।

५. अनियतदिग्देशसंयोगजनकं कर्म गमनमस्ति ।

उपर्युक्तमुत्क्षेपणादिकं नियतदिग्देशसंयोगजनकं कर्म अस्ति । परन्तु गमने तु तादृशो नियमो नास्ति । तत्तु अनिर्दिष्टदिशि स्थितेन देशेन सह द्रव्यस्य संयोगे कारणं भवति । उत्क्षेपणादिकं कर्म तु नियमेन नियतासु ऊर्ध्वादिषु दिक्षु स्थितेन देशेन सह द्रव्यस्य संयोगे कारणं भवति । भ्रमणरेचनादीनां तदतिरिक्तानां कर्मणां गमनात्मके कर्मण्येवान्तर्भावात् पञ्च कर्माणीत्युक्तम् ।

## सामान्यपदार्थविभागः

**मूलम्– परमपरं चेति द्विविधं सामान्यम् ।**

**व्याख्या-** नित्यमेकमनेकानुगतं सामान्यं भवति । अतो नित्यत्वे सति अनेकसमवेतत्वं सामान्यस्य लक्षणम् । यथा 'अयं गौः' 'अयं गौः' इति अनुगतप्रत्ययस्य कारणं गोत्वादिधर्मः सामान्यमिति कथ्यते । यथोक्तं केशवमिश्रेण–**अनुवृत्तिप्रत्ययहेतुः सामान्यम्** इति । तच्च द्रव्यादित्रयवृत्ति, नित्यमेकमनेकानुगतञ्च । सामान्यं छिन्नास्वप्यच्छिन्नमस्ति । अतस्तन्नित्यमुक्तं वैशेषिकैः । तच्च भिन्नास्वपि व्यक्तिष्वभिन्नमेकमस्ति ।

यदेकाधिकेष्वपि वस्तुषु युगपद् वर्तते तद् अनेकानुगतमिति कथ्यते । अनेकेषु समवेतमित्यर्थः । अर्थात् समवायसम्बन्धेन वर्तमानम् । तत् परापरभेदाद् द्विविधमस्ति सामान्यं स्वाश्रये समवायेन सम्बन्धेन तिष्ठति । तत् परापरभेदाद् द्विविधमस्तीति मूले प्रदर्शितम् । ययोः सामान्ययोः क्वचिदपि सामानाधिकरण्यं भवति तयोरेव परापरविचारः प्रसरति । अधिकदेशवृत्तित्वं परत्वम्, न्यूनदेशवृत्तित्वमपरत्वमिति च परापरविभागो बोद्धव्यो भवति । यथा द्रव्यगुणकर्मसु त्रिषु विद्यमानत्वादधिकदेशवृत्तित्वाद् वा सत्तायाः परत्वम् । सत्तापेक्षया न्यूनदेशवृत्तित्वाद् द्रव्यत्वादेरपरत्वम् ।

क्वचित् परापरमिति तृतीयप्रकारकं सामान्यमुक्तमस्ति । यथा द्रव्यत्वादेः पृथिवीत्वादेरपेक्षया अधिकदेशवृत्तित्वम्, सत्तापेक्षया तस्यैव न्यूनदेशवृत्तित्वम् । अतश्चोक्तं विश्वनाथेन– "धर्मद्वयसमावेशाद् उभयमविरुद्धम्" इति । सामान्ये सामान्यं न कदापि तिष्ठत्यनवस्थाप्रसङ्गात् । अर्थाद् द्रव्यत्वं सामान्यम्, तत्र द्रव्यत्वे द्रव्यत्वत्वं न स्यातुमर्हति । तथैवान्यत्रापि बोध्यम् ।

## विशेषपदार्थविभागः

**मूलम्– नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।**

**व्याख्या-** अत्र नित्यद्रव्यपदेन पृथिवीजलतेजोवायूनां परमाणवः, आकाशकालदिगात्ममनांसि चेति द्रव्याणि गृह्यन्ते । तेषु वृत्तयः = वर्तमानाः, सन्तो ये व्यावर्तकाः =भेदकास्ते विशेषाः, विशेषपदवाच्या इत्यर्थः । ते चानन्ताः = सङ्ख्यातुमशक्याः, नित्यद्रव्याणामनन्तत्वादित्यभिप्रायः । यतो हि सावयवद्रव्येभ्यः सावयवद्रव्याणि अवयवादिभेदेन परस्परं भिद्यन्ते । यथा घटः तदवयवकपालभेदाद् अन्यस्माद् घटाद् भिद्यते । परन्तु निरवयवेभ्यो नित्येभ्यो द्रव्येभ्यो निरवयवं नित्यं द्रव्यं कथं भिद्यते ? इति प्रश्ने एवमुच्यते–विशेषपदार्थभेदेन निरवयवं नित्यं द्रव्यमन्यस्माद् नित्यद्रव्याद् भिद्यते । विशेषा नित्यद्रव्येषु तिष्ठन्ति । पृथिवीजलतेजोवायूनां परमाणवो नित्याः सन्ति । आकाशादिपञ्चकञ्च नित्यमस्ति ।

अतः पृथिव्यादीनां परमाणुषु आकाशादिपञ्चद्रव्येषु विशेषाः तिष्ठन्ति । अतश्च विशेषाः अनन्ताः सन्ति । स च विशेषो भेदबुद्धेर्जनकोऽस्ति । संहारकाले पार्थिवजलीयतैजसवायवीयपरमाणवः पृथिवीत्वादिभेदेन परस्परं भिद्यन्ते, परन्तु समानजातीयानां पार्थिवादिपरमाणूनां परस्परभेदसाधकः न कश्चिद् धर्मो भवति । अतस्तद्भेदावबोधार्थं पार्थिवादिपरमाणुषु तद्व्यावर्तकधर्मो विशेषाख्यः स्वीक्रियते । शब्दसमवायिकारणतावच्छेदकतया चाकाशे विशेषाख्यः पदार्थः स्वीक्रियते । तथा च संहारकाले गुणानां लोपे सति दिक्कालयोर्भेदपरिबोधनाय तयोरपि विशेषः स्वीकृतोऽस्ति । अपवर्गेऽपि आत्मनां परस्परभेदसिद्ध्यर्थं चात्मस्वपि विशेषपदार्थ उररीकृतोऽस्ति । यथाह कणादः- **अन्यत्रान्त्येभ्यो विशेषेभ्यः (वै.सू. १।१।६)** इति ।

## समवायपदार्थविभागः

**मूलम्–समवायस्त्वेक एव ।**

**व्याख्या-** यः सम्बन्धो नित्यः स समवायः । स च एक एव । कणादेन उक्तं यत् **इहेदमिति यतः कार्यकारणयोः स समवायः (वै.सू. ७।२।२६)** इति । एवमेव “नित्यसम्बन्धः समवायः” इति पश्चाद्

वक्ष्यते । स च सम्बन्धः अयुतसिद्धयोः पदार्थयोर्भवति । यौ विषयौ मिश्रितौ सिद्धौ स्तः तावयुतसिद्धौ । यथा तन्तुपटौ मिलितौ स्तः । उभावपि सिद्धौ स्तः । एतच्च पश्चाद् वक्ष्यते "ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तौ अयुतसिद्धौ" इति । अमिश्रणार्थकस्य युधातोः क्तप्रत्यये निष्पन्नः युतशब्दः असम्बद्धार्थस्य वाचकोऽस्ति । असम्बद्धसिद्धो यो न भवति सोऽयुतसिद्धः । अयुतसिद्धौ चावयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति पञ्च सन्ति । यथोक्तं विश्वनाथेन–

**घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।**
**तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ।**

तस्मादयुतसिद्धयोः सम्बन्धः समवायो निगद्यते । यः समवायेन विद्यते स समवेत इत्युच्यते । यस्मिन् समवायेन विद्यते स समवायी निगद्यते ।

## अभावपदार्थविभागः

**मूलम्– अभावश्चतुर्विधः–प्रागभावः, प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्च ।**

**व्याख्या-** न भाव : = अभावः भावभिन्नपदार्थरूपेणाभावो ज्ञायते । तस्य लक्षणं तु प्रतियोगिज्ञानाधीनज्ञानविषयत्वं वर्तते । यस्य अभावः स प्रतियोगी भवति । यथा 'भूतले घटाभावोऽस्ति' इत्यत्र भूतले घटाभावः स्वरूपेण तिष्ठति । घटश्च घटाभावस्य प्रतियोगी भवति । अतोऽयमभावो 'घटो नास्ति' 'पटो नास्ति' इत्यादिनिषेधज्ञानस्य विषयो भवति । स चाभावो संसर्गाभावान्योन्याभावभेदेन द्विविधो दर्शितो वैशेषिकदर्शने । संसर्गाभावोऽपि त्रिविधः-प्रागभावः, प्रध्वंसाभावोऽत्यन्ताभावश्चेति तर्कभाषायामुक्तम् । आहत्य अभावाश्चत्वारो भवन्ति ।

१. "अनादिः सान्तः प्रागभावः ।" कार्यस्य उत्पत्तेः प्राग् योऽभावो भवति स प्रागभावः । यथा घटस्य उत्पत्तेः पूर्वं तस्य घटस्याभावः प्रागभावः । तस्य च अभावस्य उत्पत्तिः नास्ति किन्तु अन्तः अस्ति । घटोत्पत्तिपूर्वम् 'इह कपाले घटो भविष्यति' इति या प्रतीतिर्जायते तया प्रतीत्या विषयीक्रियमाणोऽभावः प्रागभावो भवति । अयं प्रतियोगिनो जनको भवति ।

२. “सादिः अनन्तः प्रध्वंसः” । कार्यविनाशानन्तरं तस्य कार्यस्य योऽभावस्तदधिकरणे यः प्रतीयते स ध्वंसाभावो निगद्यते । यथा मुद्गरप्रहारेण घटनाशानन्तरं तस्य घटस्य योऽभावो भवति स ध्वंसाभावः । अस्योत्पत्तिरस्ति परन्त्वन्तो नास्ति । अयमभावः ‘घटो ध्वस्तः’ इति प्रतीत्या विषयीभूतो भवति । अतः प्रतियोगिजन्योऽयमभावोऽस्तीति निश्चीयते ।

३. “त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः ।” योऽभावः त्रैकालिको विद्यते सोऽत्यन्ताभावः कथ्यते । अतोऽयमभावो नित्योऽस्ति । त्रिषु भूतभविष्यद्वर्तमानकालेष्वपि विद्यमानोऽभावः अत्यन्ताभाव एव । अपि च यस्मिन् कस्मिन्नपि स्थले भूतलादौ घटादेरवर्तमानत्ववेलायाम् ‘इह भूतले घटो नास्ति’ इत्याकारिका प्रतीतिर्भवति । तया प्रतीत्या विषयीक्रियमाणो योऽभावः सोऽत्यन्ताभावनाम्ना व्यवह्रियते ।

४. “तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभाव” वस्तुनः पारस्परिकभेदोऽन्योन्याभाव इति कथ्यते । तादात्म्यसम्बन्धेन पदार्थो नेत्युच्यते चेत् तस्य अभावस्य यः प्रतियोगी, तादृशप्रतियोगिनि विद्यमाना प्रतियोगिता तादात्म्यसम्बन्धेनावच्छिन्ना भवति । अर्थाद् अन्योन्याभावीयप्रतियोगितावच्छेदकसम्बन्धस्तादात्म्यमेव । यथा– घटः पटो न इत्युच्यते चेद् घटे पटभेदः स्वरूपेण वर्तत इत्येव तात्पर्यं भवति । अतोऽयमभावोऽन्योन्याभावनाम्ना व्यवह्रियते । यतो हि अन्योन्याभावीया प्रतियोगिता नियतसम्बन्धावच्छिन्ना भवति । स च सम्बन्धस्तादात्म्यमेव, न तु तदतिरिक्तः । अतोऽन्योन्याभावीयप्रतियोगितावच्छेदकसम्बन्धस्तादात्म्यम् । तेन सम्बन्धेन अवच्छिन्ना या प्रतियोगिता, तन्निरूपको योऽभावः, स एवान्योन्याभाव इति नैयायिकाः कथयन्ति ।

## सभेदं पृथिवीनिरूपणम्

**मूलम्– तत्र गन्धवती पृथिवी । सा द्विविधा नित्याऽनित्या च । नित्या परमाणुरूपा । अनित्या कार्यरूपा । पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणम् । तच्च नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।**

**व्याख्या-** नवद्रव्येषु पृथिवी आद्यं द्रव्यम् । समवायेन गन्धवत्त्वं तस्या लक्षणम् । अत्र लक्षणबोधकं दलं गन्धवती, लक्ष्यबोधकञ्च पृथिवीति । तथा च लक्ष्या पृथिवी । लक्ष्यता पृथिव्याम् । लक्ष्यतावच्छेदकं पृथिवीत्वम् । यस्य लक्षणमुच्यते तल्लक्ष्यम् । यद्धर्मावच्छिन्नं लक्ष्यं स धर्मो लक्ष्यतावच्छेदकः ।

प्रकृतप्रसङ्गे पृथिवीनिष्ठा लक्ष्यता लक्ष्यतावच्छेदकपृथिवीत्वावच्छिन्ना । यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति नियमात् । तथा च लक्ष्यतावच्छेदकपृथिवीत्वावच्छिन्नायां पृथिव्यां गन्धवत्त्वरूपलक्षणस्य सत्त्वाद् भवति लक्ष्ये लक्षणसमन्वयः । पृथिव्यां विद्यमानं पृथिवीत्वं जातिः । गन्धाख्यो विशेषगुणो यस्मिन् द्रव्ये समवायेन वर्तते, सा पृथिवीति ज्ञायते । अतो गन्धसमवायिकारणत्वं पृथिवीत्वमिति पृथिव्या लक्षणं करणीयम् ।

अत्र गन्धवत्त्वं नाम गन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वम् । गन्ध आधेयः । पृथिवी अधिकरणम् । गन्धनिष्ठाधेयता । पृथिवीनिष्ठाधिकरणता । आधेयताधिकरणतयोर्निरूप्यनिरूपकाभावसम्बन्धः । तथा च पृथिव्यां गन्धो वर्तत इत्याकारकप्रतीतिसिद्धा गन्धनिष्ठा या आधेयता, तन्निरूपिता पृथिवीनिष्ठा या अधिकरणता तदाश्रयत्वं पृथिव्यां वर्तत इति रीत्या लक्ष्ये लक्षणसमन्वयो भवति । अत्र कालेऽतिव्याप्तिवारणाय गन्धनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वं निवेशनीयम् । जलादावतिव्याप्तिवारणय आधेयतायां गन्धत्वावच्छिन्नत्वं निवेशनीयम् । जलादिषु उपलब्धगन्धो न तु जलादीनाम् । अपि तु पृथिव्यांशस्यैव संसर्गवशात् तत्र गन्धप्रतीतिः । तथा च समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं पृथिवीत्वमिति पृथिव्या लक्षणं सञ्जातम् ।

शरीरञ्च इन्द्रियञ्च विषयश्चेति शरीरेन्द्रियविषयास्तेषां भेदेन सा पृथिवी त्रेधा । शरीरं मनुष्यादिजन्तूनां प्रसिद्धम् । इन्द्रियं घ्राणम्, नासाग्रे वर्तमानं गन्धग्रहणे साधनभूतञ्च वर्तते । विषया मृत्पाषाणादयः । कार्यरूपा सावयवा पृथिवी अनित्या । किन्तु परमाणुरूपा निरयवा पृथिवी नित्यास्ति । रूपं रसः गन्धः स्पर्शश्चेति पाकजा विशेषगुणाः पृथिव्यां समवायेन तिष्ठन्ति गुणगुणिनोः समवायात् । उक्तञ्च सूत्रकारेण- **रूपरसगन्धस्पर्शवती पृथिवी** (वै.सू. २।२।१) इति ।

पाको नाम विलक्षणतेजःसंयोगः । तेन संयोगेन पृथिव्यां रूपरसादीनां परिवर्तनं जायते । अतः पृथिव्यां विद्यमाना रूपरसादिगुणा अनित्याः पाकजाश्च भवन्ति । अथ च सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, गुरुत्वम्, द्रवत्वम्, संस्कारश्चेति दश सामान्यगुणाः पृथिव्यां सन्ति । आहत्य चतुर्दशगुणाः पृथिव्यां तिष्ठन्ति ।

## सभेदमपां लक्षणनिरूपणम्

**मूलम्– शीतस्पर्शवत्य आपः । ताश्च द्विविधा नित्या अनित्याश्चेति । नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । ताः पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।**

**व्याख्या-** शीतस्पर्शवत्त्वमपां लक्षणम् । यस्मिन् द्रव्ये शीतस्पर्शाख्यो गुणः समवायेन तिष्ठति तज्जलमिति । "अप्त्वसम्बन्धादापः" इत्यपां लक्षणं प्रशस्तपादभाष्ये निर्दिष्टम् । शरीरम्, इन्द्रियं विषयश्चेति भेदेन आपस्त्रेधा विभक्ताः सन्ति । जलीयं शरीरं वरुणलोके प्रसिद्धम् । इन्द्रियं रसनम्, तच्च जिह्वायां वर्तते, रसग्रहणे साधनभूतञ्चास्ति । विषयः सरित्समुद्रादिर्वर्तते । पृथिवीवत् कार्यरूपं सावयवं जलमनित्यम् । जलपरमाणुर्नित्यः । यथोक्तं सूत्रे- **रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः (वै.सू. २।१।२)** इति । अत्रापि रूपरसादयो नित्या अनित्याश्च सन्ति । पृथिवीवद् जलेऽपि चतुर्दश गुणाः सन्ति । पृथिव्यां यत्र गन्धो विशेषः, जले तु स्नेहो विशेषः इति । अतः स्नेहसमवायिकारणं जलमित्यपि लक्षणं भवितुमर्हति ।

## सभेदं तेजोनिरूपणम्

**मूलम्– उष्णस्पर्शवत् तेजः । तच्च द्विविधं नित्यमनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधः । भौमदिव्यौदर्याकरजभेदात् । भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि ।**

**व्याख्या-** उष्णस्पर्शवत्त्वं तेजसो लक्षणमस्ति । अत्रोष्णपदं स्पर्शस्य विशेषणम् । अर्थाद् यस्मिन् द्रव्ये उष्णस्पर्शाख्यो गुणस्तिष्ठति तत् तेज इति । **तेजस्त्वजातिमत्तेजः** इति भाष्यकारः प्रशस्तपादाचार्य आह ।

शरीरेन्द्रियविषयभेदेन तेजस्त्रेधा विभक्तम् । तैजसम् शरीरमादित्यलोके । तैजसमिन्द्रियं चक्षुः, कृष्णताराग्रे वर्तते तद् रूपग्रहणे साधनं भवति । विषयोऽपि भौमदिव्यौदर्याकरजभेदात् चतुर्विधोऽस्ति । भौमं तेजः वह्निखद्योतादि, दिव्यं सूर्यविद्युदादि, औदर्यं तेजो भुक्तस्य अन्नादे रसादिरूपेण

परिणामहेतुर्भवति । आकराज्जातम्=आकरजं तेजः सुवर्णरजतादि । कार्यरूपं तेजः अनित्यम् । तेजःपरमाणुर्नित्योऽस्ति । तेजसि रूपं स्पर्शश्चेति विशेषगुणद्वयं वर्तते । सङ्ख्या, परिमाणं पृथक्त्वम्, संयोगः, विभागः, परत्वम् अपरत्वम्, द्रवत्वं संस्कारश्चेति नव सामान्यगुणाश्च तेजसि वर्तन्ते । आहत्यैकादश गुणास्तेजसि तिष्ठन्ति ।

## सभेदं वायुनिरूपणम्

**मूलम्– रूपरहितः स्पर्शवान् वायुः । स द्विविधो नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तःसंचारी वायुः प्राणः । स च एकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते ।**

**व्याख्या–** रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणम् । अत्र स्पर्शवत्त्वमात्रोक्तौ पृथिव्यादौ भवत्यतिव्याप्तिः । अतस्तद्वारणाय रूपरहितत्वदलं निवेशनीयम् । तन्निवेशे च पृथिव्यादेः स्पर्शवत्त्वस्य सत्त्वेऽपि रूपरहितत्वं नास्तीति नातिव्याप्तिः । तथैव रूपरहितत्वमात्रं यदि लक्षणं क्रियते तदा तादृशरूपरहितत्वमाकाशादावपि वर्तत इति भवति तत्रातिव्याप्तिः । अतस्तदर्थं स्पर्शवत्त्वमिति पदं निवेश्यते । यस्य द्रव्यस्य रूपं न विद्यते किन्तु यद् द्रव्यं स्पर्शि वर्तते तद् द्रव्यं वायुर्निगद्यते । वायुत्वाभिसम्बन्धाद् वा वायुः । स च वायुः अनुष्णाशीतस्पर्शादिभिरनुमेयो भवति । शरीरम् इन्द्रियं विषयश्चेति भेदेन वायुस्त्रिविधः परिकीर्तितः ।

वायवीयं शरीरं वायुलोके प्रसिद्धम् । इन्द्रियं त्वक् सर्वशरीरे वर्तते, स्पर्शग्रहणे साधनं च भवति तत् । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तः सञ्चारी वायुः प्राणाख्यः । स च उपाधिभेदात् प्राणः, अपानः व्यानः, उदानः, समानश्चेति पञ्चविधो वर्तते । कार्यरूपः सावयवो वायुरनित्यः । परमाणुरूपो वायुश्च नित्यः । वायौ स्पर्श इति एको विशेषो गुणः तथा सङ्ख्या,परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, वेगः (संस्कारः) चेति अष्टौ सामान्यगुणाश्च तिष्ठन्ति । स च द्विविधो नित्याऽनित्यभेदात् । नित्यो निरवयवः परमाणुरूपो वायुः, अनित्यः कार्यरूप एव । यथोक्तं सूत्रे - **स्पर्शवान् वायुः (वै.सू. २।१।४)** इति ।

## आकाशनिरूपणम्

**मूलम्– शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यञ्च ।**

**व्याख्या-** शब्दाश्रयत्वेन आकाशं प्रसिद्धम् । शब्दो गुणो यस्य तत्तथेति बहुव्रीहिसमासे सति शब्दगुणकमिति शब्दो निष्पद्यते । तथा च यस्मिन् द्रव्ये शब्दाख्यो विशेषगुणः समवायेन तिष्ठति तद् द्रव्यम् आकाशम् । अत उक्तं शब्दगुणकमिति । शब्दो गुणो यस्य तत् शब्दगुणकम् । तच्च आकाशं नित्यं विभुपरिमाणयुक्तमेकञ्चास्ति । सृष्टिविनाशरहितत्वाद् निरवयवत्वाच्च तन्नित्यम् । विभु नाम सर्वमूर्तद्रव्यसंयोगीत्यर्थः । परिच्छिन्नपरिमाणवत् क्रियावद् वा द्रव्यं मूर्तमिति कथ्यते । आकाशस्य परिमाणस्य इयत्ता निर्धारयितुमशक्या । तस्मात् तद् विभुपरिमाणवदमूर्तम् । विभुत्वादेव आकाशं सर्वव्यापीति ज्ञायते । आकाशस्य भेदे प्रमाणं नास्ति अतस्तदेकम् । यत्र यत्र तस्य भेदः प्रतीयते तत्र तत्र औपाधिक एव । आकाशे शब्दाख्यो विशेषो गुण एवं सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः विभागश्चेति पञ्च सामान्यगुणाः तिष्ठन्ति । शब्दाश्रयत्वेन परिशेषानुमानादाकाशस्य सिद्धिर्भवति । यथोक्तम् अत्र **परिशेषाल्लिङ्गमाकाशस्य (वै.सू. २।१।२७)** इति । लिङ्गमित्यस्याकाशसाधकं प्रमाणमिति तात्पर्यम् ।

## कालनिरूपणम्

**मूलम्– अतीतादिव्यवहारहेतुः कालः । स चैको विभुर्नित्यश्च ।**

**व्याख्या-** अतीत आदिर्यस्य स अतीतादिः । आदिपदेन भविष्यद्वर्तमानयोर्ग्रहणं विधीयते । अतीतादेर्व्यवहार अतीतादिव्यवहारः=ज्ञानजनकशब्दप्रयोगात्मकानुभवविशेषः । तथा च अतीतादिर्व्यवहारस्य यो हेतुर्भवति स अतीतादिव्यवहारहेतुः । अत्र व्यवहारस्तु ज्ञानजनकस्तादृशशब्दप्रयोग एव । तस्यासाधारणं कारणं काल एव । अत्र व्यवहारहेतुत्वमात्रं लक्षणं स्वीक्रियते चेद् घटादीनामपि व्यवहारहेतुत्वादलक्ष्ये घटादौ लक्षणगमनाद् भवत्यतिव्याप्तिः, अतस्तद्वारकमतीतादिपदम् । तन्निवेशे च घटादयो न अतीतादिव्यवहारहेतवो भवितुमर्हन्तीति नातिव्याप्तिप्रसङ्गः । तथैव व्यवहारस्य शब्दात्मकत्वात् तादृशातीतादिव्यवहारहेतुत्वं शब्दात्मकस्याकाशस्यापि वर्तत इति अलक्ष्ये शब्दात्मके आकाशे लक्षणगमनादतिव्याप्तिः । तदर्थमत्र हेतुपदस्य निमित्तकारणमित्यर्थो विधेयः । तथा सति आकाशस्य निमित्तहेतुत्वाभावान्नातिव्याप्तिः ।

कार्यमात्रं प्रति कालस्य साधारणकारणत्वाद् लक्षणस्थेनादिपदेन कण्ठताल्वाद्यविघातस्यापि ग्रहणसम्भवात् तत्र भवत्यतिव्याप्तिः। अतस्तदर्थं विभुपदं निवेशनीयम्। ततश्च विभुत्वे सति अतीतभविष्यादिव्यवहारसाधारणनिमित्तहेतुत्वं कालत्वमिति कालस्य निर्दुष्टं लक्षणम्। तथा च लोके क्षणलवनिमेषकाष्ठाकलामुहूर्तातीतवर्तमानभविष्यवत्सरमासादिनादीनां व्यवहाराणामसाधारणो हेतुः काल एव। वस्तुतः स चैकस्तथापि तस्योपाधिभेदादनेकत्वमनुभूयते। स च कालो नित्यः विभुपरिमाणविशिष्टश्चास्ति। तस्मिन् सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेति पञ्च सामान्यगुणाः तिष्ठन्ति। दिक्कृतयोः परत्वापरत्वयोः विपरीतधर्महेतुत्वेन कालस्य सिद्धिर्जायते।

कालो जगताम् आधारः कार्यमात्रस्य च निमित्तकारणम्। एतदाह सूत्रकारः कणादः- **अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि** (वै.सू. २।२।६) इति।

## दिङ्निरूपणम्

**मूलम्– प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च।**

**व्याख्या-** प्राची आदिर्यस्य सः प्राच्यादिः, अत्र आदिपदात् अवाची, प्रतीची, उदीची इत्यादीनां ग्रहणं विधेयम्। प्राच्यादेर्यो व्यवहारः सः प्राच्यादिव्यवहारः। तादृशव्यवहारासाधारणहेतुर्दिगस्ति। अर्थात् लोके एषा प्राची, एषा प्रतीची, एषा उदीची एषा अवाची चेत्यादीनां शब्दानां प्रयोगात्मकव्यवहारं प्रति असाधारणहेतुर्दिगस्ति। हेतुर्दिगित्येवोच्यमाने परमाण्वादावतिव्याप्तिर्भवति। अतस्तद्वारणाय प्राच्यादिव्यवहारहेतुरिति।

आकाशादिवारणाय असाधारणहेतुरिति बोध्यम्। एतच्चोक्तवान् सूत्रकारः– **इत इदमिति यतस्तद्दिश्यं लिङ्गम्** (वै.सू. २।२।१०) इति। वस्तुतो दिगेका, तस्यापि सूर्यदेशसंयोगोपाधिभेदात् प्राच्यादयो भेदाः भवन्ति। दिग् उत्पत्तिविनाशरहिता नित्या विभ्वी चास्तीति नैयायिका वैशेषिकाश्च स्वीकुर्वन्ति। दिशि कालवत् सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेति पञ्च सामान्यगुणाः वर्तन्ते। कालकृतपरत्वापरत्वयोः विपरीतधर्महेतुत्वेन दिक् सिद्ध्यति। सा दिक् सकलकार्याणां कालवन्निमित्तकारणमस्ति। अतः सा कार्यमात्रं प्रति साधारणं कारणमुच्यते।

# सभेदमात्मनिरूपणम्

**मूलम्– ज्ञानाधिकरणमात्मा । स द्विविधो जीवात्मा परमात्मा चेति । तत्रेश्वरः सर्वज्ञः परमात्मा एक एव । जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।**

**व्याख्या-** ज्ञानानि यस्मिन्नधिकरणे समवायेन तिष्ठन्ति तदधिकरणमात्मा । अथवा ज्ञानसमवायिकारणमात्मा । भूतलादावतिव्याप्तिवारणाय ज्ञानेति पदम् । कालादावतिव्याप्तिवारणाय समवायेन इति पदं प्रदत्तम् । **"आत्मत्वाभिसम्बन्धादात्मा"** इति प्रशस्तपादभाष्ये उक्तम् । जीवात्मा परमात्मा चेति भेदाद् आत्मा द्विविधः । स चात्मा नित्यो विभुश्चास्ति । सुखदुःखादीनां वैचित्र्याद् जीवात्मा प्रतिशरीरं भिन्नः ।

तथा चाह प्रशस्तपादाचार्यः– **"वास्यादीनां करणानां कर्तृप्रयोज्यत्वदर्शनात्, शब्दादिषु प्रसिद्ध्या वा प्रसाधकोऽनुमीयते न शरीरेन्द्रियमनसाम्, अज्ञत्वात्, न शरीरस्य चैतन्यम् भूतकार्यत्वात् मृते चासम्भवात्, नेन्द्रियाणाम् करणत्वात् उपहतेषु विषयसान्निध्ये वानुस्मृतिदर्शनाच्च, नापि मनसः युगपदालोचनस्मृतिप्रसङ्गात् स्वयं करणान्तरानपेक्षित्वे करणभावाच्च, परिशेषादात्मकार्यत्वात्तेनात्मा समधिगम्यते"** इति ।

एतेन शरीरादिषु आत्मभ्रमो निवारितो भवति । तथा च सूत्रम् **प्राणापाननिमिषोन्मेषजीवनमनोगतीन्द्रियान्तरविकारसुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि (वै.सू. ३।२।४)** इति । सूत्रेणानेन प्राणापानादीनामात्मलिङ्गत्वं समुपपादितम् । जीवात्मनि सङ्ख्यादयः पञ्च सामान्यगुणाः तथा बुद्धिः, सुखम्, दुःखम् इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारश्चेति नव विशेषगुणाः तिष्ठन्ति । आहत्य चतुर्दशगुणा आत्मनि तिष्ठन्ति ।

परमात्मा ईश्वरस्तु सर्वज्ञ एक एवास्ति । अतो नित्यज्ञानवान् नित्येच्छावान् वा परमात्मा एक एवेति स्वीक्रियते नैयायिकैर्वैशेषिकैश्च । परमात्मनि सङ्ख्यादयः पञ्च सामान्यगुणाः तथैव बुद्धिः (नित्यं ज्ञानम्) इच्छा प्रयत्नश्चेति विशेषगुणाः तिष्ठन्ति । आहत्य अष्टौ गुणा ईश्वरे तिष्ठन्ति । तस्य सिद्धिरनुमानेन जायते । 'क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवत्' इत्यनुमानेन पृथिवी सकर्तृका इति सिद्ध्यति । ततश्च कः सः कर्ता इति प्रश्ने परिशेषानुमानात् ईश्वरस्य सिद्धिः क्रियते न्यायवैशेषिकैः ।

## सभेदं मनोनिरूपणम्

**मूलम्– सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च।**

**व्याख्या-** सुखं दुःखं ज्ञानम् इच्छा इत्याद्युपलब्धये यत् साधनं तद् इन्द्रियं मन इत्युच्यते। चक्षुरादीनि बहिरिन्द्रियाणि सन्ति। मनस्तु आन्तरमिन्द्रियम्। तथा च सुखाद्युपलब्धिसाधनत्वे सतीन्द्रियत्वं मनसो लक्षणम्। भवति हि लक्ष्यीभूते मनसि सुखाद्युपलब्धिसाधनत्वं मनस्त्वञ्चास्तीति लक्षणसमन्वयः।

आत्ममनःसंयोगादिवारणायेन्द्रियमिति दलम्। चक्षुरादिवारणाय सुखेति पदम्। तच्च प्रतिपुरुषं भिन्नम् अणुपरिमाणयुक्तं नित्यञ्चास्ति। एकदैव ज्ञानद्वयस्योपलब्धिर्न भवति, तेन च मनसः अणुपरिमाणत्वं सिद्धं भवति। यच्चोक्तं प्रशस्तपादभाष्ये **"सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनामभूत्वोत्पत्तिदर्शनात् करणान्तरमनुमीयते"** इति। प्रत्यात्मनियतत्वादनन्तमणुपरिमाणञ्च। एतदुक्तं सूत्रकारेण **आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम् इति** (वै.सू. ३।२।१)। ज्ञानरूपस्य कार्यस्योत्पत्तौ प्रथममात्मा मनसा संयुज्यते, मनः इन्द्रियेण संयुज्यते, इन्द्रियञ्चार्थेन संयुज्यते। तदनन्तरं यस्मिन् कस्मिन्नपि पुरुषे ज्ञानमुत्पद्यते। सुषुप्तिकाले अणुपरिमाणं मनः पुरीतन्नाडीं प्रविशति। तेन सुषुप्तौ आत्मा मनसा संयुक्तो न भवति। तथैव मन इन्द्रियेण सह संयुक्तं न भवति। तस्मात् कारणात् सुषुप्तौ ज्ञानं न उत्पद्यते। मनसि सङ्ख्या परिमाणं पृथक्त्वं संयोगः विभागः परत्वम् अपरत्वं संस्कारश्चेत्यष्टौ सामान्यगुणा वर्तन्ते।

कति च गुणाः कस्मिन् कस्मिन् द्रव्ये तिष्ठन्तीति परिचायकोऽयं श्लोकः–

**वायोर्नवैकादश तेजसो गुणाः**
**जलक्षितिप्राणभृतां चतुर्दश।**
**दिक्कालयोः पञ्च षडेव चाम्बरे**
**महेश्वरेऽष्टौ मनसस्तथैव च।**

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| समानतन्त्रत्वम् | = | समानरूपेण स्वीकृतसिद्धान्तत्वम् । यथा नैयायिका वैशेषिकाश्च वेदस्य पौरुषेयत्वम्, ईश्वरानुमेयत्वम्, मनसोऽणुत्वमित्यादीन् सिद्धान्तान् समानरूपेण स्वीकुर्वन्ति । अतस्तादृशानां विषयाणां न्यायवैशेषिकयोस्समानतन्त्रत्वमस्ति । |
| प्रारिप्सितस्य | = | प्रकर्षेण अभिलषितस्य । |
| विभुः | = | व्यापकम् / सर्वमूर्तद्रव्यसंयोगी । |
| मङ्गलम् | = | विघ्नविनाशकं ग्रन्थसमाप्तिकं वा इष्टवन्दनादिकम् । |
| इतरभेदज्ञानम् | = | 'अयमस्माद् भिन्नः' इत्याकारकं ज्ञानम् । |
| साधनम् | = | कारणम् । |
| उपलब्धिः | = | ज्ञानम् । |
| द्रव्यम् | = | गुणकर्मादीनामाश्रयः । |
| मूर्तः | = | परिच्छिन्नपरिणामवान् |
| तमः | = | तेजोऽभावः । |
| भूतचतुष्टयम् | = | पृथिवीजलतेजोवायवः । |
| अपवर्गः | = | मुक्तिः । |
| गुणः | = | द्रव्यकर्मभिन्नो द्रव्यमात्राश्रितः सामान्यवान् पदार्थः । |
| सत्ता | = | द्रव्यत्वादिजातिः । |
| परमाणुः | = | अन्तिमावयवः/ निरवयवोऽणुपरिमाणवान् । |
| उपलब्धिः | = | ज्ञानम् । |
| गन्धग्राहकम् | = | गन्धविषयकज्ञानजनकम् । |
| भौमम् | = | भूमौ भवम्, वह्न्यादिकम् । |
| लिङ्गम् | = | प्रमाणम् । |
| प्रत्यात्मनियतम् | = | आत्मनि आत्मनि प्रतीति प्रत्यात्मम्, प्रत्यात्मं नियतम् इति प्रत्यात्मनियतम् । प्रत्येकमात्मनि भिन्नरूपेण वर्तमानम् । |

# अभ्यासः

## १. अतिसंक्षिप्तमुत्तरं देयम्

(क) तर्कसङ्ग्रहग्रन्थस्य रचयिता कः ?

(ख) कति गुणाः ?

(ग) गन्धः कस्य द्रव्यस्य विशेषगुणः ?

(घ) अन्योन्याभावीया प्रतियोगिता केन सम्बन्धेन अवच्छिन्ना भवति ?

(ङ) पृथिव्यां कति गुणास्तिष्ठन्ति ?

(च) तैजसमिन्द्रियं किम् ?

(छ) वायुरूपं शरीरं कुत्रास्ति ?

(ज) आकाशं कतिविधम् ?

(झ) अतीतादिव्यवहारहेतुः कः ?

(ञ) सर्वज्ञः कः ?

## २. रिक्तस्थानं पूरयत

(क) पदार्थाः ... वर्तन्ते ।

(ख) रूपरहितत्वे सति ... लक्षणम् ।

(ग) स चैकोऽप्युपाधिभेदात् ... लभते ।

## ३. परस्परं मेलयत

| | |
|---|---|
| मङ्गलम् | अनुबन्धत्वम् |
| समवायः | पञ्च |
| सादिरनन्तः | त्रिविधम् |
| ग्रन्थाध्ययनप्रवृत्तिप्रयोजकज्ञानविषयत्वम् | एक एव |
| कर्माणि | प्रध्वंसः |

## ४. व्याख्यात्मकमुत्तरं देयम्

(क) अनुबन्धचतुष्टयनिदर्शनपूर्वकं तर्कसङ्ग्रहस्य मङ्गलपद्यं व्याख्यात ।

(ख) द्रव्यलक्षणं विलिख्य तद्भेदान् दर्शयत ।

(ग) सभेदं कर्मलक्षणं निर्दिशत ।

(घ) सभेदं सामान्यस्य लक्षणं प्रतिपादयत ।

(ङ) समवायस्य स्वरूपं प्रकाशयत ।

(च) कालं लक्षयित्वा तदुपाधिभेदान् स्पष्टीकुरुत ।

(छ) भेदनिदर्शनपूर्वकमपां लक्षणं निरूपयत ।

(ज) औपाधिकदिग्भेदं प्रदर्श्य दिग्लक्षणं स्पष्टं निरूपयत ।

(झ) मनसो लक्षणं विलिख्य तस्याणुत्वं विचारयत ।

## ५. वर्णनात्मकमुत्तरं दीयताम्

(क) सपदकृत्यं पृथिव्याः लक्षणं विमृशत ।

(ख) सपदकृत्यं तेजसो लक्षणं लिखत ।

(ग) सभेदं वायुलक्षणं वर्णयत ।

(घ) आकाशस्य लक्षणं सम्यग् व्याख्यात ।

(ङ) सभेदमात्मनः स्वरूपं निरूपयत ।

## ५. कक्षाभ्यासो गृहाभ्यासश्च

(क) निधाय...इति मङ्गलपद्यस्य सम्यग् वाचनं कुरुत ।

(ख) नित्यानित्यद्रव्याणां विभागविषये सखिभिस्सह प्रश्नोत्तरात्मिका चर्चा विधेया ।

(ग) गुणानां स्वरूपमादाय एकमनुच्छेदं लिखत ।

## ६. परियोजनाकार्यम्

(क) कस्मिन् द्रव्ये के गुणास्तिष्ठन्ति ? भित्तौ स्थापनीयां सारिणीं निर्मात ।

(ख) अभावपदार्थस्य लोकव्यवहारेण सह व्यावहारिकं सम्बन्धं प्रस्तुत्य सखीनामग्रे प्रवचनं कुरुत ।

## ७. रचनात्मकोऽभ्यासः सर्जनात्मकोऽभ्यासश्च

(क) '**नवद्रव्येषु पृथिवी**' इति शीर्षके लघुनिबन्धो लेखनीयः ।

(ख) अन्तर्जालादिषु न्यायवैशेषिकयोः कालस्वरूपमन्विष्य तत्समीक्षणं विधेयम् ।

तृतीयः पाठः

# प्रत्यक्षप्रमान्तगुणानां बोधः

## गुणपदार्थनिरूपणम्

**मूलम्– चक्षुर्मात्रग्राह्यो गुणो रूपम् ।तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम् । पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं च तेजसि ।**

**व्याख्या-** इदानीं प्रसङ्गसङ्गत्या गुणेषु प्रथमं सभेदं रूपलक्षणं प्रस्तौति ग्रन्थकारः । यो गुणो चक्षुषा एव गृह्यते नान्येन स गुणो रूपम् । तच्च रूपं विशेषो गुणो वर्तते । तथा च चक्षुर्मात्रग्राह्यत्वे सति विशेषगुणत्वं रूपस्य लक्षणम् । यथा शुक्लनीलादिरूपादौ चक्षुरिन्द्रियमात्रग्राह्यत्वं विशेषगुणत्वञ्च वर्तत इति भवति लक्षणसमन्वयः । अत्र लक्षणघटकं मात्रपदमितरव्यावर्तकमस्ति । गुणो रूपमित्येवोक्तौ रसादावतिव्याप्तिः । तद्वारणाय चक्षुर्मात्रग्राह्य इति पदं दत्तम् । चक्षुर्ग्राह्यो गुणो रूपमित्येवोक्तौ सङ्ख्यादावतिव्याप्तिः । एकत्वादिसङ्ख्याया द्वीन्द्रियग्राह्यत्वात् तादृशी सङ्ख्यापि चक्षुषा ज्ञातुं शक्यते, अत उक्तं चक्षुर्मात्रग्राह्य इति । सा न चक्षुर्मात्रग्राह्या । सा तु त्वग्ग्राह्यापि भवति । उपर्युक्ते रूपलक्षणे गुणपदानुपादाने रूपत्वजातावतिव्याप्तिः । 'यो गुणो येनेन्द्रियेण गृह्यते तद्गता जातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यते' इति नियमात् रूपत्वस्यापि चक्षुर्मात्रग्राह्यत्वात् तत्रातिव्याप्तिर्जाता । तन्निरोधार्थं गुणपदमावश्यकमभूत् । रूपत्वं तु जातिः, न गुणः । अतस्तत्र नातिव्याप्तिः । ग्राह्यत्वं नाम प्रत्यक्षविषयत्वञ्चेदग्राह्यत्वमिन्द्रियजन्यप्रत्यक्षाविषयत्वम् । तथा च चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वं रूपस्य लक्षणमुपपन्नं भवति ।

तच्च रूपं नित्यानित्यभेदेन द्विविधं वर्तते । परमाणुगतं रूपं नित्यम्, तद्भिन्नमनित्यम् । अथवा नित्यगतं नित्यमनित्यगतमनित्यम् । पृथिव्यां शुक्लनीलादिसप्तविधमपि रूपमुपलभ्यते ।

रूपरहितं वस्तु चक्षुषा नैव गृह्यते। यथा वायुः। अतश्चाक्षुषप्रत्यक्षे रूपं कारणम्। रूपरहितं वायु-आकाशादिकं द्रव्यं चक्षुषा नैव गृह्यते। पृथिव्यां सर्वाणि सप्तविधरूपाणि लभ्यन्ते। तेषु सप्तविधरूपेषु शुक्लरूपं भास्वराभास्वररूपेण द्विविधं वर्तते। परस्मै प्रकाशकं भास्वरम्। परस्मै अप्रकाशकमभास्वरमित्याशयः। जले केवलमभास्वरशुक्लरूपं वर्तते। तेजसि भास्वरशुक्लरूपं वर्तते।

**मूलम्– रसनग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव।**

**व्याख्या-** चतुर्विंशतिप्रभेदेषु गुणेषु रसो द्वितीयो गुणो वर्तते। रसनेन्द्रियेण ग्राह्यो विशेषगुणो रसः। तथा च रसनया ग्राह्यत्वे सति गुणत्वं रसस्य लक्षणमित्यर्थः। मधुरादिरसादौ रसनेन्द्रियग्राह्यत्वं विशेषगुणत्वञ्च लभ्यते इति लक्षणसमन्वयः। अत्र रसनेन्द्रियग्राह्यत्वं रसत्वादौ वर्तत इति रसत्वादिजातावतिव्याप्तिवारणाय गुणपदं निवेश्यते। तन्निवेशे च रसत्वादिकं न गुणोऽपि तु जातिरिति नातिव्याप्तिः। स च मधुरादिभेदेन अनेकधा। अत्र आदिपदेन मधुर-आम्ल-लवण-कटु-कषाय-तिक्तभेदात् रसस्य षड्विधत्वं गृह्यते।

अत उक्तं मूले 'स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विध इति। परन्तु प्राचीनमते चित्ररसमादाय रसस्य सप्तविधत्वं स्वीकृतम्। नवीनास्तु एतन्मतं न स्वीकुर्वन्ति। तेषां मते चित्ररसस्तु मधुरादिषड्विधरसस्यैव मिश्रितो रसो नान्यत्। अतस्चित्ररसस्य पृथक् रसत्वस्वीकारो नावश्यक इति। वैशेषिकदर्शनस्वीकृतेषु नवद्रव्येषु पृथिवीजलयोरेव रसस्य वृत्तिः। तस्य सर्वे भेदाः पृथिव्यामुपलभ्यन्ते, जले तु मधुर एव। जलपरमाणौ रसो नित्यः, अन्यः सर्वोऽपि रसोऽनित्य इत्यर्थः। अनित्यरसोऽपि द्विविधः, पाकजापाकजभेदात्। पृथिव्यां पाकजः, अग्नि (तेजः) समवायिकारकः। जलेऽपाकजः, अपाकजस्थले चावयविसमवेतरसं प्रति अवयवसमवेतरसोऽसमवायिकारणम्। तादृशरसश्च रसनेन्द्रियजन्यद्रव्यप्रत्यक्षे सहयोगी च भवति। प्रशस्तपादभाष्यस्य न्यायकन्दलीटीकायां रसस्य प्रयोजनमपि उल्लिखितं वर्तते- **'जीवनपुष्टिबलारोग्यनिमित्तम्'** इति। अत्र जीवनं प्राणधारणं प्राणरक्षणं वा। पुष्टिर्नाम शरीरस्य अवयवानां वृद्धिह्रासौ। बलम् उत्साहविशेषः शक्तिर्वा। आरोग्यं रोगाभावः रोगनिदानं वा। एतेषां रसो निमित्तम्। कारिकावल्यां विश्वनाथेनोक्तम्–

**रसस्तु रसनाग्राह्यो मधुरादिरनेकधा।**
**सहकारी रसज्ञाया नित्यतादि च पूर्ववत्।** इति।

**मूलम्–घ्राणग्राह्यो गुणो गन्धः। स द्विविधः सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।**

**व्याख्या-** घ्राणेन्द्रियग्राह्यत्वे सति गुणत्वं गन्धस्य लक्षणम्। गन्धत्वादावतिव्याप्तिवारणाय गुण इति पदम्। रूपादावतिव्याप्तिवारणाय घ्राणग्राह्य इति। घ्राणेन्द्रियं विहाय अन्येन्द्रियेण गन्धग्रहणमसम्भवम्, अत एतदपि वक्तुं शक्यते, घ्राणेन्द्रियमात्रग्राह्यो गुणो गन्ध इति। तथा च गन्धो घ्राणेन्द्रियग्राह्यो गुणश्चेति भवति लक्ष्ये गन्धे लक्षणसङ्गतिः। पृथिव्यामेव गन्धस्य वृत्तिः नान्यत्र (न तु जलादौ)। सुरभिरसुरभिश्चेत्यादिपदेन गन्धस्य द्वैविध्यं प्रतिपादितम्। एतत्तु नवीनमतेन। प्राचीनमते तु चित्रगन्धमादाय गन्धस्य त्रिविधत्वं स्वीक्रियते। गन्धोऽपि न नित्यः, पाकेन गन्धान्तरोत्पत्तेः। द्वयोः सुगन्धदुर्गन्धयोरुद्भूतानुद्भूताभिभूतभेदेन षड्विधत्वं परिगण्यते। यथा–कुसुमगन्ध उद्भूतः, नासिकायाः गन्धोऽनुद्भूतः, मलव्याप्यफलस्य गन्धोऽभिभूतः। पृथिवीमात्रवृत्तित्वाद् गन्धः पृथिवीद्रव्यस्य विशेषगुणः। उक्तञ्च–पृथिवीमात्रवृत्तिरिति। अर्थात् पृथिवीभिन्नजलाद्यवृत्तित्वे सति पृथिवीसमवेतत्वम्। अथवा घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्वं गन्धत्वम्। यद्वा पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्वं गन्धत्वमित्यादिकं जातिघटितलक्षणं विधाय गन्धत्वावच्छिन्ने गन्धे लक्ष्ये लक्षणसमन्वयो विधेयः।

**मूलम्– त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।**

**व्याख्या-** चतुर्विंशतिगुणेषु स्पर्शश्चतुर्थो गुणः, तस्य लक्षणं तद्भेदश्चेत्थं दर्श्यते– त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणत्वं स्पर्शस्य लक्षणम् इति। यथा शीतोष्णस्पर्शादिकस्य त्वगिन्द्रियमात्रग्राह्यत्वं गुणत्वञ्च वर्तत इति भवति लक्षणसङ्गतिः। स्पर्शस्य ग्रहणं त्वगिन्द्रियेणैव भवति, न तु तद्भिन्नेन केनापीन्द्रियेण। अत्र मात्रपदानुपादाने एकत्वादिसङ्ख्यासामान्यगुणेऽतिव्याप्तिस्तत्परिहाराय मात्रपदं निवेश्यते। कारिकावल्यामेवमाह विश्वनाथः–

**स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः।**
**अनुष्णशीतशीतोष्णभेदात् स त्रिविधो मतः।**
**काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत्**

स च स्पर्शः पृथिवी-जल-तेजो-वायुद्रव्येषु उपलभ्यते। स्पर्शस्य त्रिविधाः भेदाः सन्ति। ते च– शीतस्पर्शः, उष्णस्पर्शः, अनुष्णाशीतस्पर्शश्चेति। तत्र शीतो जले, उष्णस्तेजसि, अनुष्णाशीतः

पृथिवीवाय्वोः उपलभ्यते । कदाचित् औपाधिककारणात् तापिते जले उष्णत्वादिप्रतीतिर्भवति । उक्तञ्च– महाकविकालिदासेन रघुवंशमहाकाव्ये **'उष्णत्वमग्न्यातपसम्प्रयोगात् शैत्यं हि यत्सा प्रकृतिर्जलस्य'** इति ।उष्णस्पर्शो गुणः तेजसि वर्तते ।तदपि कदाचिद् उद्भूतरूपेण, कदाचिदभिभूतरूपेण, कदाचिदनुद्भूतरूपेण प्राप्यते । यथा– स्पर्शस्योद्भूतरूपं भाष्करकिरणेषूपलभ्यते, अभिभूतं रूपं चन्द्रकिरणेषु, अनुद्भूतं रूपं चक्षुरिन्द्रिये उपलभ्यते । अनुष्णाशीतस्पर्शः पाकजापाकजभेदेन द्विविधः, तयोर्मध्ये पाकजानुष्णशीतस्पर्शः पृथिव्याम्, अपाकजानुष्णाशीतस्पर्शो वायौ अनुभूयते ।

**मूलम्–रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्र अपाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ।**

**व्याख्या-** पाकजकारणात् पृथिवीमात्रे स्थिता रूपरसगन्धस्पर्शाः परिवर्तनशीला अनित्याश्च भवन्ति । तत्र रूपरसगन्धस्पर्शेषु कञ्चिद्विशेषं वक्तुमारभते ग्रन्थकारः–रूपादिचतुष्टयमित्यादिना । रूपादिचतुष्टयम् = रूपरसगन्धस्पर्शा इत्यर्थः । पृथिव्यां पाकजमिति । विलक्षणस्तेजःसंयोग एव पाक इति कथ्यते ।

तेजसा संयोगस्तेजःसंयोगः, स पाकः । तज्जं पाकजम् । पाकाज्जातं पाकजमित्यर्थः । तेजःसंयोगोऽयं तत्तद्वस्तूनां स्वरूपस्वभावादिकमनुसृत्य भिन्नभिन्न एव भवति । यथा-

- वृक्षशाखादिषु स्थितानामाम्रदाडिमादिफलानां सूर्यकिरणैः,
- तृणपुञ्जनिक्षिप्तानां तु तेषां तृणपुञ्जस्थितेन तेजसा,
- स्थाल्यादिषु अधिश्रितानां तण्डुलादीनां तत्पात्रस्याधः स्तनस्थितवह्निज्वालादिना,
- भुक्तस्यान्नादेर्जाठराग्निना एवं यथाकथमपि येन केनापि तेजसा संयोगे सत्येव ते पदार्था विपरिणामं प्राप्य परिपक्वा भवन्तीति सर्वैरनुभूयते ।

तृणपुञ्जनिक्षिप्तेषु आम्रादिषु पाकवशात् केषुचिद् रूपरसगन्धस्पर्शाः सर्वेऽपि विलक्षणतया नवीना इव जायन्ते । कदाचन आम्रस्य रूपे परिवर्तितेऽपि नाम्रस्थो रसः परिवर्तते, रसे वा परिवर्तितेऽपि आम्रस्थरूपेऽपरिवर्तनं दृश्यते । तथैव गन्धादौ च । अतो रूपादीनां परिणामस्य कारणीभूताः पाका एवेति बोद्धव्यम् । एकेनैव पाकेन तत्सर्वं परिवर्तनं न भवतीत्यनुभवारोधेनाप्यङ्गीकरणीयमेव । एतेन विलक्षणतेजःसंयोगः पाकः इति सिद्धान्तो दृढीभवति । स च

पूर्वरूपनाशपूर्वकरूपान्तरोत्पादकतेजःसंयोग एव पाकः। तादृशपाकाज्जातं पाकजमित्युच्यते। तत्पाकजं रूपादिकमनित्यं भवति। पृथिव्यां रूपादिचतुष्टयं वर्तते परन्तु तदनित्यमेव भवति पाकजन्यत्वात्। अन्यत्र जलं, तेजसि, वायौ च रूपादिकमपाकजं तेजःसंयोगानुत्पन्नमित्यर्थः। नित्यगतं जलादिपरमाणुगतं नित्यं भवति। अनित्यगतं द्व्यणुकाद्यवयविगतं तु अनित्यमेवेत्यर्थः। अयमेव विशेषो यद् वायौ गन्धो रूपं रसश्च न सन्त्येव। अत आप्यतैजसवायवीयपरमाणुषु स्थिता नित्याः रूपरसादयः। तेषु जलादिषु कार्यद्रव्येषु स्थिताः स्पर्शादयस्तु अनित्याः।

**मूलम्– एकत्वादिव्यवहारहेतुः सङ्ख्या। सा नवद्रव्यवृत्तिः एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्राऽनित्यमेव।**

**व्याख्या-** चतुर्विंशतिगुणेषु सङ्ख्या पञ्चमो गुणः। तत्र लक्षणघटकादिपदेन द्वित्वादयः सङ्ख्या गृह्यन्ते। तस्या लक्षणं स्वरूपञ्चात्र प्रस्तूयते। गणनाव्यवहारे तु हेतुः =असाधारणं कारणम्, सङ्ख्याऽभिधीयते। गणनाव्यवहारे 'अयमेकः, इमौ द्वौ' इत्याकारको यो व्यवहारः लोके दृश्यते, तं प्रति असाधारणनिमित्तकारणं सङ्ख्या। परमाण्वादिनित्यपदार्थेषु एकत्वं नित्यम्। अनित्ये घटादौ विद्यमानमेकत्वमनित्यम्।

सङ्ख्या तु सामान्यगुणः, न तु विशेषः। यतो हि विशेषगुणो वस्तुनिष्ठो भवति। वैशेषिकसूत्रोपस्कारकारशंकरमिश्रमहाभागो द्वित्वातिरिक्तबहुत्वमपि स्वीकरोति। यथा– **त्रित्वादिसमानाधिकरणं सङ्ख्यान्तरमेव बहुत्वं त्रित्वादिजनकापेक्षाबुद्धिजन्यं प्रागभावभेदादेवं भावः कथमन्यथा 'बहवस्तावत् सन्ति शतं वा सहस्रं वेति विशिष्य न जानीमः'** इति। परन्तु अन्ये आचार्याः तन्न स्वीकुर्वन्ति। त्रित्वादारभ्यपरार्धत्वपर्यन्ता सर्वाः सङ्ख्या बहुत्वरूपेण स्वीक्रियन्ते। अतो बहुत्वं न स्वतन्त्रसङ्ख्या। तस्या स्वीकारो नावश्यकः। द्वित्वादिकमारभ्य परार्धं यावत् सर्वाः सङ्ख्या अनित्याः। एकत्वं विहाय ताः सर्वाः सङ्ख्याः अपेक्षाबुद्धिजन्याः। उक्तञ्च कारिकावल्याम्–

**नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।**
**द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः** इति।

**मूलम्– मानव्यवहारासाधारणकारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम्। अणु महद् दीर्घं ह्रस्वञ्चेति।**

**व्याख्या-** मानव्यवहारासाधारणकारणत्वं परिमाणस्य लक्षणम् । मानम् = इयत्ता, तस्या, यः इदमणु, इदं महत्, इदं दीर्घम्, इदं ह्रस्वम् इत्याकारको व्यवहारः, तस्य व्यवहारस्य असाधारणं कारणं परिमाणमित्यर्थः ।

दण्डादिवारणाय मानेति पदम् । कालादिवारणाय असाधारणेति । शब्दत्ववारणाय कारणमिति पदम् । तस्य परिमाणस्य चत्वारो भेदाः सन्ति । अणुः, महद्, दीर्घं, ह्रस्वञ्चेति । पृथिव्यादिमनःपर्यन्तनवद्रव्येषु परिमाणस्य वृत्तिः । कारिकावल्यां विश्वनाथ आह–

**परिमाणं भवेन्मानव्यवहारस्य कारणम् ।**
**अणुर्दीर्घं महद् ह्रस्वमिति तद्भेद ईरितः** । इति ।

आश्रयनाशाद् आश्रितगुणः(परिमाणम्) नश्यति । अवयवसंयोगाद्, अवयवपृथक् करणात् पूर्वावयवी नश्यति, नवीन उत्पद्यते । तस्मिन् अवसरे पूर्वपरिमाणनाशाद् नवीनपरिमाणमुत्पद्यते । पूर्वोल्लिखितेषु चतुर्षु परिमाणेषु आद्यस्य अणुत्वस्य द्विविधत्वं दृश्यते, परमाणुत्वम्, मध्यमाणुत्वञ्च । तत्र आद्यं परमाणुषु, द्वितीयं द्व्यणुकादिषु वर्तते । महत्परिमाणस्यापि द्वौ भेदौ परिगणितौ, परममहत्त्वम्, मध्यममहत्त्वञ्च । आद्यस्य (परममहत्परिमाणस्य) आकाशकालदिगादिषु वृत्तिः, द्वितीयस्य (मध्यममहत्परिमाणस्य) त्र्यणुकादिषु ।

ह्रस्वपरिमाणस्यापि परमह्रस्वत्त्वमध्यमह्रस्वत्त्वभेदेन द्वौ भेदौ स्तः । तत्र आद्यं परमाणुषु, द्वितीयं द्व्यणुकादौ वर्तते । तथैव दीर्घपरिमाणस्यापि द्वौ भेदौ मन्येते; परमदीर्घत्वम्, मध्यमदीर्घत्वञ्च । तयोर्मध्ये आद्यस्य आत्माकालाकाशादिषु, द्वितीयस्य त्र्यणुकादिषु वृत्तिः । ते च परिमाणभेदाः नित्ये नित्याः, अनित्ये चानित्या भवन्ति । अनित्यपरिमाणं अवयवपरिमाणेन, अवयवसंख्यया, अवयवप्रचयेन वा उत्पद्यते तच्च परिमाणं नवद्रव्यवृत्तिः । अनित्यपरिमाणं तदाश्रयीभूतद्रव्यनाशेन नश्यति ।

**मूलम्– पृथग्व्यवहारासाधारणकारणं पृथक्त्वम्** । **सर्वद्रव्यवृत्ति** ।

**व्याख्या-** चतुर्विंशतिगुणेषु सप्तमो गुणः पृथक्त्वम् । पृथग्व्यवहारासाधारणकारणत्वं पृथक्त्वस्य लक्षणम् । व्यवहारासाधारणकारणमित्येव पृथक्त्वस्य लक्षणे कृते दण्डादावतिव्याप्तिर्भवति तद्वारणाय पृथगिति पदम् । कालादिवारणाय असाधारणेति । अयमस्मात् पृथगिति यो विलक्षणप्रतीत्यात्मको

व्यवहारस्तं प्रति यदसाधारणं कारणं तत्पृथक्त्वमित्यर्थः। इदञ्च पृथक्त्वं भेदादतिरिक्तं स्वतन्त्रं प्रतीतिविषयभूतमित्यङ्गीक्रियते।

अत एव घटः पटो नेति प्रतीत्यपेक्षया घटः पटात् पृथगिति प्रतीतिर्भिन्ना विलक्षणा चेति विलक्षणप्रतीत्यनुरोधेन पृथक्त्वस्य स्वतन्त्रगुणत्वं स्वीक्रियते। **पृथक्त्वमपोद्धारव्यवहारकारणम्** इति प्रशस्तपादाचार्य उक्तवान्। अपोद्धारव्यवहार इदमस्मात् पृथगिति ज्ञानं व्यपदेशश्च तस्य कारणम् पृथक्त्वमिति। अयं घटोऽस्मात् पटात् पृथग् इत्याकारको यो व्यवहारो लोके दृश्यते, तं प्रति यद् असाधारणं कारणं तत्पृथक्त्वम्। तदपि नित्यगतं नित्यमनित्यगतमनित्यम्। उक्तञ्च कारिकावल्याम्–

**सङ्ख्यावत्तु पृथक्त्वं स्यात् पृथक् प्रत्ययकारणम्**। इति।

**मूलम्– संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः।**

**व्याख्या-** चतुर्विंशतिगुणेषु संयोगोऽष्टमो गुणः। संयुक्तव्यवहारस्यासाधारणकारणत्वं संयोगत्वमिति संयोगस्य लक्षणम्। दण्डादिवारणाय संयुक्तव्यवहारेति पदम्। कालादावतिव्याप्तिवारणाय असाधारणेत्यपि पदं देयम्। एवमेव संयुक्तव्यवहारत्वेऽतिव्याप्तिवारणाय हेतुरिति। संयुक्तो नाम संयोगाश्रयः। तथा च इमौ पदार्थौ संयुक्तौ हीति यो व्यवहारस्तं प्रति यदसाधारणं कारणं स एव संयोग इति भवति लक्ष्ये लक्षणसमन्वयः। द्वयोः तदधिकद्रव्यगुणकर्मणां वा यः संयुक्तव्यवहारहेतुरस्ति स एव संयोगः। स च सर्वद्रव्यवृत्तिः। कारिकावल्यामपि संयोगस्य लक्षणं भेदाश्च–

**अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः।**
**तथोभयक्रियाजन्यो भवेत् संयोगजोऽपरः॥**

सोऽपि त्रिविधः, अन्यतरकर्मजः, उभयक्रियाजन्यः, संयोगजश्च। उक्तञ्च कणादेन– **अन्यतरकर्मजः, उभयकर्मजः, संयोगजश्च संयोगः**। (वै.सू. ७।२।९)।

श्येनकर्मणा श्येनवृक्षसंयोगोऽन्यतरकर्मजः, उभयोर्मेषयोः कर्मणा तयोः संयोगः उभयक्रियाजन्यः, कपालवृक्षयोः संयोगात् घटवृक्षयोर्यः संयोगः सः संयोगजः। उक्तञ्च कारिकावल्याम्–

**आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ।**
**मेषयोः सन्निपातो यः स द्वितीय उदाहृतः ।**
**कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः** । इति ।

**मूलम् –संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।**

**व्याख्या-** चतुर्विंशतिगुणेषु विभागो नवमो गुणो वर्तते । संयोगनाशकत्वविशिष्टगुणत्वं तल्लक्षणम् । अथवा संयोगनाशकत्वे सति गुणत्वं विभागस्य लक्षणम् । संयोगनाशको गुणो विभागः, सर्वद्रव्यवृत्तिः । संयोगनाशाद् विभागस्योत्पत्तिर्भवति । तथैव तर्कभाषायां विभागस्य लक्षणमित्थं कृतमस्ति 'विभागोऽपि विभक्तप्रत्ययहेतुः, संयोगपूर्वको द्वयाश्रय इति । इदम् अस्माद् विभक्तमिति प्रतीतेर्यदसाधारणं कारणं तदेव विभागः । **प्राप्तिपूर्विका अप्राप्तिर्विभागः** प्रशस्तपादाचार्योपि उक्तवान् । प्राप्तिविरोधी गुणविशेषो विभागः । सोऽपि संयोगगुणवत् त्रिविधः, अन्यतरकर्मज (एककर्मोद्भवः), उभयकर्मज (कर्मद्वयोद्भवः) विभागजश्च । कारिकायामपि–

**एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ।**
**विभागजस्तृतीयः स्याद् तृतीयोऽपि द्विधा भवेत्** । इति ।

आद्यस्तु श्येनकर्मणा श्येनवृक्षयोर्विभागः । उभयमेषयोः कर्मणा तयोर्विभागः कर्मद्वयोद्भवः (उभयकर्मजः) । हस्ततरुविभागात् कायतरुविभागो विभागजविभाग इति ।

**मूलम्– परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादिचतुष्टयमनोवृत्तिनी । ते द्विविधे दिक्कृते कालकृते च । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् ।**

**व्याख्या-** परत्वापरत्वे सहैव विवेचिते मूले । परव्यवहारासाधारणकारणत्वं परत्वम्, अपरव्यवहारासाधारणकारणत्वमपरत्वमिति परत्वापरत्वयोर्लक्षणम् । दण्डादिवारणय परव्यवहारेति पदम् । कालादिवारणाय असाधारणेति । परव्यवहारत्ववारणाय कारणेति पदम् । ते परापरत्वे द्विविधे दिक्कृते कालकृते च । दूरस्थं दिक्कृतं परत्वम्, समीपस्थे दिक्कृतमपरत्वम् । यथा पाटलीपुत्रात् वाराणसीमपेक्ष्य प्रयागः पर इत्यनुभवात् पाटलीपुत्रावधिकं वाराणसीनिरूपितपरत्वं प्रयागे वर्तते । एवमेव पाटलीपुत्रात् प्रयागमपेक्ष्य काशी समीपस्था इत्युच्यमाने पाटलीपुत्रावधिकप्रयागनिरूपितमपरत्वं

काश्यामस्ति। तथैव ज्येष्ठे कालकृतं परत्वम्, कनिष्ठे कालकृतमपरत्वम्। इमे परापरत्वे अपेक्षाबुद्ध्या उत्पद्येते। अपेक्षाबुद्धिनाशेन नश्यतः। एतदाह विश्वनाथः–

**परत्वं चापरत्वं च द्विविधं परिकीर्तितम्।**
**दैशिकं कालिकं चापि मूर्त एव तु दैशिकम्॥**

**मूलम्– आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति।**

**व्याख्या-** आद्यपतनासमवायिकारणत्वं गुरुत्वस्य लक्षणम्। एतच्चातीन्द्रियं पतनरूपकार्यादनुमेयम्। पृथिव्यां जले चास्य स्थितिः। गुरुत्वनामको गुणः पदार्थस्य (भूमिं प्रति) आद्यपतनस्य कारणं भवति।

पतनकर्मणा अनुमेयम्, न प्रत्यक्षं गुरुत्वम्। तच्च नित्यगतं नित्यमनित्यगतमनित्यम्। तत्तु पृथिव्यां जले च वर्तते। उक्तञ्च कारिकावल्याम्–

**अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत्।**
**अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्।**

संयोगप्रयत्नसंस्काराणां गुणत्रयाणां प्रतिरोधकं गुरुत्वं भवति। गुरुत्वं जलभूम्योः पतनकर्मकारणम्, प्रत्यक्षं पतनकर्मानुमेयम् संयोगप्रयत्नसंस्कारविरोधि। अस्य च अबादिपरमाणु-रूपादिवदन्नित्यानित्यत्वनिष्पत्तय इति प्रशस्तपादभाष्ये उक्तम्।

**मूलम्–आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद् द्विविधं सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजन्यं द्रवत्वम्। तेजसि सुवर्णादौ।**

**व्याख्या-** आद्यस्यन्दनासमवायिकारणत्वं द्रवत्वस्य लक्षणम्। तत्र स्यन्दनं नाम स्रवणरूपक्रियाविशेषस्तं प्रति यदसमवायिकारणं तद् द्रवत्वमित्यर्थः। दण्डादिवारणाय असमवायीति पदम्। रसादिवारणय स्यन्दनेति। येन कारणेन पृथिवीजलतेजस्सु स्यन्दनक्रियोत्पद्यते, तदेव द्रवत्वम्। सांसिद्धिकनैमित्तिकभेदेन द्रवत्वं द्विविधम्। तत्र सांसिद्धिकमपां विशेषगुणः, नैमित्तिकद्रवत्वं पृथिवीजलतेजसोः सामान्यगुणः। उक्तञ्च भाष्ये 'द्रवत्वं स्यन्दनकर्मकारणम्, त्रिद्रव्यवृत्तिः। तत्तु

द्विविधं सांसिद्धिकं नैमित्तिकञ्च । सांसिद्धिकमपां विशेषगुणः, नैमित्तिकद्रवत्वं पृथिवीजलतेजसोः सामान्यगुणः । जलगतं, तैलगतञ्च द्रवत्वं नित्यम्, तदतिरिक्तमनित्यम् । वह्निसंयोगजन्यं द्रवत्वम् तु स्वर्णादिरूपे तेजसि, घृतादिरूपे पृथिव्याञ्च दृश्यते ।

**मूलम्–चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।**

**व्याख्या-** चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम् । पिण्डीभावो नाम चूर्णादेर्धारणाकर्षणहेतुभूतो विलक्षणः संयोगः । तत्र स्नेह एवासाधारणं कारणम् । सक्तुकादिपिष्टादिपिण्डीभावस्य कृते यो हेतुर्गुणः स एव स्नेहः । दुग्धतैलादौ प्रतीयमानः स्नेहोऽपि जलीय एव । स स्नेहोऽपि नित्यानित्यभेदेन द्विविधः । जलीयपरमाणुगतः स्नेहः नित्यः, तदन्योऽनित्यः । उक्तञ्च कारिकावल्याम्–**स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ** । स च स्नेहो जलस्य विशेषगुणः। उक्तञ्च मूले–जलमात्रवृत्तिरिति । अर्थाज्जलातिरिक्ते न कुत्रापि द्रव्ये स्नेहो वर्तितुमर्हति । अत एव स्नेहसमवायिकारणं जलमित्युच्यते ।

**मूलम्– श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । सः द्विविधः ध्वन्यात्मको वर्णात्मकश्च । तत्र ध्वन्यात्मको भेर्यादौ, वर्णात्मकः संस्कृतभाषादिरूपः ।**

**व्याख्या-** श्रोत्रग्राह्यत्वे सति गुणत्वं शब्दस्य लक्षणम् । यथा ध्वन्यात्मके वा भेर्यादिशब्दे श्रोत्रेन्द्रियग्राह्यत्वम् =प्रत्यक्षविषयत्वं गुणत्वञ्च वर्तत इति भवति लक्ष्ये लक्षणसमन्वयः । शब्दे श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयः शब्दः, स च आकाशस्य विशेषगुणः । संयोगाद्, विभागात्, शब्दाच्च शब्दनिष्पत्तिः । आद्यो भेरीदण्डादि संयोगात्, द्वितीयो वंशाद्युत्पाटनात्, तृतीयो वीचीतरङ्गन्यायेन शब्दात् शब्दनिष्पत्तिः । वर्णात्मकध्वन्यात्मकयोर्मध्ये कण्ठसंयोगादिजन्यगकारादिरूपः शब्दो वर्णात्मकः, मृदङ्गादिजन्यः शब्दो ध्वन्यात्मकः । विश्वनाथपञ्चाननेन कारिकावल्यामुक्तम् –

**शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ।**
**कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः ॥**
**सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते** । इति ।

**मूलम्– सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विविधा स्मृतिरनुभवश्च ।**

**व्याख्या-** सर्वे च ते व्यवहाराः = अयं घटः, अयं पटः, इत्यादयः शब्दप्रयोगात्मका व्यवहारास्तादृशव्यवहारान् प्रत्यसाधारणं कारणं बुद्धिर्ज्ञानम् । तथा च सर्वव्यवहारसाधारणकारणत्वे सति गुणत्वं बुद्धेर्लक्षणम् । बुद्धिरेव ज्ञानम् । अत्र साङ्ख्यमतापकरणार्थं बुद्धिरेव ज्ञानमित्युक्तम् । यतो हि साङ्ख्यदार्शनिका बुद्धिर्नाम महत्तत्त्वमिति कथयन्ति, बुद्धिभिन्नं ज्ञानमिति तेषां सिद्धान्तः, अतो बुद्धिर्ज्ञानञ्चेति पदद्वयं पर्यायवाचकं न तु भिन्नमिति न्यायवैशेषिकमतं प्रदर्शयितुं लक्ष्ये बुद्धिर्ज्ञानमित्युक्तं लक्षणकारेण अन्नम्भट्टेन । व्यवहारो नाम शब्दप्रयोगः ।

अर्थं बुद्ध्वा शब्दरचना इति न्यायेन सर्वे ये व्यवहारा आहारविहारादिरूपा, तेषामसाधारणं कारणं बुद्धिरित्यर्थः । सा आत्माश्रया, आत्मनो गुणो बुद्धिरित्यर्थः । 'जानामीत्यनुव्यवसायगम्यज्ञानत्वं वा बुद्धेर्लक्षणम् । सा च सर्वव्यवहारहेतुभूता बुद्धिः स्मृतिरनुभवभेदेन द्विविधा = द्विप्रकारेत्यर्थः । अहं प्रागधीतं विषयं स्मरामीति स्मरणात्मकं ज्ञानञ्चेदहं ग्रन्थप्रतिपाद्यं विषयमनुभवामीत्यनुभवात्मकं ज्ञानम् । स्मरणात्मकं ज्ञानं प्रति अनुभवः कारणम् ।

**मूलम्– संस्कारमात्रजन्यं ज्ञानं स्मृतिः ।**

**व्याख्या-** संस्कारमात्रजन्यत्वे सति ज्ञानत्वं स्मृतेर्लक्षणम् । संस्कारो भावनाख्यः । मात्रपदमितरव्यावर्तकम् । तथा च संस्कारेतराजन्यत्वे सति संस्कारजन्यत्वमिति तात्पर्यम् । संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानपदम् । घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्यमिति । प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रपदम् । उद्बोधकसामग्रीसहिताद् संस्कारादेव स्मृतिर्जायते ।

**मूलम्– तद्भिन्नं ज्ञानमनुभवः । स द्विविधः । यथार्थोऽयथार्थश्च । तद्वति तत्प्रकारकोऽनुभवो यथार्थः । यथा रजते इदं रजतमिति ज्ञानम् । सैव प्रमेत्युच्यते ।**

**व्याख्या-** लक्षणवाक्यघटिततत्पदेन स्मृतिर्गृह्यते । भिन्नमित्यस्य भेदवानित्यर्थः । तथा च स्मृतिभिन्नत्वे सति ज्ञानत्वमनुभवस्य लक्षणम् । ज्ञानत्वमात्रोक्तौ स्मृतौ, स्मृतिभिन्नत्वमात्रोक्तौ घटादौ चातिव्याप्तिः । अत उभयपदोपादानम् । अनुभवो यथार्थायथार्थभेदेन द्विविधो वर्तते । प्रथमं यथार्थानुभवस्य स्वरूपं दर्शितवान् ग्रन्थकारः । मूलस्थतत्पदेन प्रकारताख्यो धर्मो गृह्यते । यथा रजते इदमित्यत्र रजतादिधर्मिनिष्ठस्य रजतत्वादिधर्मस्य ग्रहणं विधाय स धर्मोऽस्यास्तीति तद्वानिति विग्रहद्वारा तद्वति = तद्धर्मवति, तत्प्रकारकः = स धर्म एव प्रकारो (विशेषणम्) यत्र स इति फलितार्थः । अर्थात् रजतत्वधर्मवति रजते रजतत्वप्रकारकोऽनुभवो यथार्थानुभव इति कथ्यते । तथा

च तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वं यथार्थानुभवस्य लक्षणस्वरूपं निष्पद्यते। यथार्थानुभव एव प्रमा इत्युच्यते। प्रकृष्टा मा = प्रमा, प्रकृष्टं ज्ञानमित्यर्थः।

इदं रजतम् इत्याकारके ज्ञाने रजतनिष्ठो रजतत्वं धर्मः प्रकारतारूपेण भासते। तथैव रजतरूपो धर्मो विशेष्यतारूपेण भासते। अत एवायमनुभवो यथार्थ इति निगद्यते। प्रत्येकं वस्तुनि तत्तद्वस्तूनामसाधारणो धर्मो विशेषणतया तिष्ठति। तादृशधर्मं प्रति तद्वस्तु विशेष्यं भवति। यथा घटे घटत्वं भवति। घटे च घटत्वं विशेषणीभूतो धर्मः।

एवमेव घटत्वं प्रति घटो विशेष्यं भवति। नैयायिकशैल्या घटत्वविशिष्टो घट इति व्यवहारो भवति। घटत्ववति घटे घटत्वप्रकारकं घटविशेष्यकं यज्ज्ञानं तदेव प्रमात्मकं भवति। यथार्थज्ञानं यथार्थानुभवो वा।

**मूलम्– तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा शुक्ताविदं रजतमिति ज्ञानम्। सैव अप्रमेत्युच्यते।**

**व्याख्या-** इदानीं यथाप्रसङ्गमयथार्थानुभवस्य लक्षणमुच्यते। तस्याभावः = तदभावः, तदभावोऽस्मिन्नस्तीति तदभाववत्, तस्मिन् = तदभाववतीति। अत्र तत्पदेन प्रकारतया भासमानो धर्मो गृह्यते। तत्र तत्प्रकारको नाम तन्निष्ठप्रकारतानिरूपकप्रकारितावाननुभवः। तथा च तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वमयथार्थानुभवस्य लक्षणम्। तथा च तदभाववति = तद्धर्माभाववति, तत्प्रकारकः = तद्धर्मनिष्ठप्रकारतानिरूपको यः, सोऽनुभवोऽयथार्थः। अन्यस्मिन् वस्तुनि अन्यप्रकारा या प्रतीतिः जायते स अयथार्थानुभवः इत्यर्थः। यथा शुक्तौ शुक्तित्वमस्ति, न तु रजतत्वम्। शुक्तिं दृष्ट्वा इदं रजतम् इति ज्ञानमयथार्थं भवति।

शुक्तिरूपे अन्यस्मिन् वस्तुनि रजतत्वाभाववत्यां शुक्तौ इदं रजतम् इति रजतत्वप्रकारा या प्रतीतिः सैवायथार्थानुभव इति भावः। अस्मिन् ज्ञाने शुक्ती रजतत्वरहिता, सैव विशेष्यम्, तत्र अविद्यमानं रजतत्वं विशेषणमिति एतादृशोऽयथार्थानुभव एवाप्रमा इत्युच्यते। प्रमारहितं भ्रमात्मकं ज्ञानमित्यर्थः।

**मूलम्– यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्।**

**व्याख्या-** यथार्थानुभवस्य स्वरूपमुपरि उपन्यस्तम् । इदानीं तस्य विभागो विधीयते । अतश्चोक्तम्– यथार्थानुभवश्चतुर्विध इति । एतेनानुभवस्य चत्वारो भेदाः सन्तीति ज्ञायते । तद्यथा– प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ।तत्र प्रत्यक्षम्, अनुमितिः, उपमितिःशाब्दश्च, तेषामितरेतरद्वन्द्वसमासे प्रत्यक्षानुमित्युपमितिशाब्दाः, तेषां भेदस्तस्मात् प्रत्यक्षानुमित्युपमितिशाब्दभेदाद्यथार्थानुभवस्य चतुर्विधत्वं वर्तते । तत्करणमिति पदस्य यथार्थानुभवात्मकप्रमायाः करणमित्यर्थः । करणञ्चासाधारणं कारणमिति अग्रे वक्ष्यते । तथा च प्रमाकरणं प्रमाणमिति फलितोऽर्थः ।

प्रमाणशब्दः प्रोपसर्गपूर्वकात् मा(माने)धातोर्ल्युट्प्रत्यये, अनादेशे च निष्पद्यते । स च ल्युट्प्रत्ययः भावे, करणे चार्थे भवति । यद्यपि **कृत्यल्युटो बहुलम्** (पा.सू. ३।३।११३) इति सूत्रबलात् कदाचित् कर्तृकर्मादिष्वपि अर्थेषु भवितुं शक्नोति । प्रमिणोति यत्, तत् प्रमाणम् (कर्तरि) । प्रमीयते यत्तत्प्रमाणम् (कर्मणि) । प्रमीयतेऽनेनेति प्रमाणम् (करणे) । प्रमीयतेऽस्मा इति प्रमाणम् (सम्प्रदाने) । प्रमीयतेऽस्मादिति प्रमाणम् (अपादाने) । प्रमीयतेऽस्मिन्निति प्रमाणम् (अधिकरणे) इति । एवं सत्यपि दर्शनजगति प्रमाणपदं प्रायस्तावदर्थद्वयमभिदधाति - करणार्थं भावार्थञ्च । तत्रापि शास्त्रेषु प्रमाकरणमिति करणार्थे प्रमाणपदमाधिक्येन प्रयुज्यमानं वर्तते । तथा च प्रमा = प्रमितिरेव प्रमाणम् अथवा प्रमीयते येन तत् प्रमाणम्, प्रमाकरणमित्यर्थः फलति । एवञ्चात्र करणार्थे 'प्र'उपसर्गपूर्वकात् **'माङ् माने'** इत्यस्माद्धातोः 'प्रमीयते यथार्थतत्त्वमनेन' इत्यर्थे **करणाधिकरणयोश्च** (पा.सू. ३।३।११७) इति सूत्रेण ल्युटि अनादेशे च प्रमाणपदं निष्पन्नं भवति । प्रमाकरणपदे हि पदद्वयं वर्तते– प्रमा, करणञ्च ।

प्रमा तावत् यत्र यदस्ति तत्र तस्यानुभवः, यथार्थज्ञानमिति यावत् । करणञ्च- **साधकतमं करणम्** (पा.सू. १।४।४२) इति पाणिनिः । एतावता करणव्युत्पत्त्या यथार्थज्ञानस्य प्रकृष्टं साधनमेव प्रमाणमिति फलितोऽर्थः । प्रमाणसङ्ख्यामादाय दार्शनिकानां मतभेदो दृश्यते । चार्वाकाः प्रत्यक्षमेकमेव प्रमाणं स्वीकुर्वन्ति । प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयवादिनो बौद्धाः वैशेषिकाश्च । नैयायिकैकदेशिनः प्रत्यक्षानुमानोपमानानि त्रीण्येव प्रमाणानीति कथयन्ति । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति प्रमाणचतुष्टयवादिनो नैयायिकाः । प्रत्यक्षानुमानोपमानशब्दार्थापत्तयः पञ्च प्रमाणानीति प्राभाकरमीमांसकाः । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयः षट् प्रमाणानीति भाट्टा वेदान्तिनश्च । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिसम्भवैतिह्यान्यष्टौ प्रमाणानीति पौराणिका निगदन्ति । तान्त्रिकास्तु एतेषु चेष्टामपि संयोज्य नव प्रमेयव्यवस्थापकानि प्रमाणानीति प्रतिपादयन्ति ।

परन्तु सर्वेषामपि प्रमाणानां नैयायिकोक्तप्रमाणचतुष्टये अन्तर्भावसम्भवात् चत्वार्येव प्रमेयसाधकानि प्रमाणानीति नैयायिकानामभिप्रायः । एवञ्च प्रत्यक्षप्रमायाः करणं प्रत्यक्षं चक्षुरादिकं

प्रमाणम् । अनुमितिप्रमायाः करणमनुमानं (व्याप्तिज्ञानम्) प्रमाणम् । उपमितिप्रमायाः करणम् (सादृश्यज्ञानम्) उपमानं प्रमाणम् । शाब्दप्रमायाः करणम् (पदज्ञानम्) शब्दप्रमाणमिति यथायथं प्रत्यक्षानुमित्युपमितिशाब्दाख्यानां चतसृणां प्रमितीनां भेदेन प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्चेति प्रमेयसाधकानि चत्वारि प्रमाणानि स्वीक्रियन्ते ।

## कारणनिरूपणम्

**मूलम्– (व्यापारवद्) असाधारणं कारणं करणम्** ।

**व्याख्या-** करणञ्चासाधारणं कारणं व्यापारवदसाधारणं कारणं वेति द्विविधमपि लक्षणं नैयायिकानामिष्टमेव ।

तथा च कार्यं प्रति यन्मुख्यव्यापारसम्पादकमसाधारणं कारणं तदेव करणमित्याशयः । न साधारणम् = असाधारणम्, विशिष्टं कारणमित्यर्थः । ईश्वरादृष्टदेशकालात्मकानि साधारणकारणानि सन्ति । यथोक्तम्–

**ईशस्तज्ज्ञानयत्नेच्छा कालोऽदृष्टं दिगेव च ।**
**प्राक्प्रतिबन्धकाभावौ कार्ये साधारणा स्मृताः** ॥ इति ॥

तदपि कारणं द्विविधं व्यापाररहितं व्यापारसहितञ्च । यच्च व्यापारसहितं भवति तदेव करणमित्युच्यते । व्यापाररहितं तु केवलं कारणमेव भवति न तु करणकोटौ तस्य समावेशः सम्भवति । यथा घटं प्रति ईश्वरादृष्टादयः साधारणकारणानि । दण्डचक्रकुलालादीनि असाधारणकारणानि । तेष्वपि कारणेषु यन्मुख्यं व्यापारसम्पादकं कारणं तदेव करणमिति तात्पर्यम् । मूलपाठे एव कतिपयपुस्तकेषु व्यापारवत् इति पदं दृश्यते । न्यायबोधिनीकारानुसारेण पूर्वत एव तत्पदं मूले वर्तत इति प्रतिभाति । पदकृत्यकारस्तु व्यापारवदित्यपि देयमिति वदति । एवं सति मूले तत्पदं नासीदिति तस्याभिप्रायो दृश्यते । परन्तु व्यापारे अतिव्याप्तिवारणाय व्यापारवदिति पदमवश्यमावश्यकमेव । तत्र को व्यापारः ? इति जिज्ञासायामुच्यते– 'तज्जन्यत्वे सति तज्जन्यजनको व्यापारः' इति व्यापारस्य लक्षणम् । व्यापारोऽस्मिन्नस्तीति व्यापारवत् । व्यापारः = क्रिया । यथा चक्रभ्रमणरूपो व्यापारो दण्डजन्यो भवति दण्डजन्यस्य घटस्य च जनको भवति । अतो घटं प्रति दण्डो व्यापारवदसाधारणं कारणं भवति । तत्र कालादावतिव्याप्तिवारणाय असाधारणमित्युक्तं मूले ।

**मूलम्– कार्यनियतपूर्ववृत्ति कारणम्** ।

**व्याख्या-** कारणं किमिति जिज्ञासायामाह– कार्यनियतेति । कार्यं प्रति नियतत्त्वे सति पूर्ववृत्तित्वं तस्यार्थः । यथा पटकार्यं प्रति तन्त्वादीनां नियतपूर्ववृत्तित्वात् तेषां कारणत्वं सिद्धयति । एवं सति पटं प्रति तन्तूनां कारणत्वे तन्तुरूपेऽपि कारणत्वापत्तिः, तस्यापि पटं प्रति पूर्वनियतवृत्तित्वाद् । तथैव जन्यपटं प्रति तन्तुरूपाकाशादीनामपि नियतपूर्ववृत्तित्वं वर्तत एव । अतः तेषामपि नियतपूर्ववृत्तित्वं सिद्धयतीति पूर्वपक्षस्योपस्थितौ तत्समाधानमुच्यते– न तावत् कार्यनियतपूर्ववृत्तित्वमेव कारणलक्षणम्, अपि तु **अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वमिति** तर्कदीपिकायामुक्तमन्नम्भट्टेन । तत्र चानन्यथासिद्धपदस्याध्याहारेण पूर्वपक्षो निराकृतो भवति । विश्वनाथपञ्चाननभट्टाचार्येण मुक्तावल्यां कारणलक्षणनिदर्शनप्रसङ्गे तावद् अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वमित्युक्तम् । तथा च कारिका–

**अन्यथासिद्धिशून्यस्य नियता पूर्ववृत्तिता ।**
**कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्तितम्** ॥ इति ॥

कार्योत्पत्त्यव्यवहितपूर्वक्षणावच्छेदकावच्छिन्ने कार्याधिकरणे यदन्यथासिद्धविरहविशिष्टजन्यपदार्थ-व्यापकीभूतपदार्थः कार्यतावच्छेदकसमवायसम्बन्धेन वर्तते तत्कारणमिति कारणलक्षणपरिष्कारः । कार्यपदार्थस्य स्वकारणवृत्तिसम्बन्ध एव कार्यतावच्छेदकसम्बन्धः । अत्र अन्यथासिद्धिशून्यपदाप्रयोगे घटकार्यं प्रति रासभादीनामपि पूर्ववृत्तित्वात् तत्रापि कारणलक्षणस्यातिव्याप्तिः । तत्र नियतपदस्यार्थः व्याप्तिः । व्याप्तिश्च साहचर्यनियमः । पूर्वं वृत्तिः पूर्ववृत्तिः । पूर्वशब्दस्य सापेक्षत्वात् कस्मात् पूर्वमिति जिज्ञासायां कार्योत्पत्तेः पूर्वमिति तत्समाधानम् ।

अत्र पूर्वत्वञ्च अव्यवहितपूर्वकालत्वमेवापेक्षितम्, न तु पूर्वकालसामान्यत्वम्, अन्यथा अद्यतन पटकार्यं प्रति ह्यस्तन पटकार्यस्य कारणानामपि कारणत्वमापद्येत, तेषामन्यथासिद्धत्वे सति नियतपूर्ववृत्तित्वात् । अतः कार्योत्पत्त्यव्यवहितपूर्वक्षणवृत्तित्वमेव पूर्ववृत्तित्वमित्यस्यार्थो लभ्यते । तथा सति ह्यस्तन पटकार्यस्य कारणानामव्यवहितपूर्वक्षणवृत्तित्वाभावदद्यतनीयपटकार्यं प्रति न कारणत्वम् । वृत्तिश्चाधिकरणसापेक्षा । कुत्र वृत्तिरिति चेत् यस्मिन्नधिकरणे समवायेन कार्यमुत्पद्यते तदधिकरणवृत्तिरित्युच्यते । कार्योत्पत्यव्यवहित-प्राक्क्षणावच्छेदेन कार्याधिकरणवृत्तित्वं पूर्ववृत्तित्वमित्यर्थः ।

नियतपदस्य कोऽर्थ इति चेद् नियमयुक्तत्वं सहचारसम्बन्धावच्छिन्नत्वञ्चेत्यर्थः, व्यापकत्वमित्यर्थः ।

जन्यद्रव्यं प्रति नियतत्वावच्छिन्नानां पूर्ववृत्तित्वावच्छिन्नानाञ्च पदार्थसमूहानामुपस्थितिः परिज्ञायते । यथा घटादिकार्यस्य कपालः, तत्समवेतरूपम्, कपालद्वयसंयोगः, चक्रम्, दण्डः, आकाशम्, कुलालः, तज्जनक इत्यादयः । परन्तु न तेषां सर्वेषां घटकार्यं प्रति कारणत्वं सिद्ध्यति । यदि कार्यनियतपूर्ववृत्तित्वमेव कारणलक्षणं स्यात् तर्हि तेषां कारणत्वं सम्भवति । तेन च कारणलक्षणस्यातिव्याप्तिः स्यात् । यथा कपालरूपे घटनियतपूर्ववृत्तित्वज्ञानं घटसमवायिकारणकपालेनैव सिद्ध्यति । कपालरूपस्य कपालेतरपदार्थवृत्तित्वाभावात् कपालनिरूपितं तस्य तावत् पूर्ववृत्तित्वम् । एवं जन्यपदार्थं प्रति तेषां पदार्थानां पृथक् संज्ञा प्रदत्ता नैयायिकैरन्यथासिद्धाख्या । अन्यरूपेण भिन्नभावेन सिद्ध इति तदर्थः । न तेषां विवक्षितकार्यं प्रति कारणत्वं सिद्ध्यति । अन्यथासिद्धयः पञ्चविधाः विश्वनाथमते । तर्कसङ्ग्रहस्य दीपिकाख्यव्याख्याने तु त्रिविधा अन्यथासिद्धयः प्रतिपादिताः ।

यत्कार्यं प्रति कारणस्य पूर्ववर्तिता येन धर्मपुरस्कारेण ज्ञायते तत् कार्यं प्रति स धर्मः अन्यथासिद्ध इति । अथवा यद्धर्मावच्छिन्नं कार्यं प्रति कारणस्य पूर्ववर्तिता यद्रूपावच्छेदेन गृह्यते तद् धर्मावच्छिन्नं कार्यं प्रति तद्रूपमन्यथासिद्धमिति प्रथमान्यथासिद्धस्य स्वरूपम् । यथा घटकार्यं प्रति दण्डः कारणम् कारणतावच्छेदकस्य दण्डत्वस्य घटपूर्ववृत्तित्वादपि तस्य कारणत्वं नास्ति । घटत्वावच्छिन्नघटकार्यं प्रति दण्डरूपकारणस्य पूर्ववर्तिता दण्डत्वरूपावच्छेदेनैव गृह्यते दण्डत्वस्य दण्डमात्रवृत्तित्वात् । अतस्तस्य घटपूर्ववृत्तित्वं दण्डेनैव ज्ञायमानत्वाद् घटत्वधर्मावच्छिन्नं घटकार्यं प्रति दण्डत्वमन्यथासिद्धम् ।

द्वितीयान्यथासिद्धः कारणपदार्थसमवेतविशेषगुणः । यस्य कारणनिरपेक्षेण स्वातन्त्र्येणान्वयव्यतिरेक-नियमो नास्ति, परन्तु स्वकारणापेक्षया एव तत् सिद्ध्यति स च पदार्थः द्वितीयान्यथासिद्ध इति । यथोक्तं विश्वनाथेन–**कारणमादाय वा यस्य** इति । तत्र स्वाधिकरणे कार्यसत्त्वमन्वयः । स्वभावाधिकरणे कार्याभावो व्यतिरेकः । तथा च नियतपूर्ववृत्तित्वाद् घटकार्यं प्रति दण्डः कारणम् । परन्तु घटकार्यं प्रति दण्डगतरूपस्यापि नियतपूर्ववृत्तित्वसत्त्वेऽपि कारणता न सिद्ध्यति । दण्डगतरूपस्य नियतपूर्वभावित्वज्ञानस्य दण्डाधीनत्वात् । दण्डरूपं हि स्वाश्रयभूतदण्डेन नियतपूर्वभावित्वं लभते ।

तेन च दण्डरूपसत्त्वे घटसत्त्वं दण्डरूपाभावे घटाभावः इत्यन्वयव्यतिरेकाभ्यां घटात्मकं कार्यं प्रति दण्डः कारणमिति । यतो हि दण्डकारणनिरपेक्षेण घटात्मकं कार्यं न सम्भवति । परन्तु दण्डकारणमादायैव तस्यान्वयव्यतिरेकौ गृह्येते । तस्माद् घटं प्रति दण्डः कारणमिति चेद् दण्डरूपमन्यथासिद्धम् ।

अन्नम्भट्टेन उपर्युक्तं द्विविधमपि मतं प्रथमान्यथासिद्धरूपेण स्थापितं वर्तते तर्कदीपिकायाम् । उक्तञ्च– येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तेनान्यथासिद्धम् इति । यथा– तन्तुना तन्तुरूपम्, तन्तुत्वञ्च पटं प्रति अन्यथासिद्धम् । अत्र तन्तुरूपमित्यनेन कारणपदार्थसमवेतविशेषगुणः, तन्तुत्वमित्यनेन कारणतावच्छेदकधर्मश्च प्रतिपादितो ग्रन्थकारेण ।

अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत् कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत् कार्यं प्रति अन्यथासिद्धत्वमिति तृतीयान्यथासिद्धस्वरूपं प्रतिपादितवान् विश्वनाथः ।आकाशस्तृतीयान्यथासिद्धरूपेण स्वीक्रियते । विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वादाकाशविशेषणीभूताकाशत्वज्ञानाभावात् तद्विशिष्टमाकाशज्ञानं न सम्भवति । न्यायमते आकाशस्य रूपाभावात् आकाशप्रत्यक्षं न भवति । अतः शब्दस्य समवायिकारणत्वेनाकाशसिद्धिरनुमानेन विधीयते । शब्दजनकत्वमात्रेण शब्दसमवायिकारणमात्रेण वा आकाशस्य सिद्धिर्जायते । अतोऽन्यं प्रति पूर्ववृत्तिज्ञानानन्तरमेव घटादिकार्यपूर्ववर्तित्वाद् घटादिकार्यं प्रति आकाशोऽन्यथासिद्धः ।

विवक्षितकार्यं प्रति जनकस्य जनकश्चतुर्थोऽन्यथासिद्धः । यथा घटकार्यस्य कृते कुलालपितृत्वेन कुलालपिता कुलालपूर्ववृत्तित्वादन्यथासिद्धः । अतो जनकस्य पूर्ववर्तित्वज्ञानानन्तरमेव कार्यस्य पूर्ववर्तित्वज्ञानं यस्मिन् भवति सोऽन्यथासिद्धः । घटपूर्ववृत्तित्वात् कुलालपितुरपि कुलालत्वमात्रेण कारणत्वं सिद्ध्यति । अत आह कारिकाकारः–**जनकं प्रति पूर्ववर्तितामपरिज्ञाय न यस्य गृह्यते** इति । कार्यजनकं प्रति गृहीतपूर्ववृत्तिर्यो वर्तते स तत्कार्यं प्रति पूर्ववर्तितया ज्ञायते । कारणस्य कारणं स चतुर्थोऽन्यथासिद्ध इति । तस्य च कुलालपितृत्वेन पूर्ववर्तित्वात् कार्यजनकं कुलालं प्रति कारणत्वम्, कुलालस्य च घटं प्रति पूर्ववर्तित्वात् कारणत्वम् । तस्माद् घटकार्यं प्रति कुलालपितुरपि परम्परया पूर्ववर्तित्वं गृह्यते । अतः कारणस्यापि कारणभूतस्य कुलालपितुर्घटकार्यं प्रति अन्यथासिद्धत्वमिति तात्पर्यम् ।

विश्वनाथेनोक्तमुपर्युक्तमतद्वयमन्नम्भट्टेन द्वितीयान्यथासिद्धरूपेण निरूपितम् । तर्कदीपिकायामेवमाहान्नम्भट्टः–अन्यं प्रति पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धम् इति । यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञाते एव पटं प्रति आकाशस्य पूर्ववृत्तित्वमिति । तच्च पूर्ववृत्तित्वमाकाशज्ञाननिरूपितम् । परन्तु पुनः कुलालपितृत्वमात्रावच्छिन्नत्वेन घटकार्यं प्रति कुलालपितुरपि पूर्ववृत्तित्वं भवितुमर्हति । यद्यपि ग्रन्थकारेण आकाशमात्रस्य ग्रहणं विहितं तथापि तादृशधर्मवत्त्वात् तत्र कुलालपितुरपि सङ्ग्रहणं सम्भवति ।

पञ्चमान्यथासिद्धस्वरूपविषये अन्नम्भट्टविश्वनाथयोः मतैक्यं दृश्यते । अत उभयोरपि मतमेकत्रैव क्रोडीक्रियते । अवश्यक्लृप्तनियतपूर्ववर्तिभिन्नाः सर्वेऽप्यन्यथासिद्धाः । तेन च कार्यविशेषं प्रति लघुनियतपूर्ववृत्तिभिन्नानामन्यथासिद्धसंज्ञा उद्घोषिता । विषयमिममेवमाहान्नम्भट्टः दीपिकायाम् – अन्यत्र क्लृप्तनियतपूर्ववृत्तिनैव कार्यसम्भवे तत्सहभूतमन्यथासिद्धम् इति । लघुनियतपूर्ववर्तित्वरूपमवश्यक्लृप्तत्वमत्र बोध्यम् । विश्वनाथोऽपि स्वाभिमतमित्थं प्रदर्शयति– **"अतिरिक्तमथापि यद् भवेत्"** इत्यादिना । कार्योत्पत्तौ लघुनियतपूर्ववृत्तित्वस्यैव कारणत्वम्, तद्भिन्नानां चान्यथासिद्धत्वम् । तथा च यद् घटव्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तद् घटजातीयं प्रति लघुनियतपूर्ववर्तिभिर्दण्डादिभिरेव घटोत्पत्तिसम्भवे रासभोऽन्यथासिद्धः । रासभस्य घटादिकारणताङ्गीकारे गौरवात् ।

**मूलम्– कार्यं प्रागभावप्रतियोगि** ।

**व्याख्या-** प्रागभावप्रतियोगित्वं कार्यत्वमिति कार्यस्य लक्षणम् । यथा कार्योत्पत्तेः पूर्वम् इह कपालयोः घटो भविष्यति, इह तन्तुषु पटो भविष्यतीत्याद्याकारा या प्रतीतिर्जायते । तस्याः प्रतीतेः विषयभूतो योऽभावः स प्रागभाव इत्युच्यते । तत्प्रतियोगि घटादिरूपं कार्यम् । यस्याभावः स प्रतियोगीत्युच्यते । प्रतियोगी नाम विरोधी । प्रागभावस्य यत् प्रतियोगि घटादिकं तदेव कार्यमित्याशयः । कालादावतिव्याप्तिवारणाय प्रागिति पदं दत्तम् । तत्पदानुपादाने अभावप्रतियोगित्वं कार्यत्वमित्येव लक्षणं स्यात् तदात्र अभावपदेन अन्योन्याभावस्यापि ग्रहणं भवत्येव । एवञ्च आकाशः कालो न इत्याकारकः प्रतीतिविषयभूतो योऽभावः सोऽन्योन्याभावः । एवम्भूताभावस्य प्रतियोगित्वं कालस्यापि वर्तते । अतस्तत्र अव्याप्तिः । तदर्थं प्रागिति पदं दत्तं मूले । कालस्तु नित्यः पदार्थः । न खलु तस्य प्रागभावत्वम् ।

**मूलम्– कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्** ।

**व्याख्या-** कारणं विभजते कारणं त्रिविधमित्यनेन । तद्यथा–समवायिकारणम्, असमवायिकारणम्, निमित्तकारणञ्चेति । यतो हि नैयायिका वैशेषिकाश्च कार्यमात्रं प्रति समवाय्यसमवायिनिमित्तभेदेन कारणत्रितयं स्वीकुर्वन्ति ।

**मूलम्– यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्** । **यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः** ।

**व्याख्या**-यस्मिन् समवेतम् = यत्समवेतम्, सत् = समवायेन सम्बद्धं सत्, कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः। यथा तन्तवः पटस्य इति उदाहरणम्। येषु तन्तुषु समवायेन सम्बद्धं सत् पटात्मकं कार्यमुत्पद्यते ते तन्तवः समवायिकारणमित्यर्थः। यस्मिन्नधिकरणे जन्यपदार्थः समवायसम्बन्धेन उत्पद्यते तदधिकरणं समवायिकारणमिति समवायिकारणलक्षणवाक्यस्य सामान्यार्थः। तमेवार्थं परिबोधयन् न्यायबोधिन्यां गोवर्धनमिश्र आह– समवायसम्बन्धावच्छिन्न-कार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकारणत्वं समवायिकारणत्वमिति। कार्यपदार्थस्य कारणपदार्थवृत्तिः कार्यतावच्छेदकसम्बन्धः समवायः।

कारणपदार्थस्य कार्याधिकरणवृत्तिः तादात्म्यसम्बन्धः कारणतावच्छेदकसम्बन्धः। कार्याधिकरणवृत्तिश्च कारणतावच्छेदकसम्बन्धेन ग्रहणीया। स च सम्बन्धः बहुविधः। एवं च स्वकारणतावच्छेदक तया यद्धर्मविशिष्टे यद्धर्मविशिष्टं कार्यं समवायेन उत्पद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणमिति तात्पर्यम्।

यथा तन्तवः पटस्य समवायिकारणम्। पटः कार्यम् अवयवी, तन्तवोऽवयवाः। तस्मात् तयोः सम्बन्धः समवायः। तन्तुषु तन्तवः तादात्म्येन वर्तन्ते। अतः तन्तुनिष्ठा कारणता तादात्म्यसम्बन्धावच्छिन्ना। पटनिष्ठकार्यता समवायसम्बन्धावच्छिन्ना। पटत्वावच्छिन्नं कार्यं पटः। पटः पटकारणतावच्छेदक-तन्तुत्वावच्छिन्ने तन्तुषु समवायेन जायते। अतः पटत्वावच्छिन्नं प्रति तन्तुत्वावच्छिन्नं समवायिकारणं भवति। समवायसम्बन्धेन घटाधिकरणे कपालादौ कपालादेः तादात्म्यसम्बन्धेनैव सत्त्वात् समवायसम्बन्धावच्छिन्न-घटत्वावच्छिन्न-कार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्न-कपालत्वावच्छिन्न-कारणतायाः कपालादौ सत्त्वात् लक्षणसमन्वयः। नैतावन्मात्रम्, अपि तु समवायेन जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यस्यैव कारणत्वाद् जन्यभावेषु द्रव्यगुणकर्मसु द्रव्यमेव समवायिकारणं भवति।

अयमभिप्रायः– समवायेन गुणकर्मादिषु घटादिजन्यद्रव्यानां वृत्तित्वाभावात् गुणकर्मादीनां न समवायिकारणत्वापत्तिः। अतो जन्यद्रव्ये तत्तद् द्रव्यावयवाः समवायिकारणरूपाः भवन्तीति न्यायदर्शनसिद्धान्तः। न च पटादयो यदा उत्पद्यन्ते तदैव रूपादयोऽपि जायन्ते, अतस्तयोः कार्यकारणभावसम्बन्धो नास्त्येव, समकालीनत्वेन पौवापर्यसम्बन्धाभावाद् इति वाच्यम्, तथात्वे गुणगुणिनोः समकालिकोपपत्तिप्रसङ्गापत्तिः। न खलु तयोरेककालिकत्वं शास्त्रसिद्धम्, एककालोत्पत्तौ गुणगुणिनोरभेदप्रसङ्गः। शास्त्रविरुद्धत्वात् तदसम्भवः।

यतो हि प्रथमक्षणे उत्पन्नं द्रव्यं निर्गुणं निष्क्रियञ्च तिष्ठति, उत्पत्तेरनन्तरमेव तत्र गुणादयो जायन्ते । अतो गुणेभ्यः पूर्वभावित्वात् द्रव्यं हि गुणादीनां समवायिकारणं भवति । न चाद्यक्षणे गुणाश्रयत्वाभावाद् द्रव्यत्वापत्तिरिति वाच्यम्, गुणाश्रययोग्यत्वं द्रव्यत्वमिति द्रव्यलक्षणस्वीकारात् । योग्यत्वञ्च गुणनामत्यन्ताभावाभावः । गुणाश्रययोग्यत्वं नाम प्रतियोगिव्यधिकरणगुणभावाभाव एव । यद्यपि उत्पन्नक्षणे जन्यद्रव्ये गुणाभावो वर्तते तथापि द्वितीयक्षणे गुणाभावस्य प्रतियोगिनो गुणस्योदयनात् गुणाभावः प्रतियोगिव्यधिकरणो न भवति । अतः प्रतियोगिसमानाधिकरणगुणाभावस्य जन्यद्रव्ये विद्यमानत्वात् गुणाश्रयत्वं द्रव्यत्वमिति द्रव्यलक्षणं आद्यक्षणोत्पन्नद्रव्ये समन्वितं भवति । अतः तत्राव्याप्तिदोषस्य प्रसक्तिरेव नास्ति ।

**मूलम्– कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्। यथा तन्तुसंयोगः पटस्य । तन्तुरूपं पटरूपस्य ।**

**व्याख्या-** समवायिकारणप्रत्यासन्नत्वे सति कार्योत्पादनसामर्थ्यावच्छिन्नत्वम् असमवायिकारणत्वमिति असमवायिकारणस्य लक्षणम् । असमवायिकारणशब्दस्य यथाश्रुतार्थस्तु समवायिकारणभिन्नजातीयः समवायवृत्तिपदार्थः । अनेनासमवायिकारणनिर्वचनेन निमत्तिकारणेऽस्य लक्षणस्यातिव्याप्तिप्रसङ्गः । यथा घटोत्पत्तौ समवायिकारणकपालभिन्नजातीयस्य कुम्भकारस्य समवायेन कपालावृत्तित्वात् तस्यासमवायिकारणत्वापत्तिः । शास्त्रविरुद्धत्वान्नैतत् स्वीकर्तुं शक्यते । अतो न समवायिकारणम् = असमवायिकारणमिति नञोऽर्थे न ग्रहणीयः । नञः षड्विधार्था भवन्ति । तेषु अर्थेष्वत्र नञोऽभावार्थो न ग्रहणीयः । यतो हि तादृशार्थग्रहणेन समवायिकारणभिन्नत्वान्निमित्तकारणे तुरीवेमादावतिव्याप्तिः ।

अतोऽत्र नञः सादृश्यरूपार्थः स्वीकर्तव्यः । तथा च समवायिकारणभिन्नत्वे सति समवायिकारणसादृश्यत्वमसमवायिकारणत्वमित्यर्थो जायते । सादृश्यञ्चात्र समवायिकारणवद् असमवायिकारणमपि कार्यनियतपूर्ववृत्तिः कार्यकालवृत्तिश्चोभयोः कारणयोरिति ज्ञेयम् । तथा च असमवायिकारणनाशे समवायिकारणनाशवद् भावकार्यनाशः सम्भवतीत्युभयोः सादृश्यमेव । यथा तन्तुसंयोगः पटस्य असमवायिकारणम् । तन्तुसंयोगः खलु गुणपदार्थः, अतः स च पटसमवायिकारणभूततन्तुषु समवायेन विद्यमानः सन् पटं जनयति । न खलु संयोगाभावाद् विच्छिन्नतन्तवः पटं जनयन्ति, अपि तु संयुक्तेषु सत्सु एव ते पटं जनयन्ति । समवायिकारणप्रत्यासन्नत्वमसमवायिकारणस्य द्विविधत्वमुक्तं ग्रन्थकारेण । यथा– कार्येण कारणेन वेत्यादिपदेन । तत्र कार्येण पटेन सहैकस्मिन्नर्थे तन्तौ समवेतत्वात् तन्तुसंयोगः पटकार्यस्यासमवायिकारणमिति कार्यैकार्थप्रत्यासत्तिः । एवमेव पटसमवायिकारणेन तन्तुना

सहैकस्मिन्नर्थे तन्तौ समवेतत्वात् तन्तुरूपं पटरूपस्यासमवायिकारणमिति कारणैकार्थप्रत्यासत्तिरिति सुकरो बोधः ।

**मूलम्– तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य ।**

**व्याख्या-** समवाय्यसमवायिभिन्नमवशिष्टं कारणं निमित्तकारणम् । एतदेवाह मूले– तदुभयभिन्नं कारणं निमित्तकारणमिति । एवमेव विश्वनाथेन कारिकावल्यामुक्तम्–**आभ्यां परं तृतीयं स्याद्** इति । आभ्यामिति पदं समवाय्यसमवायिकारणयोरुपलक्षणम् । न च समवाय्यसमवायिकारणभिन्नमात्रोक्तौ प्रतियोगिनः पृथक् पृथक् कार्यं प्रति भेदसत्त्वात् निखिलकार्यजातस्य दुर्ज्ञेयत्वात् तत्प्रतियोगिरूपेण समवाय्यसमवायिकारणद्वयस्याविज्ञानान्न तद्भिन्नत्वेन लक्षणं वक्तव्यमिति वाच्यम्, तत्र तदुभयाभ्यामिति पदद्वयस्य समवाय्यसमवायिकारणत्वाभ्यामिति तात्पर्येणोक्तत्वान्न दोषः। निमित्तकारणभेदात् कारणतावच्छेदकसम्बन्धस्यापि वैविध्यं भवति ।

यथा घटं प्रति दण्डः स्वजन्यभ्रमिजन्यभ्रमिमत्त्वसम्बन्धेन निमित्तकारणं भवति । अतः कार्यतावच्छेदकसम्बन्धेन घटाधिकरणे कारणतावच्छेदकस्वजन्यभ्रमिजन्यभ्रमिमत्त्वसम्बन्धेन योऽभावः तस्याप्रतियोगी दण्डो भवति । तेन दण्डे निमित्तकारणलक्षणं समन्वेति । एवं तुरीवेमादिकमपि पटं प्रति निमित्तकारणं भवति । तुरी = वयनसाधनम्, चित्रकारस्य चित्रनिर्माणसाधनम् (बुरुस, कुरुस) इति भाषायाम् । वेमा = वापदण्डः, वयत्यनेन इति वेमा वस्त्रवयनसाधनमित्यर्थः (चर्खा) इति भाषायाम् ।

निमित्तकारणमपि साधारणासाधारणभेदाद् द्विविधम् । तत्र कार्यसामान्यं प्रति साधारणनिमित्तकारणमष्टविधम् । यथा ईश्वरः, तस्य ज्ञानेच्छाप्रयत्नाः, दिक्, कालः, अदृष्टम्, तत्तत्कार्याणां प्रागभावाः एते विषयाः साधारणनिमित्तकारणानि भवन्ति । तत्र प्राच्यनैयायिकाः प्रतिबन्धकसंसर्गाभावमप्युररीकृत्य नवविधानि निमित्तकारणनीति स्वीकुर्वन्ति । असाधारणनिमित्तकारणानि तु कार्यभेदाद् बहुविधानि भवन्ति ।

**मूलम्–तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।**

**व्याख्या-** कारणस्वरूपं प्रदर्श्य यथाप्रसङ्गं तद्विशेषकरणस्वरूपमुपसंहरति ग्रन्थकारः तदेतदित्यादिना । तत्र तत्पदं त्रिविधकारणार्थकम् । तथा चोपर्युक्तेषु त्रिविधेषु कारणेषु यदसाधारणं कारणं तदेव

करणमित्यर्थः । अर्थादुपरि प्रदर्शितेषु त्रिविधेषु कारणेषु यत् कार्योत्पत्त्यनुकूलव्यापारजनकम् असाधारणं कारणं तदेव करणमित्युच्यते । कार्यसाधकानि कारणानि । क्रियासिद्धौ यत् प्रकृष्टोपकारकं तत् साधकतमम् । तदेव करणमित्याशयः । **'साधकतमं करणम्'** इति पाणिनिसूत्रं तत्र प्रमाणमिति वक्तुं शक्यते ।

## प्रत्यक्षप्रमानिरूपणम्

**मूलम्– तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्) तद् द्विविधं निर्विकल्पकं सविकल्पकञ्चेति ।**

**व्याख्या-** प्रमाभूतेषु प्रत्यक्षादिषु चाक्षुषादिप्रत्यक्षात्मकं यज्ज्ञानं जायते तादृशं ज्ञानं प्रति व्यापारवदसाधारणं कारणं चक्षुरादीन्द्रियं भवति । तदेव प्रत्यक्षं प्रमाणम् । तेन प्रत्यक्षप्रमाणेन जायमानं ज्ञानमपि प्रत्यक्षम् । प्रमाणमपि प्रत्यक्षम् । तथा च प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षप्रमाणस्य लक्षणमिति ज्ञायते ।

न्यायसूत्रे **इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्** (न्या.सू. १।१।४) इति प्रत्यक्षलक्षणमुक्तम् । अक्षस्य अक्षस्य प्रतिविषयं वृत्तिरिति न्यायभाष्यस्थवृत्तिपदस्य सन्निकर्षपरतया व्याख्यानाद् विषयेन्द्रियसन्निकर्षस्यैव प्रत्यक्षप्रमितेः करणत्वं सिद्ध्यतीति अर्वाचीनाः । नैयायिकैरीश्वरस्यापि प्रत्यक्षप्रमा भवत्येवेति कृत्वा ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति लक्षणान्तरं विहितम् । न चेदीश्वरस्य लोकसाक्षित्वहानिः प्रसज्येत । यतो हि ईश्वरप्रत्यक्षस्य नित्यत्वादिन्द्रियार्थसन्निकर्षजन्यत्वाभावादुक्तप्रत्यक्षलक्षणमीश्वरप्रत्यक्षेऽव्याप्तमित्यतो ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति प्रत्यक्षस्य लक्षणान्तरमुक्तम् । तेन चेश्वरप्रत्यक्षस्य ज्ञानाकरणकत्वाद् भवति प्रत्यक्षमात्रे लक्षणसमन्वयः ।

नैयायिकानामयमाशयः-परमात्मा अशरीरः, तस्येन्द्रियस्याविद्यमानत्वात् । अतो गौतमसूत्रोक्तं लक्षणमत्र नैव सङ्गच्छते । प्रत्यक्षे इन्द्रियस्यैव करणत्वम्, अनुमित्यादिषु च करणस्य ज्ञानद्वारोपयोग इति प्रत्यक्षे इन्द्रियज्ञानस्यानपेक्षितत्वेन ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति लक्षणान्तरमभिहितम् । तथा च प्रत्यक्षे इन्द्रियस्य, अनुमितौ व्याप्तिज्ञानस्य परामर्शस्य वा उपमितौ ह्यतिदेशवाक्यार्थस्मरणस्य, शाब्दबोधे च पदजन्यपदार्थोपस्थितेः करणत्वमायाति । उद्योतकरवाचस्पतिमिश्रादिभिर्नैयायिकैरपि एतेषामेव प्रमाकरणत्वमुक्तम् । न च इन्द्रियादीनां करणत्वं व्याहतमिति वाच्यम्,

व्यापारवदसाधारणकारणं करणमित्यर्थकरणेन इन्द्रियादीनामपि प्रत्यक्षकरणत्वमायाति । अतो व्यापारवत् कारणं करणमिति पक्षे प्रत्यक्षे इन्द्रियाणाम्, अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य करणत्वमायाति । प्रतिगतमक्षं प्रत्यक्षमिति **कुगतिप्रादयः (पा.सू. २।२।१८)** इति पाणिनिसूत्रेण प्रादिसमासनिष्पन्नं प्रत्यक्षपदं प्रत्यक्षप्रमित्यर्थमभिधत्ते ।

न्यायमते निर्विकल्पकसविकल्पकभेदाद् द्विविधं प्रत्यक्षम् ।

**मूलम्–तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । यथेदं किञ्चित् । सप्रकारकं ज्ञानं सविकल्पकं यथा डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयं पाचकोऽयमिति ।**

**व्याख्या-** विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वात् प्रथमं चक्षुःसंयोगानन्तरं घट इत्याकारकं घटत्वादिविशिष्टविषयकं ज्ञानं न सम्भवति । तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते । तच्च घटघटत्वे इत्याकारकं ज्ञानम् । तदेव निर्विकल्पकमित्युच्यते । प्रकारो नाम विशेषणम् । प्रकारत्वानिरूपकं निष्प्रकारकमिति भावः । विकल्पो नाम विशेषणविशेष्यभावः । तस्माद् विशेषणविशेष्यभावाद् विकल्पाद् निर्गतं निर्विकल्पकम् इति । अतः प्रकारताशून्यज्ञानत्वं निर्विकल्पकत्वमित्युच्यते । दूराद् दृष्टे वस्तुनि इदं किञ्चिद् इत्याकारकं यज्ज्ञानं तदेव निर्विकल्पकम् । सविकल्पकज्ञाने त्रिविधा विषयता भवति–प्रकारताख्या विषयता, विशेष्यताख्या विषयता, संसर्गताख्या विषयता । निर्विकल्पकज्ञानं तु विशेष्यविशेषणसंसर्गभावविलक्षणतुरीयविषयताकं स्वीक्रियते । अतो निर्विकल्पकज्ञानस्य विशेष्यताशून्यज्ञानत्वं संसर्गताशून्यज्ञानत्वं वा लक्षणमुपपन्नं भवति ।

सप्रकारकं ज्ञानं सविकल्पकमित्युक्तं मूले । संज्ञाजातिगुणक्रियाविशिष्टं ज्ञानं सविकल्पकं भवतीत्याशयः । अत्र प्रकारो नाम नामजात्यादिरूपो विशेषः । तेन सह वर्तत इति सप्रकारकम् । यथा–डित्थोऽयम्, ब्राह्मणोऽयम्, श्यामोऽयम्, पाचकोऽयमित्यादीनि उदाहरणानि । काष्ठमयस्य हस्तिनः संज्ञा डित्थः । डित्थोऽयमित्यादिकं ज्ञानं नामजात्यादिसम्बन्धविषयकम् । अत्र डित्थत्वब्राह्मणत्वश्यामत्वपाचकत्वादयः प्रकारतया प्रतीयते । तद्विशिष्टा डित्थब्राह्मणश्यामपाचका विशेष्यतया च प्रत्यक्षविषया भवन्ति । अतो ह्येवम्भूतं ज्ञानं सप्रकारकमित्युच्यते । प्रकारतानिरूपकं ज्ञानमित्यर्थः ।

# लौकिकसन्निकर्षनिरूपणम्

**मूलम्–प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः। संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति ।**

**व्याख्या-** प्रत्यक्षज्ञानोत्पत्तिक्रमश्चेत्थं वर्तते–आत्मा मनसा संयुज्यते, मनः इन्द्रियेण संयुज्यते, इन्द्रियञ्चार्थेन संयुक्तं भवति । ततश्च जनानामर्थस्य ज्ञानं जायते । एकेन इन्द्रियेण एकाधिकविषयाः युगपद् ज्ञातुं न शक्यन्ते। किन्तु एकाधिकेन इन्द्रियेण युगपज्ज्ञानं नोत्पद्यते। एतदेव मनसः सत्त्वे प्रमाणमित्याह सूत्रकारः– **युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्** (न्या.सू. १।१।१६) इति। मनोऽपि इन्द्रियमेव। चक्षुःकर्णनासिकाजिह्वात्वचां भेदेन ज्ञानेन्द्रियाणि पञ्च सन्ति। घटपटादयो विषयाः। सन्निकर्षाः = सम्बन्धाः संयोगादयो भवन्ति । षड्भिरिन्द्रियैर्यज्ज्ञानं जायते तत् प्रत्यक्षं ज्ञानं कथ्यते । यथा चक्षुषा जन्यं ज्ञानं चाक्षुषम्, श्रोत्रेण जन्यं ज्ञानं श्रावणम्, घ्राणेन जन्यं ज्ञानं घ्राणजम्, रसनया जन्यं ज्ञानं रासनम्, त्वचा जन्यं ज्ञानं त्वाचम्। तत्र मनसा जायमानं ज्ञानं मानसमित्युच्यते। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमित्युक्तं पूर्वम् ।

इन्द्रियाणां विषयैः सह सम्बन्धो भवति चेद् ज्ञानमुत्पद्यते । तत्र यः सम्बन्धो ज्ञानस्य कारणं भवति स सम्बन्ध एव सन्निकर्ष इत्युच्यते । इन्द्रियाणामर्थैः सह संसर्गे सति यद्वशादात्मनि ज्ञानं जायते स सम्बन्ध एव सन्निकर्षः। अर्था बहवः सन्ति। तैर्विषयैः सहेन्द्रियाणां बहुविधा सन्निकर्षा अपि भवन्ति । यथा प्रथमम् आत्मा मनसा युज्यते, मनः चक्षुषा युज्यते, चक्षुश्च घटपटादिना द्रव्येण संयुज्यते । चक्षुरिन्द्रियं तैजसमस्ति । अतस्तद् विषयदेशं गच्छति । चक्षुरपि द्रव्यम् । घटादिकम् अपि द्रव्यम् । अतो द्वयोः द्रव्ययोः संयोगो भवति । अस्मादेव संयोगाद् घटविषयकं चाक्षुषं ज्ञानं जायते । इदं सन्निकर्षजन्यं ज्ञानं प्रत्यक्षमुच्यते । तत्रायं संयोग एव सन्निकर्षाख्यः ।

एवं प्रकारेण इन्द्रियभेदेन विषयभेदेन च सन्निकर्षोऽपि भिद्यते। विशेषतो न्यायदर्शने लौकिकालौकिकभेदात् सन्निकर्षो द्विविधः। तयोर्मध्ये लौकिकसन्निकर्षः षड्विधः १.संयोगः, २.संयुक्तसमवायः, ३. संयुक्तसमवेतसमवायः, ४. समवायः, ५. समवेतसमवायः, ६. विशेषणविशेष्यभावः। तत्र विशेषणविशेष्यभावो नाम विशेषणत्वम्। विशेषणताख्यसन्निकर्षः, विशेष्यताख्यसन्निकर्षश्च। तथैवालौकिकसन्निकर्षश्च त्रिविधोऽस्ति सामान्यलक्षणज्ञानलक्षणयोगजभेदात् ।

**मूलम्– चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।**

**व्याख्या-** इदानीं यथाक्रमं प्रत्येकं सन्निकर्षस्योदाहरणं सप्रयोगं प्रस्तूयते चक्षुषेत्यादिना । अत्र सर्वत्रापि सन्निकर्षेषु आदौ इन्द्रियपदं योजनीयम् । चक्षुस्त्वङ्मनांसि द्रव्यप्रत्यक्षस्य कृते करणानि सन्ति । तथा च द्रव्यप्रत्यक्षे समवायसम्बन्धेन इन्द्रियसंयोगः सन्निकर्षः । यथा चक्षुरिन्द्रियेण घटस्य प्रत्यक्षे संयोगः सन्निकर्षो भवति । तदुक्तं मूले 'चक्षुषा घटप्रत्यक्षे...' इत्यादिकम् । संयोगसम्बन्धेन चक्षुस्त्वङ्मनोभिस्त्रिभिरिन्द्रियैर्द्रव्याणां प्रत्यक्षं जायते । द्रव्यग्राहकाणि तानीन्द्रियाणि । एतेषामिन्द्रियाणां द्रव्यैः सह संयोगेन द्रव्यप्रत्यक्षं भवति 'द्रव्ययोरेव संयोगः' इति नियमात् ।

**मूलम्– घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।**

**व्याख्या-** द्रव्यवृत्तिगुणप्रत्यक्षे संयुक्तसमवायः सन्निकर्षो भवति । तथा च पृथिव्यादिद्रव्येषु समवायेन विद्यमानानां गुणक्रियादीनां चक्षुरादीन्द्रियैः सह यः सन्निकर्षः स संयुक्तसमवाय इति । एतच्च मूलोक्तेन 'घटरूपप्रत्यक्षजनने...' इत्यादिना दर्शितम् । यथा चक्षुरिन्द्रियसंयुक्ते घटे रूपं समवायसम्बन्धेन वर्तते गुणगुणिनोः समवायात् ।

**मूलम्– रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् ।**

अत्रापि चक्षुषा इति पदमनुवर्तनीयम् । गुणादिवृत्तिजातिप्रत्यक्षे संयुक्तसमवेतसमवायो भवतीत्याशयः । रूपत्वात्मकं यत् सामान्यं तस्य प्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षो भवति । गुणक्रियादिषु समवायेन विद्यमानानां जात्यादीनामिन्द्रियैः सह यः सन्निकर्षः स संयुक्तसमवेतसमवायः । रूपे विद्यमाना रूपत्वजातिः । रूपत्वस्य चक्षुषा परम्परया सम्बन्धः सम्भवति । यथा चक्षुषा घटः संयुक्तः, तस्मिन् घटे रूपं समवेतम् । तत्र च रूपे रूपत्वजातिः समवायेन वर्तते । अतो रूपत्वसामान्यविषयकप्रत्यक्षं प्रति संयुक्तसमवेतसमवायः सन्निकर्षः ।

**मूलम्– श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वाद् गुणगुणिनोश्च समवायात् ।**

**व्याख्या-** कर्णविवरवर्ति आकाशरूपं श्रोत्रमिन्द्रियम् । श्रोत्रेन्द्रियेण शब्दप्रत्यक्षे समवायनामकः सन्निकर्षो भवति । गुणो यत्र वर्तते स गुणी कथ्यते । अत्र गुणि आकाशम् । तस्य विशेषगुणः शब्दः । 'गुणगुणिनोः समवायः' इति नियमात् श्रोत्रेन्द्रियेण सह शब्दस्य समवायः सन्निकर्ष इति स्पष्टम् ।

**मूलम्– शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।**

**व्याख्या-** ग्रन्थकारः समवेतसमवायसन्निकर्षमुदाहरति शब्दत्वेत्यादिना । एवञ्च यदि यो विषयस्तस्येन्द्रियस्य गुणगतं रूपम्, तादृशगुणवृत्तिजातेश्चेन्द्रियेण साक्षात्कारे कर्तव्ये समवेतसमवायः सन्निकर्षो भवति । यतो हि शब्दे समवेतस्य शब्दत्वसामान्यस्य श्रोत्रेण सह समवेतसमवायः सन्निकर्षो भवतीत्याशयः । तत्र कारणमाह (श्रोत्रसमवेत इत्यादिना) । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायसम्बन्धो वर्तते । अतः समवेतसमवाय इत्युक्तम् । अत्र समवायो नित्यः । अतस्तस्य व्यापारत्वं भवितुमर्हति, जन्यत्वाभावादित्याशङ्कायामुच्यते– तादृशशब्दत्वप्रत्यक्षं प्रति श्रोत्रमनःसंयोगस्य व्यापारत्वान्न कश्चन दोषप्रसङ्गः ।

**मूलम्– अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः । घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।**

**व्याख्या-** अत्रान्तिमं विशेषणविशेष्यभावं सन्निकर्षमाह अभावप्रत्यक्षेत्यादिना । घटाद्यभावानां चक्षुषा 'घटाभाववद् भूतलम्' इत्येवं प्रत्यक्षं भवति । अभावस्यापि प्रत्यक्षं भवत्येव । तादृशाभावप्रत्यक्षे विशेषणभावो विशेष्यभावश्चेति सन्निकर्षो भवति । इन्द्रियसम्बद्धविशेषणत्वम्, इन्द्रियसम्बद्धविशेष्यत्वमिति भावः । घटस्याभावो घटाभावः, घटाभावोऽस्यास्तीति तद् घटाभाववद् । तादृशं भूतलमस्तीत्यर्थः । अत्र चक्षुर्हि भूतलेन संयुक्तं भवति । तत्र च घटाभावो विशेषणमिति संयुक्तविशेषणता चक्षुरभावयोः सन्निकर्षो भवति, यतो ह्यत्र विशेषणविशेष्यभावो नाम विशेषणभावः (विशेषणता) विशेष्यभावः (विशेष्यता) इति । घटाभाववद् भूतलमित्यत्र विशेषणभावः सन्निकर्षः । एवं च 'इह भूतले घटो नास्ति' इत्यादौ विशेष्यभावः सन्निकर्षो ज्ञातव्यः । यदा घटाभाववद् भूतलम् इति प्रतीतिर्भवति तदा घटाभावो विशेषणं भूतलं विशेष्यञ्चेति अवगम्यते । यदा भूतले घटो नास्ति इति प्रतीतिर्जायते तदा भूतलं विशेषणं घटाभावो विशेष्यो भवतीति बोद्धव्यम् । तत्र घटाभावस्य भूतले विशेषणत्वात्, विशेषणताख्यसन्निकर्षेण घटाभावविषयकं प्रत्यक्षं जायते ।

**अयमत्र विशेषः**

लौकिकालौकिकभेदेन प्रत्यक्षं द्विविधमस्ति । लौकिकं तु संयोगादिसन्निकर्षषट्कजन्यमुपरि वर्णितम् । अलौकिकं प्रत्यक्षमिहोच्यते । अलौकिकः सन्निकर्षः त्रिविधः सामान्यलक्षणज्ञानलक्षणयोगजश्चेति । सामान्यम् = जातिः, धूमादिव्यक्तिश्च लक्षणम् = स्वरूपं यस्य सः सामान्यलक्षणः । यत्रैकधूमे ज्ञाते सति यादृशधूमत्वरूपसन्निकर्षेण सकलधूमानां ज्ञानं भवति तादृशधूमत्वरूपसन्निकर्षः सामान्यलक्षणमित्युच्यते । ज्ञानमेव लक्षणं स्वरूपं यस्य स ज्ञानलक्षणः । यथा सुरभिचन्दनमित्युक्ते चाक्षुषे यादृशसौरभस्मरणेन सौरभस्यापि भानं भवति तादृशस्मरणात्मकः सन्निकर्षो ज्ञानलक्षण इत्युच्यते । योगाभ्यासजनितयादृशविलक्षणधर्माद् देशान्तरीयकालान्तरीयवस्तुज्ञानं जायते तादृशो योगजो धर्मः योगलक्षणसन्निकर्ष इति । अयन्तु योगाभ्यासजनितधर्मविशेष इति । अस्यापि युक्तयुञ्जानभेदो वर्तते । एतदाह विश्वनाथः– **युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः** इति । युक्तः सिद्धः । युञ्जानस्तु साधक इति बोध्यम् ।

**मूलम्– एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम् । तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।**

**व्याख्या-** इदानीं ग्रन्थकार एवमिति पदमाध्यमेन प्रत्यक्षप्रमाणमुपसंहरति । एवमित्यस्य उपर्युक्तक्रमेणेत्यर्थः । तथा च षड् अवयवा यस्य तत् षट्कम्, सन्निकर्षाणां षट्कं सन्निकर्षषट्कम्, सन्निकर्षषट्केन जन्यं सन्निकर्षषट्कजन्यम् । अनेन क्रमेण षड्विधैः सन्निकर्षैः समुत्पन्नं ज्ञानमेव प्रत्यक्षज्ञानमित्युच्यते । एतादृशप्रत्यक्षप्रमां प्रति व्यापारवदसाधारणं कारणं घ्राणरसनाचक्षुस्त्वक्छोत्रमनोरूपं षड्विधमिन्द्रियमेव प्रत्यक्षप्रमाणमिति ज्ञेयम् । व्यापारस्तु इन्द्रियार्थसन्निकर्षः । फलं षड्विधचाक्षुषादिप्रत्यक्षं ज्ञानम् ।

सर्वमपि कार्यं स्वस्वकारणसमवधाने सत्युत्पद्यते । कारणेषु यदि कश्चन लोपो दोषो वा स्यात् तर्हि कार्यं नोत्पद्यते । यदि ततः कथञ्चिदपि उत्पद्येत तथा सति दोषयुक्तमेव भवति तत् । तद्वज्ज्ञानमपि बोध्यम् । यदि ज्ञानकारणसामग्री सर्वाप्यनुकूला दोषरहिता च भवति, तदैव प्रमात्मकं यथार्थज्ञानमुत्पद्यते । तादृशमुत्पन्नं ज्ञानं च यथार्थं भवति । नो चेत् तदवगुणयुक्तमयथार्थं च भवति । तथा च प्रत्यक्षप्रमां प्रति इन्द्रियाणां पाटवम्, पित्तादिदोषराहित्यम्, विषयाणां च अदूरवर्तित्वम्, प्रकाशादिसाहित्यम्, प्रधानतया इन्द्रियाणां समुचितविषयैः सह क्रमेण सन्निकर्षोऽपेक्षितो भवति । प्रत्यक्षमूलकत्वादनुमानस्य प्रत्यक्षविषयकज्ञानमनुमानस्य कृतेऽप्यपेक्षितम् । अतो ग्रन्थकारेण पूर्वं प्रत्यक्षं निरूपितम् । ततः परं यथाप्रसङ्गमनुमानं निरूप्यते ।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| चित्ररसः | = | मिश्रितो रसः । |
| चित्रं रूपम् | = | मिश्रितं रूपम् । |
| कपिशवर्णः | = | कृष्णपीतमिश्रितवर्णः (खैरो) इति भाषायाम् । |
| सुरभिः | = | सुगन्धः । |
| तापितम् | = | उष्णीकृतम् । |
| अपेक्षाबुद्धिः | = | अयमेकः, अयमेक इत्यनेकत्वविषयिका बुद्धिः । |
| मानम् | = | इयत्ता |
| पतनम् | = | वृक्षादिविभागजनकव्यापारमारभ्य भूम्यादिसंयोगजनकव्यापारपर्यन्तं सर्वा क्रिया । |
| अतीन्द्रियम् | = | इन्द्रियाग्राह्यम् । |
| दैशिकम् | = | देशकृतम्, दिगुपाधिजन्यमित्यर्थः । |
| कालिकम् | = | कालकृतम्, कालोपाधिजन्यमित्यर्थः । |
| अन्यतरः | = | द्वयोरेकः । |
| स्यन्दनम् | = | प्रस्रवणरूपा क्रिया । |
| सांसिद्धिकम् | = | स्वाभाविकम्, जलवृत्तिद्रवत्वम् । |
| वीचिः | = | तरङ्गः । |
| तरुः | = | वृक्षः । |
| बुद्धिः | = | ज्ञानम् । |
| व्यावर्तकः | = | विच्छेदकः । |
| व्यवहारः | = | शब्दप्रयोगः । |

## अभ्यासः

### १. अतिसंक्षिप्तमुत्तरं देयम्

(क) गन्धः कतिविधः ?

(ख) स्पर्शाः कति ? के च ते ?

(ग) स्पर्शस्याश्रयाः के ?

(घ) पाकजं नाम किम् ?

(ङ) परिमाणं कतिविधम् ?

(च) ज्ञानस्याधिकरणं किम् ?

(छ) कालकृतं परत्वं कुत्र ?

(ज) गुरुत्वं नाम किम् ?

(झ) नैमित्तिकद्रवत्वं कुत्र ?

(ञ) शब्दः कुत्र तिष्ठति ?

(ट) यथार्थानुभवः कतिविधः ?

(ठ) करणं नाम किम् ?

(ड) प्रत्यक्षं ज्ञानं कतिविधम् ?

(ढ) लौकिकसन्निकर्षः कतिविधः ?

(ण) शब्दत्वप्रत्यक्षे कः सन्निकर्षः ?

### २. रिक्तस्थानं पूरयत

(क) स च मधुराम्ल ... षड्विधः ।

(ख) रूपादिचतुष्टयम् ... च ।

(ग) तदुभयभिन्नं ... निमित्तकारणम् ।

## ३. परस्परं मेलयत

| | |
|---|---|
| सुरभिः | स्पर्शः |
| अनुष्णाशीतः | सुगन्धः |
| सन्निकर्षः | अधिकदेशवृत्तित्वम् |
| कटुः | शब्दः |
| परत्वम् | रसभेदः |
| श्रोत्रग्राह्यः | सम्बन्धः |

## ४. व्याख्यात्मकमुत्तरं देयम्

(क) गन्धलक्षणं विलिख्य पाकजगुणान् व्याख्यात ।

(ख) परिमाणस्य लक्षणं विलिख्य तद्भेदान् दर्शयत ।

(ग) करणलक्षणं विलिख्य कार्यस्वरूपं प्रतिपादयत ।

(घ) निमित्तकारणस्य स्वरूपं स्फुटीकुरुत ।

(ङ) अन्यथासिद्धनिरूपणपूर्वकं कारणलक्षणं प्रतिपादयत ।

(च) प्रत्यक्षज्ञानहेतुभूतसन्निकर्षस्य भेदान् प्रकाशयत ।

(छ) सविकल्पकनिर्विकल्पकप्रमयोः स्वरूपं दर्शयत ।

(ज) सभेदमलौकिकसन्निकर्षस्य स्वरूपं स्पष्टीकुरुत ।

## ५. वर्णनात्मकमुत्तरं दीयताम्

(क) सपदकृत्यं रूपस्य लक्षणं विमृशत ।

(ख) सभेदं रसस्य लक्षणं लिखत ।

(ग) स्पर्शस्य लक्षणं विलिख्य तद्भेदान् दर्शयत ।

(घ) सङ्ख्यायाः स्वरूपं विवेचयत ।

(ङ) सभेदं शब्दं निरूपयत ।

(च) बुद्धेर्लक्षणं प्रदर्श्य तद्भेदान् निर्दिशत ।

## ६. कक्षाभ्यासो गृहाभ्यासश्च

(क) रसभेदविषये सखिभिस्सह चर्चा विधेया ।

(ख) कारणस्वरूपमाश्रित्य एकमनुच्छेदं लिखत ।

(ग) कक्षायां लौकिकसन्निकर्षस्योदाहरणपूर्वकः संवादो विधेयः ।

## ७. परियोजनाकार्यम्

(क) 'यथार्थानुभवः तत्करणं च' इत्यस्मिन विषये प्रतियुग्मं शास्त्रार्थो विधेयः ।

(ख) सन्निकर्षोदाहरणानां स्पष्टतायै चित्रं निर्माय कक्षायां प्रस्तुत ।

## ८. रचनात्मकोऽभ्यासः सर्जनात्मकोऽभ्यासश्च

(क) 'षड्विधेषु रसेष्वन्यतमो मधुरः' इति शीर्षकमधिकृत्य लघुनिबन्धो लेखनीयः ।

(ख) 'गुणेषु परिमाणम्' इति शीर्षके अन्तर्जालमाध्यमेन अनुच्छेदद्वयं रचनीयम् ।

चतुर्थः पाठः

# अनुमानोपमानशब्दप्रमाणप्रकाशनम्

## अनुमाननिरूपणम्

प्रथमतः सङ्गतिः निरूप्यते । एकप्रकरणनिरूपणानन्तरमपरप्रकरणनिरूपणे काचित् सङ्गतिरपेक्ष्यते । अत्र प्रत्यक्षं निरूपितम् । इदानीमनुमानं निरूपणीयं वर्तते । प्रत्यक्षमूलकमनुमानं भवति । प्रत्यक्षं विना अनुमानासम्भवात् । अतः प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे उपजीव्योपजीवकभावसङ्गतिः । अत्रोपजीव्यञ्च उपजीवकञ्चेति व्युत्पत्त्या उपजीव्योपजीवके, तयोः (उपजीव्योपजीवकयोः) भावः = उपजीव्योपजीवकभावः = उपजीव्यत्वम्, उपजीवकत्वञ्चेत्यर्थः । तत्रोपजीव्यत्वं नाम = कारणत्वमर्थश्चेदुपजीवकत्वमित्यस्य कार्यत्वमित्यर्थो भवति । अस्यैव नामान्तरं कार्यकारणभावः । ततश्च प्रत्यक्षकार्यमनुमानमित्यतः प्रत्यक्षनिष्ठोपजीव्यता (कारणता) निरूपितोपजीवकता (कार्यता) अनुमाने वर्तते । एतेन प्रत्यक्षकार्यमनुमानं भवतीति सिद्ध्यति । अतश्च प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे पूर्वोक्तरीत्या उपजीव्योपजीवकभावसङ्गतिरुपपन्ना भवतीति प्रत्यक्षकार्यत्वसम्बन्धेनानुमाननिरूपणं विधीयते ।

सङ्गतिसामान्यलक्षणं तु अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयस्मरणानुकूलसम्बन्धत्वम् । सा च सङ्गतिः निरूपणीयपदार्थनिष्ठा भवति । अत्र प्रत्यक्षनिरूपणानन्तरमनुमानं निरूप्यते, तस्मात् प्रत्यक्षनिरूपणपश्चादनुमाननिरूपणे प्रयोजिका जिज्ञासा अनुमानविषयकं ज्ञानं मे जायतामित्याकरिका, तादृशज्ञानजनकमनुमानज्ञानं मदिष्टजनकमित्याकारकम्, तद्विषयकं यदनुमानं तत्स्मरणरणानुकूलसम्बन्धः प्रत्यक्षकार्यत्वम्, तच्चानुमाननिष्ठमिति प्रत्यक्षकार्यत्वसम्बन्धेन प्रत्यक्षनिरूपणानन्तरमनुमानं निरूप्यते । सा च सङ्गतिः षड्विधा । तद्यथा-

**सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा ।**
**निर्वाहकैक्यं कार्यैक्यं षोढा सङ्गतिरिष्यते** ॥ इति ।

अर्थात् १. प्रसङ्गः २. उपोद्घातः ३. हेतुता ४.अवसरः ५. निर्वाहकैक्यम् ६. कार्यैक्यमिति । अत्र षड्विधासु सङ्गतिषु हेतुताख्या सङ्गतिरेव उपजीव्योपजीवकभावसङ्गतिरथवा कार्यकारणभावसङ्गतिरिति नाम्ना च व्यवह्रियते ।

"असङ्गतं न प्रयुञ्जीत" इत्यभियुक्तानां निर्देशो वर्तते । तन्निर्देशमनुसृत्यैव कारणनिरूपणानन्तरं प्रकरणानुसारेण कार्ये निरूपणीये कार्यत्वसङ्गतिर्भवति । तथैव यथाप्रकरणं कारणत्वसङ्गतिरपि सम्भवत्येव । तथा च किमस्य कार्यं कारणं वेति जिज्ञासायां सत्यां यथायथं कार्यत्वं कारणत्वञ्चेति द्वयमपि सङ्गतिः । इयमेवोपजीव्योपजीवकभावसङ्गतिरित्यर्थः । तथैव प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणेऽवसरसङ्गतिरपि प्रवर्तते । प्रतिबन्धकजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वमवसरसङ्गतित्वम् । यथा प्रत्यक्षनिरूपणानन्तरम् अनुमानप्रतिबन्धिका जिज्ञासा निवृत्ता भवति, तस्यां निवृत्तावश्यवक्तव्यत्वमनुमानस्य प्राप्तत्वादवसरसङ्गतिश्चात्र सङ्गच्छते ।

अनेन प्रकारेण सङ्गतिद्वयमाश्रित्य प्रत्यक्षनिरूपणानन्तरमनुमानस्य निरूपणमुपपद्यते । यतो हि यद्यत्सङ्गतिमद् भवति तत्तदनन्तरं निरूपणीयं भवतीति सर्वानुभवसिद्धस्य नियमस्य विद्यमानत्वादिति भावः ।

चतुर्षु प्रमेयव्यवस्थापकेषु द्वितीयमनुमेयपदार्थव्यवस्थापकमनुमानप्रमाणं स्वीकुर्वन्ति नैयायिकाः । अनु = पश्चात् मीयते = ज्ञायते येनेति व्युत्पत्त्या अनु- उपसर्गपूर्वकमाधातोः करणार्थे ल्युट्प्रत्यये कृते ह्यनुमानपदं निष्पन्नं भवति । यतो हि यद् यदनुमानं तत्तत्प्रत्यक्षपूर्वकमिति अनुमानमात्रं प्रत्यक्षपूर्वकमेवेति निश्चीयते ।

तत्र अनुपूर्वकमाधातोरर्थः = अनुमा, अनुमितिरित्यर्थः । चतस्रः प्रमितयः स्वीक्रियन्ते नैयायिकैः । ताश्च प्रत्यक्षानुमित्युपमितिशाब्दरूपाः । तासु अनुमित्यात्मिका प्रमा द्वितीया । तादृशानुमितेर्यदसाधारणं कारणं तदेवानुमानम् । अत्र करणार्थे ल्युट्प्रत्ययो विहितो वर्तते । ततश्च प्रकृत्यर्थप्रत्ययार्थसमुदितार्थोऽनुमितिकरणम् । तथा चानुमितिकरणमनुमानम् इत्यनुमानस्य लक्षणमुपपन्नं भवति । तत्र करणं नाम व्यापारवदसाधारणं कारणमित्युच्यते । यत्सत्त्वे कार्यमवश्यमुत्पद्यते तदेवासाधारणं कारणमित्यर्थः । करणमित्यस्यैव असाधारणकारणतावत्त्वमर्थः । ततश्चानुमितिप्रमां प्रति असाधारणकारणतावत्त्वमनुमानप्रमाणस्य लक्षणम् ।

**मूलम्–अनुमितिकरणमनुमानम् ।**

**व्याख्या-** अत्रानुमानस्य लक्षणं निर्दिष्टम् । तत्र लक्ष्यबोधकं पदमनुमानञ्चेल्लक्षणबोधकं पदं तावदनुमितिकरणमिति । यतो हि अनुमानं लक्ष्यीकृत्य तल्लक्षणं विधीयते- अनुमितिकरणमिति । यथा- पर्वतो वह्निमानित्याकारिका या अनुमितिस्तां प्रति लिङ्गपरामर्शः करणमिति नव्याः प्रतिपादयन्ति । अतः पर्वतो वह्निमानित्यनुमितिकरणं भवति वह्निव्याप्यधूमवानयमिति लिङ्गपरामर्शात्मकं ज्ञानं करणमिति तादृशलक्ष्ये भवति लक्षणसमन्वयः ।

अत्र लिङ्गपरामर्शजन्या अनुमितिः, अतस्तादृशी या अनुमितिः सा कार्या, तादृशानुमित्यात्मके कार्ये कार्यता वर्तते, कार्यताया निरूपितत्वसम्बन्धेनान्वयः कारणतायां भवति । तथा चानुमितिनिष्ठकार्यतानिरूपिताऽसाधारणकारणतावत्त्वं लिङ्गपरामर्शे विद्यमानत्वाद् भवति लक्षणसमन्वयः । अतो ह्यत्रानुमितिकरणमित्यनेन लिङ्गपरामर्शात्मकमनुमानं गृह्यते, तदेवानुमानमित्यर्थः पर्यवस्यति । केचन व्याप्तिज्ञानमेवानुमितिं प्रति करणमित्युपपादयन्ति । अतस्तन्मतेनानुमितिं प्रति व्याप्तिज्ञानं करणम्, तदेवानुमानमिति सिद्ध्यति । अनुमितिं प्रति व्याप्तिज्ञानस्य करणत्वस्वीकारपक्षे तु पर्वतो वह्निमानित्यनुमितिं प्रति वह्निव्याप्यो धूमः" इति व्याप्तिज्ञानमसाधारणं कारणं भवति, तदेव करणमित्युच्यते ।

तथा च पर्वतो वह्निमानित्याकारिका या अनुमिति, तादृशानुमित्यात्मके कार्ये कार्यता वर्तते, तथाविधानुमितिनिष्ठकार्यतानिरूपिताऽसाधारणकारणत्वं व्याप्तिज्ञाने वर्तत एवेति व्याप्तिज्ञानमेवानुमानमिति केचन नैयायिकाः सिद्धान्तयन्ति ।

अत्र तर्कसङ्ग्रहकारस्तु अनुमितिं प्रति लिङ्गपरामर्शस्यैव करणत्वं स्वीकृत्य लिङ्गपरामर्शोऽनुमानमिति मतं व्यवस्थापयति । अत्र न्यायबोधिन्यामनुमितिप्रक्रियाऽनेन प्रकारेण प्रदर्शिता वर्तते । तथा चानुमित्यात्मकं कार्यं प्रति व्याप्तिज्ञानं करणं भवति, तत्र परामर्शश्च व्यापार इत्युच्यते । कस्तावद् व्यापार इति जिज्ञासायामुच्यते तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारस्य लक्षणम् । अत्र तत्पदद्वयं प्रयुक्तं वर्तते । उभाभ्यां तत्पदाभ्यां व्याप्तिज्ञानं गृह्यते । यतो हि व्याप्तिज्ञानजन्यः परामर्शो भवति, तथैव द्वितीयतत्पदेनापि व्याप्तिज्ञानं गृह्यते तज्जन्यानुमितिस्तज्जनकश्च परामर्श इति । तथा च व्याप्तिज्ञानजन्यो व्याप्तिज्ञानजन्यानुमितिजनकश्च परामर्श इति परामर्शस्य व्यापरत्वं सङ्गच्छते ।

यथा- पर्वतो वह्निमानित्यनुमितिं प्रति "वह्निव्याप्यो धूमः" इत्याकारकं व्याप्तिज्ञानमसाधारणं कारणं भवति । तत्र वह्निव्याप्यो नाम वह्निरूपं यत्साध्यं तन्निरूपिता या व्याप्तिस्तदाश्रयो

(हेतुभूतः) धूमः। अर्थात् साध्यनिरूपितव्याप्त्याश्रयो हेतुरित्यर्थः। एवम्भूतं यद् व्याप्तिज्ञानम्। ततस्तादृशव्याप्तिविशिष्टहेतोः पक्षेण सह यः सम्बन्धस्तद्विषयकं ज्ञानं परामर्श इत्युच्यते। तादृशपरामर्शादनुमित्यात्मकं कार्यमुत्पन्नं भवति। तदेव फलमित्यर्थः। उक्तव्याप्तिज्ञानात् प्रकृतस्थले वह्निव्याप्यधूमवानयं पर्वत इत्यात्मकः परामर्शो जायते, तादृशपरामर्शाच्च पर्वतो वह्निमानित्याकारिका ह्यनुमितिरुत्पद्यते। अनया रीत्या परामर्शात्मकव्यापारद्वारा अनुमित्यात्मकं कार्यं प्रति व्याप्तिज्ञानस्य असाधारणकारणत्वाद् व्याप्तिज्ञानमनुमानमिति फलितार्थः। अत एवानुमानलक्षणमुक्तमनुमितिकरणमनुमानमिति।

### पदानां प्रयोजनम्

प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे का सङ्गतिर्भवतीत्यस्मिन् विषये प्रागेव सङ्गतिनिरूपणावसरे स्फुटीकृत्य व्याख्यातं वर्तते। अत्र अनुमीयते अनेनेति करणव्युत्पत्त्या अनुमानमिति पदं निष्पद्यते। तदर्थश्चानुमिति करणम्। अनुमितेः करणम् = असाधारणं कारणमिति। अत्रानुमानलक्षणघटके अनुमितिः करणञ्चेति द्वे पदे स्तः। तत्रानुमितिपदानुपादाने करणमनुमानमिति लक्षणं भवति। तथा सति परशुना छिनत्तीत्यादौ छेदनक्रियां प्रति परशुः करणं भवतीति अलक्ष्ये परशौ अनुमानस्य लक्षणं गच्छति। ततश्च अलक्ष्ये लक्षणगमनाद् भवत्यतिव्याप्तिदोषः, अतस्तद्वारणाय अनुमिति पदमावश्यकम्।

तदुपादाने च परश्वादौ करणत्वस्य सत्त्वेऽपि तत्रानुमितित्वं नास्तीति नातिव्याप्तिः तथैवानुमितिपदम् अनूपसर्गपूर्वकमाधातोर्भावे क्तिन्प्रत्यये कृते निष्पन्नं भवति। तत्र अनु इति उपसर्गपदञ्चेदनुमितिरिति प्रकृतिरूपं प्रातिपदिकं पदम्। अत्र अनुरित्युपसर्गपदानुपादाने मितिमात्रमित्युच्यते चेत्तदा तादृशमितित्वस्य प्रत्यक्षादावपि सत्त्वादतिव्याप्तिः अतस्तद्वारणायानुपदं निवेश्यते। तथा सति प्रत्यक्षादौ प्रत्यक्षानन्तरत्वाभावान्नातिव्याप्तिः। इत्थञ्च अनुमितेः करणमिति षष्ठीतत्पुरुषसमासं विधाय समस्तमनुमितिकरणं यत्तदेवानुमानमित्यर्थः पर्यवस्यति।

## अनुमितिनिरूपणम्

**मूलम्– परामर्शजन्यं ज्ञानमनुमितिः।**

**व्याख्या-** इतः प्रागमनुमानलक्षणं व्याख्यातम्। इदानीं प्रसङ्गसङ्गत्या अनुमानलक्षणघटकी-भूतमनुमितिलक्षणमुच्यते। यतो हि अनुमितिनिरूपणं विना तद्घटितमनुमानं निरूपयितुं न

शक्यते । अत एव अनुमानलक्षणघटकीभूता अनुमितिः का इति जिज्ञासायामुच्यते- परामर्शजन्यं ज्ञानमनुमितिरिति ।

परामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणम् । अत्रानुमितिर्लक्ष्या चेत् परामर्शजन्यं ज्ञानं लक्षणम् । तथा चानुमितौ परामर्शजन्यत्वं ज्ञानत्वञ्च वर्तत इति भवति लक्ष्यीभूतेऽनुमित्यात्मके ज्ञाने लक्षणसमन्वयः । यतो हि परामर्शात्मकाद् ज्ञानादनुमितिर्जन्यते । अतः परामर्शजन्या अनुमितिर्भवति । सा च अनुमित्यात्मिका प्रमा = प्रकृष्टं ज्ञानमित्यर्थः । तस्मात्तादृशप्रमात्मिकायामनुमितौ ज्ञानत्वं वर्तत एवेति परामर्शजन्यत्वविशिष्टज्ञानत्वस्य विद्यमानत्वाद् भवति लक्ष्ये लक्षणसमन्वयः । यथा- पर्वतो वह्निमानित्यनुमितिं प्रति वह्निव्याप्यधूमवानयं पर्वत इत्याकारकः परामर्शः कारणं भवति ।

अतस्तादृशपरामर्शेन पर्वतोद्देश्यकवह्निविधेयकपर्वतो वह्निमानित्यनुमितिरुत्पद्यते । तेन पर्वतो वह्निमानित्यनुमितेर्वह्निव्याप्यधूमवानयं पर्वत इत्याकारको वह्निव्याप्तिविशिष्टधूमप्रकारकः पर्वतविशेष्यकः परामर्शो जनकः, तादृशजनके जनकताख्यो धर्मो वर्तते । तथाविधजनकतानिरूपिता जन्यता भवति, जन्यजनकपदार्थयोर्जन्यजनकभावरूपसम्बन्धात् । तत्र परामर्शस्य जन्यतासम्बन्धेन अनुमित्यात्मके ज्ञानपदार्थेऽन्वयो भवति चेदनुमित्यात्मकज्ञानस्य च जनकत्वसम्बन्धेन परामर्शात्मके ज्ञानेऽन्वयः । ततश्च परामर्शनिष्ठजनकतानिरूपितजन्यतावती अनुमितिर्यथा भवति तथैवानुमितिनिष्ठजन्यतानिरूपितजनकतावान् परामर्श इति रीत्याऽनुमितिपरामर्शयोर्जन्यजनकभावः । अत्र जन्यजनकभावो नाम = जन्यत्वं जनकत्वञ्चार्थः । एतादृशं जन्यत्वं जनकत्वञ्च सम्बन्धविशेष एव ।

अत्र परामर्शजन्यत्वे सति ज्ञानत्वमित्यनुमितिलक्षणे दलद्वयं वर्तते परामर्शजन्यत्वमेकं दलम् , तच्च विशेषणबोधकम् । यतो हि सतीति सप्तम्यन्तं पदं तेन परामर्शजन्यत्वस्य विशेषणत्वं द्योत्यते । तद् विशिष्टं ज्ञानत्वमिति रीत्या परामर्शजन्यत्वविशिष्टं ज्ञानत्वमित्यनुमितिस्वरूपमुपपन्नं भवति ।

## पदानां प्रयोजनम्

अनुमितिलक्षणघटकं सत्यन्तं परामर्शजन्यत्वमिति विशेषणपदं न निवेश्यते चेद् ज्ञानत्वमनुमितेर्लक्षणं भवति । तथा सति ज्ञानत्वं ज्ञाने तिष्ठतीति प्रत्यक्षादावपि तादृशज्ञानत्वस्य सत्त्वाद् भवत्यतिव्याप्तिः । यतो हि प्रत्यक्षात्मके ज्ञानेऽपि ज्ञानत्वं वर्तत एवेति अलक्ष्ये प्रत्यक्षादौ लक्षणस्य गमनाद्

भवत्यतिव्याप्तिदोषः । तद्वारणाय सत्यन्तं परामर्शजन्यत्वमिति विशेषणदलं निवेश्यते । तन्निवेशे च प्रत्यक्षादौ ज्ञानत्वस्य सत्त्वेऽपि परामर्शजन्यत्वाभावान्नानुमितिलक्षणमतिव्याप्तं भवितुमर्हति ।

अतः परामर्शजन्यत्वविशेषणमावश्यकम् । तथैव परामर्शजन्यत्वमात्रमनुमितिलक्षणं विधीयते तत्र ज्ञानत्वपदं न दीयते चेत् परामर्शध्वंसेऽतिव्याप्तिः । यतो हि परामर्शध्वसं प्रति परामर्शः कारणं भवति । अतः परामर्शजन्यः परामर्शध्वंसः । तथा च परामर्शनिष्ठजनकतानिरूपितजन्यता यथाऽनुमितौ वर्तते तथैव परामर्शध्वंसेऽपि । तेन परामर्शजन्यत्वस्य परामर्शध्वंसात्मकेऽभावे सत्त्वादनुमितिलक्षणमतिव्याप्तिदोषग्रस्तमित्यतो ज्ञानत्वदलं निवेशनीयं भवति । तन्निवेशे च न परामर्शध्वंसेऽतिव्याप्तिः । तत्र परामर्शध्वंसस्य ज्ञानत्वं नास्ति । अतस्तत्र परामर्शनिष्ठजनकतानिरूपितजन्यत्वस्य सत्त्वेऽपि ज्ञानत्वाभावान्न तादृशस्थले उक्तानुमितिलक्षणं सङ्गच्छते । नैयायिकाः प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदेन अभावचतुष्टयं स्वीकुर्वन्ति । उक्तञ्च तर्कसङ्ग्रहकारेण-अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

अभावबुद्धिं प्रति प्रतियोगिज्ञानं कारणमिति कार्यकारणभावानुसारेण प्रतियोगिध्वंसं प्रति प्रतियोगिपदार्थस्य हेतुत्वं सर्वानुभवगम्यम् । अतस्तद्वारकं विशेष्यदलम् । ततश्च परामर्शजन्यत्वविशिष्टज्ञानत्वमनुमितेर्लक्षणमुपपन्नं भवति । एवमनुमितिलक्षणे कृतेऽपि परामर्शप्रत्यक्षे भवत्यतिव्याप्तिः । यतो हि ज्ञानविषयकं ज्ञानमनुव्यवसायात्मकं ज्ञानमित्युच्यते । यथा वह्निव्याप्यधूमवानयं पर्वत इत्याकारकपरामर्शविषयक-ज्ञानविषयकज्ञानवानहमित्यात्मकज्ञानमनुव्यवसायात्मकमिति । तादृशानुव्यवसायस्य परामर्शजन्यत्वाद् ज्ञानत्वाच्च परामर्शजन्यत्वविशिष्टज्ञानत्वं तादृशपरामर्शप्रत्यक्षे वर्तत एवेति अलक्ष्ये लक्षणसङ्गतिः ।

अतस्तदर्थं हेत्वविषयकत्वमिति पदं निवेश्यते । ततश्च परामर्शजन्यत्वे सति हेत्वविषयकत्वे सति ज्ञानत्वमनुमितेर्लक्षणमुपपद्यते । तेन परामर्शप्रत्यक्षात्मकेऽनुव्यवसाये परामर्शजन्यत्वस्य ज्ञानत्वस्य सत्त्वेऽपि तादृशज्ञानं हेतुविषयकमेव भवितुमर्हति न तु हेत्वविषयकमिति हेत्वविषयकत्वरूपस्य विशेषणस्य तत्र विरहान्नातिव्याप्तिः सम्भवति । इदञ्च तटस्थलक्षणम् । अनुमितित्वजातिमत्त्वमित्यादि लक्षणमपि लक्षणकाराः प्रसङ्गानुसारेण समुपस्थाप्य विवेचयन्ति ।

## परामर्शनिरूपणम्

**मूलम्– व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिः।**

**व्याख्या-** इदानीं क्रमप्राप्तं परामर्शस्वरूपं प्रतिपाद्यते। परामर्शस्य लक्षणं प्रदर्शयन् तर्कसङ्ग्रहकारः कथयति व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इति। अत्र परामर्शं लक्ष्यीकृत्य तल्लक्षणमुच्यते। तेन परामर्शस्य लक्ष्यत्वं व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य परामर्शलक्षणत्वमिति लक्ष्यलक्षणभावस्य सिद्धिर्भवति, तच्च लक्ष्यत्वं लक्षणत्वमर्थः। तथा च परामर्शस्य लक्षणत्वसम्बन्धेन व्याप्तिविशिष्टपक्षधर्मताज्ञानेऽन्वयो भवति चेद् व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य लक्ष्यत्वसम्बन्धेन परामर्शेऽन्वयः। अनया रीत्या उभयोर्यथायथं सम्बन्धो ह्युपपद्यते।

अत्र व्याप्तिविशिष्टञ्च तत्पक्षधर्मताज्ञानञ्चेति कर्मधारयतत्पुरुषसमासं विधाय व्याप्तिविशिष्टपक्षधर्मताज्ञानमिति समस्तं वाक्यं निष्पद्यते। यतो हि परामर्शात्मकं ज्ञानं विशिष्टवैशिष्ट्यावगाहि भवति। तत्र ज्ञानद्वयं वर्तते, पक्षधर्मताज्ञानं व्याप्तिज्ञानञ्च। तत्रादौ पर्वतादौ पक्षे साध्यसाधकस्य हेतोर्धूमादेर्यज्ज्ञानं पर्वतो धूमवानित्याकारकं तदेव पक्षधर्मताज्ञानमित्युच्यते। पक्षधर्मताज्ञानमित्यत्र पक्षधर्मतायाः ज्ञानं पक्षधर्मताज्ञानमिति षष्ठीतत्पुरुषसमासः तत्र षष्ठ्यर्थो विषयत्वम्। धर्मत्वमित्यस्यार्थः सम्बन्धः। तथा च पक्षसम्बन्धविषयकं ज्ञानमित्यर्थो लभ्यते। व्याप्तिविशिष्टमित्यत्र व्याप्तिपदं विशेषणम्। तेन विशिष्टं पक्षसम्बन्धविषयकं ज्ञानम्। यतो हि व्याप्तिविशिष्टपदार्थस्याभेदसम्बन्धेन पक्षसम्बन्धविषयकज्ञानेऽन्वयो भवति।

विशेषणमित्यस्य नामान्तरं प्रकारः। प्रकारविशेषणयोः समानार्थकत्वात्। स एव हेतुः साध्यं साधयितुं प्रभवति, यत्र व्याप्तिः पक्षधर्मता चेति धर्मद्वयं नियमेन लभ्यते, सा एव व्याप्तिर्हेतौ प्रकारतया वर्तते।

अतो व्याप्तिविशिष्टो हेतुर्भवति। स एव हेतुः पर्वतादौ संयोगसम्बन्धेन वर्तते। तेन च व्याप्तिविशिष्टहेतुप्रकारकाभिन्नं पक्षसम्बन्धविषयकं यज्ज्ञानं तदेव परामर्शात्मकं विशिष्टवैशिष्ट्यावगाहि ज्ञानं भवतीति निष्कर्षः।

उक्तपरामर्शलक्षणस्य लक्ष्यीभूतं परामर्शात्मकं वाक्यमुदाहरणमुखेन समुपस्थापयन् तर्कसङ्ग्रहकारो ब्रूते यथा- 'वह्निव्याप्यधूमवानयं पर्वत' इति ज्ञानं परामर्शः। पर्वतो वह्निमानिति

प्रतिज्ञावाक्यस्य हेतूदाहरणाभ्यां वह्निरूपसाध्यनिरूपितव्याप्तिविशिष्टस्य हेतोर्धूमस्य पक्षेण पर्वतेन सह तृतीयक्षणे जायमानं सम्बन्धविषयकं ज्ञानमेव नैयायिकैः परामर्शपदेन व्यवह्रियते। तत्र एतादृशसाध्यनिरूपितव्याप्तिविशिष्टो यो हेतुर्धूमः स च प्रकृतस्थले संयोगसम्बन्धेन पर्वते वर्तत इति भवति परामर्शलक्षणस्य लक्ष्ये 'वह्निव्याप्यधूमवानयं पर्वतः' इत्यात्मके परामर्शे लक्षणसमन्वयः। यदा संयोगसम्बन्धेन धूमहेतुना वह्निरूपं साध्यं साध्यते तादृशस्थलीयमिदमुदाहरणवाक्यम्।

यदा च समवायसम्बन्धेन आत्मनि ज्ञानहेतुना आत्मत्वं साध्यते चेत्तदा अयमात्मा ज्ञानादित्यादिस्थलेषु आत्मत्वव्याप्यज्ञानवानयमात्मा इत्याकारकः परामर्शो निष्पद्यते। अत्रात्मत्वस्य व्याप्तिः आत्मत्वरूपसाध्यसाधके ज्ञानात्मके हेतौ वर्तते तादृशज्ञानमात्मनि समवायेन तिष्ठतीति आत्मत्वरूपसाध्यनिरूपितव्याप्तिविशिष्टस्य हेतोर्ज्ञानस्य समवायेन आत्मनि वर्तमानत्वाल्लक्ष्यीभूते उक्तपरामर्शे भवति लक्षणसमन्वयः। अनया रीत्या साध्यसाधनभेदेन सम्बन्धा भिद्यन्ते। पक्षेण सह स्थलानुसारेण साध्यसाधनानि निश्चित्य परामर्शस्वरूपं निर्धायते। तत्र प्रक्रिया एकैव। तत्र विशेषतः साध्यनिरूपितव्याप्तिविशिष्टस्य हेतोः पक्षेण सह सम्बन्धविषयकं ज्ञानमेवेति सम्यग् विचार्य लक्ष्ये लक्षणसमन्वयो विधेयः।

एतादृशं परामर्शात्मकं ज्ञानमेवानुमितिजनकमिति परामर्शस्यानुमितिकारणत्ववादिनो नैयायिकाः। अतश्चोक्तं तर्कसङ्ग्रहकारेण 'तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः' इति। अर्थाद् वह्निव्याप्यधूमवानयं पर्वत इत्याकारकं यत्परामर्शात्मकं ज्ञानम्, तज्जन्यं पर्वतो वह्निमानित्याकारकं पर्वतोद्देश्यकं वह्निविधेयकमनुमित्यात्मकं ज्ञानम्। तेनानुमितिपरामर्शयोर्जन्यजकनकभावसम्बन्धो भवतीति सारल्येन अवगन्तुं शक्यते।

एतादृशपरामर्शान्तर्गता ये पदार्थास्ते केचन विशेषणतया केचन विशेष्यतया च प्रतीयन्ते चेत्कतिपये तदन्तवर्तिनः पदार्थाः प्रकारतया विशेष्यतया चोभयथा प्रतीतिविषयभूता भवन्ति। यथा- "वह्निव्याप्यधूमवानयं पर्वत" इत्यत्र वह्निपदार्थस्य भानं विशेष्यतयैव भवति न तु प्रकारतया विशेष्यतया चोभयथा जायते। प्रकारतया भासमाने पदार्थे विशेषणताख्यो धर्मश्चेत् विशेष्यतया प्रतीयमाने पदार्थे विशेष्यताख्यो धर्मः। तादृशप्रकारताविशेष्यतानाञ्च परस्परं निरूप्यनिरूपकभावः। निरूप्यत्वं निरूपकत्वमित्यर्थः। निरूप्यत्वमित्यस्य निरूपितत्वं निरूपिता वाऽर्थः।

सोदाहरणं तद्विषयकं विवरणं प्रस्तूयते। पर्वतो वह्निमानित्यनुमितिं प्रति "वह्निव्याप्यधूमवानयं पर्वत" इत्याकारकः परामर्शः कारणम्। परामर्शघटकव्याप्येति पदस्य वाच्यार्थो व्याप्त्याश्रयः।

व्याप्तिविशिष्टो हेतुरित्यर्थः । साध्यसाधनयोः सम्बन्धो व्याप्यव्यापकभावः । तत्र साध्यं व्यापकं भवति चेत् साधनं व्याप्यं व्याप्त्याश्रयीभूतमित्यर्थः । प्रकारीभूतस्य व्यापकतया प्रतीयमानस्य वह्निपदार्थस्य निरूपितत्वसम्बन्धेन व्याप्यपदार्थैकदेशे व्याप्तिपदार्थेऽन्वयः । व्याप्तिपदार्थस्याश्रयत्वसम्बन्धेन हेतुपदार्थेऽन्वयः ।

हेतुपदार्थस्य च यथायथं संयोगादिसम्बन्धेन पक्षे पर्वतादावन्वयः । तत्र पर्वतस्य विशेष्यत्वाद् विशेष्यतया प्रतीयमाने पर्वतपदार्थे विशेष्यता वर्तते, तादृशविशेष्यतानिरूपिता प्रकारता धूमात्मके हेतौ विद्यते, तत्रैव व्याप्तिनिष्ठा प्रकारतानिरूपिता विशेष्यता च वर्तते । तथा च पर्वतनिष्ठविशेष्यतानिरूपितप्रकारता धूमे वर्तते तत्रैव व्याप्तिनिष्ठा या प्रकारता तन्निरूपिता विशेष्यता च वर्तते । अनेन प्रकारेण एकस्मिन् धूमपदार्थे प्रकारता विशेष्यता च यथायथं विद्येते । यतो हि पक्षीभूतपदार्थापेक्षया धूमः प्रकारतया भासते चेद् व्याप्त्यापेक्षया स एव धूमो विशेष्यतया प्रतीतो भवति ।

तथैव साध्यसाधको हेतुर्व्याप्तिविशिष्टो भवति । तादृशसाध्यसाधके धूमपदार्थे व्याप्तेर्भानं प्रकारतया जायते । अतो धूमनिष्ठविशेष्यतानिरूपितप्रकारता व्याप्तौ वर्तते । साध्यं तत्र (व्याप्तिपदार्थे) विशेष्यतया भासते । ततश्च प्रकृतवह्निनरूपसाध्यनिष्ठप्रकारतानिरूपितविशेष्यता व्याप्तिपदार्थे वर्तते । एवं रीत्या विशेष्यतासमानाधिकरणप्रकारता व्याप्तौ वर्तत इति विशेष्यत्वं प्रकारत्वञ्चोभयमपि व्याप्तौ भासते । पूर्ववदत्रापि परस्परमेकपदार्थापेक्षया व्याप्तिपदार्थस्य विशेष्यतया प्रकारतया च भानादिति । साध्यभूतस्य वह्निपदार्थस्योपरि न कश्चन पदार्थो दृश्यते, अतस्तस्य भानं प्रकारतयैव भवति तथैव विशेष्यविशेषणभावापन्नाः परामर्शान्तर्गताः सर्वेऽपि पदार्थाः पर्वतात्मके विशेष्ये अन्विता भवन्तीति तादृशपर्वतादिरूपस्य पदार्थस्य विशेष्यतयैव भानमुपपद्यते । इयमेव मुख्यविशेष्यतोच्यते ।

उपर्युक्तरीत्या परामर्शान्तर्गतानां विशेषणविशेष्यभावापन्नानां पदार्थानां विवरणे कृते सति विवृत्तं परिष्कृतं स्वरूपमित्थं भवति- वह्निनिष्ठप्रकारतानिरूपिता या व्याप्तिनिष्ठा विशेष्यतासमानाधिकरण-प्रकारता, अथ च व्याप्तिनिष्ठा प्रकारतानिरूपिता या धूमनिष्ठविशेष्यतासमानाधिकरणप्रकारता । एवमेव धूमनिष्ठप्रकारतानिरूपिता या पर्वतनिष्ठा विशेष्यता तदाश्रयः पर्वतः" इत्याकारकः परामर्शः पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति कारणम् । तेन चेदं सिद्ध्यति- परामर्शजन्यं ज्ञानमनुमितिरिति ।

## पदानां प्रयोजनम्

व्याप्तिप्रकारकाभिन्नं पक्षसम्बन्धविषयकं ज्ञानं परामर्श इति यत्परामर्शलक्षणमुक्तम्, तत्र विषयविषयिभावसम्बन्धो भवति । यतो हि ज्ञानं विषयि भवति, अतो ज्ञाने विषयिताख्यो धर्मस्तिष्ठति, तथैव यस्य पदार्थस्य ज्ञानं क्रियते, स पदार्थो विषय इति नाम्ना व्यवह्रियते । विषये विषयता तिष्ठतीति ज्ञानस्य विषयत्वसम्बन्धेन विषयत्वेन प्रतीयमाने पदार्थेऽन्वयो भवति चेद् विषयस्य ज्ञाने विषयित्वसम्बन्धेनान्वयः । तत्र व्याप्तिप्रकारकाभिन्नं नाम व्याप्तिप्रकारतानिरूपकं यत्पक्षसम्बन्धविषयकं ज्ञानमित्यर्थः । तेन हि व्याप्तिविशिष्टं पक्षसम्बन्धविषयकं ज्ञानमित्यर्थो लभ्यते ।

तत्र व्याप्तिविशिष्टं ज्ञानमित्यत्र ज्ञानस्य विषयभूता व्याप्तिस्तस्याविषयित्वसम्बन्धेन ज्ञानेऽन्वयो भवति । तथा च व्याप्तिनिष्ठा या विषयता तन्निरूपिता विषयिता व्याप्तिविशिष्टवैशिष्टयावगाहिज्ञाने तादृशविषयतानिरूपितविषयित्वमस्तीति व्याप्तिप्रकारकपक्षसम्बन्धविषयकज्ञानस्य विषयविषयिभावसम्बन्धो निश्चीयते । अत्र पक्षसम्बन्धविषयकज्ञानपदं न निवेश्यते, व्याप्तिप्रकारकं ज्ञानं परामर्श इत्येतावन्मात्रं परामर्शलक्षणं स्वीक्रियते चेद् घटादिविषयकज्ञाने भवत्यतिव्याप्तिः । अतस्तद्वारणाय पक्षसम्बन्धविषयकं ज्ञानमिति दलं निवेशनीयं भवति ।

तन्निवेशे च घटादिविषयकं ज्ञानं न पक्षधर्मताज्ञानं भवितुमर्हतीति नातिव्याप्तिः । तथैव व्याप्तिविशिष्टेति पदाभावे पक्षधर्मताज्ञानमित्येव लक्षणत्वे यत्र "धूमवान् पर्वत" इत्यादौ साध्यनिरूपिता व्याप्तिर्नास्ति तत्र अलक्ष्ये धूमवत्पर्वते पक्षधर्मताज्ञानस्य सत्त्वादतिव्याप्तिः । अतस्तद्वारणाय व्याप्तिविशिष्टेति विशेषणदलं निवेश्यते । तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इति निर्दुष्टं परामर्शलक्षणमुपपद्यते ।

व्याप्तिविशिष्टपक्षसम्बन्धविषयकं ज्ञानं परामर्श इत्येतावन्मात्रं लक्षणं क्रियते चेत् तदा धूमो वह्निव्याप्तिविशिष्ट आलोकवान् पर्वत" इत्याकारकं यत्समूहालम्बनात्मकं ज्ञानं तत्र भवत्यतिव्याप्तिः । यतो हि नानाप्रकारतानिरूपितनानामुख्यविशेष्यताशालि ज्ञानं समूहालम्बनात्मकमित्युच्यते, वह्निव्याप्तिप्रकारकं धूमविशेष्यकमालोकप्रकारकं पर्वतविशेष्यकं यज्ज्ञानं तादृशज्ञाने व्याप्तिविशिष्टपक्षसम्बन्धज्ञानत्वस्य सत्त्वान्निरुक्तपरामर्शलक्षणं तत्र सङ्गच्छत इत्यतिव्याप्तिः ।

तदर्थं पक्षनिष्ठविशेष्यतानिरूपिता या हेतुनिष्ठा प्रकारतासमानाधिकरणविशेष्यता तादृशप्रकारतानिरूपिता या व्याप्तिनिष्ठा प्रकारतासमानाधिकरणविशेष्यता तथाविधप्रकारविशेष्यभावापन्नज्ञानस्य परामर्शे लक्षणत्वे धूमो वह्निव्याप्तिविशिष्ट आलोकवान् पर्वत" इत्यस्मिन् समूहालम्बनात्मके ज्ञाने पक्षनिष्ठविशेष्यता-निरूपितप्रकारतासमानाधिकरणविशेष्यता आलोकवत्पर्वते न लभ्यत इति नातिव्याप्तिः ।

अतोऽनुमितिपरामर्शयोर्विशेष्य कार्यकारणभावं प्रदर्श्य तदनुसारेण अनुमितिं प्रति परामर्शस्य कारणत्वं परामर्शजन्यानुमितेश्च कार्यत्वं व्यवस्थाप्यते । यतो हि किञ्चिदुद्देश्यक-किञ्चिद्विधेयकानुमितिर्भवति । यथा- पर्वतो वह्निमानित्यनुमितौ पर्वतस्य भानमुद्देश्यतया ज्ञायते चेद् वह्नेर्भानं विधेयतया । तथैव उद्देश्यविधेययोः यः संयोगसम्बन्धस्तस्य भानं संसर्गतया भवतीति प्रकृतस्थले पर्वतोद्देश्यक-वह्निविधेयकसंयोगसंसर्गकानुमितिरुपपद्यते ।

### उद्देश्यविधेयभावस्वरूपम्

उद्देश्ये पर्वते उद्देश्यता, तादृशोद्देश्यतावच्छेदकं पर्वतत्वम् तदवच्छिन्ना पर्वतनिष्ठा उद्देश्यता, समानाधिकरणयोरेवावच्छेदकभावस्य नियमादुद्देश्यतावच्छेदकपर्वतत्वस्योद्देश्यतायाश्च एकमेव अधिकरणं पर्वतो भवति । यतो हि उद्देश्यत्वं पर्वते वर्तते तत्रैवोद्देश्यतावच्छेदकस्य च समानाधिकरणत्वं पर्वतस्यानुभवसिद्धम् । एवं सति पर्वतो वह्निमानित्यनुमितिस्थले अनुमितिपरामर्शयोः कार्यकारणभावस्य रूपमित्थं निष्पद्यते– उद्देश्यतावच्छेदकं यत्पर्वतत्वं तदवच्छिन्नपर्वतनिष्ठोद्देश्यतानिरूपितसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्ना वह्निनिष्ठा विधेयता, तन्निरूपकानुमितित्वावच्छिन्नानुमित्यात्मकं कार्यं प्रति वह्नित्वावच्छिन्नप्रकारतानिरूपिता या व्याप्तिनिष्ठा विशेष्यतासमानाधिकरणप्रकारता तादृशप्रकारतानिरूपिता या विशेष्यतासमानाधिकरणधूमत्वावच्छिन्नधूमनिष्ठाप्रकारता तन्निरूपिता पर्वतत्वावच्छिन्ना पर्वतनिष्ठा विशेष्यता तादृशविशेष्यताशालिज्ञानं परामर्शः कारणम् । एतादृशपरामर्शस्यानुमितिं प्रति कारणत्वस्वीकारे न कश्चन दोषावसरः ।

## व्याप्तिनिरूपणम्

**मूलम्– यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः ।**

**व्याख्या-** व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इति परामर्शलक्षणघटकीभूता या व्याप्तिः सा का ? इति जिज्ञासानिवृत्तये प्रसङ्गसङ्गत्या क्रमप्राप्तं व्याप्तिलक्षणमुपस्थापयति तर्कसङ्ग्रहकारः- यत्र यत्र धूमस्तत्र तत्राग्निरित्यादिना ग्रन्थेन । सप्तम्यर्थे त्रल्प्रत्ययो विधीयते । अतोऽस्मिन् वाक्ये यत्र यत्रेति वारद्वयं श्रूयते, तदर्थश्च यस्मिन् यस्मिन् अधिकरणे । अत्रत्यं यत्पदं हेतुबोधकम् । तथैव "यत्तदोर्नित्यसम्बन्धः" इति नियमो विद्यते । तादृशनियममाश्रित्य यदा यत्र यत्र इत्युच्चारणान्तरं तत्र तत्रेत्युच्यते चेत्तदा तत्र तत्रेत्यस्य तस्मिन् "तस्मिन्नधिकरणे" इत्यर्थो भवति । तत्रत्यतत्पदञ्च साध्यबोधकम् ।

तथा च यावत्सु हेत्वधिकरणेषु हेतुमत्त्वं वर्तते तावत्सु अधिकरणेषु साध्यवत्त्वमपेक्ष्य एतादृशार्थलाभायैव यत्र यत्र तत्र तत्रेति पदवीप्सा = वारद्वयमुच्चारणमावश्यकम् । तेन हेतुव्यापकं साध्यमभिलष्यते । तथा च हेतुसाध्ययोर्व्याप्यव्यापकभाव इत्यर्थो लभ्यते । यथा वह्निमान् धूमादित्यत्र धूमहेतुना पर्वतादौ वह्निः साध्यते । तत्र हेतोर्धूमस्य यावत्सु पर्वत-महानस-यज्ञशालादिषु अधिकरणेषु वह्नेर्विद्यमानत्वात् साध्यसाध्यकस्य हेतोः कस्मिन्नपि स्थाने साध्यं नास्तीति वक्तुं न शक्यते, अतो यावति हेतुमति पर्वतादौ वह्निरस्ति न तु वह्न्यभावस्तत्र लभ्यते । अयमभिप्रायः–हेतुव्यापकत्वं साध्यस्य साध्यव्याप्यत्वञ्च हेतोरिति हेतुसाध्ययोर्व्याप्यव्यापकभावस्य लाभो भवतु इति धिया यत्र यत्र धूमस्तत्र तत्राग्निरिति पङ्क्त्या व्याप्तेरभिनयः प्रदर्शितो वर्तते । यावत्सु पर्वतचत्वरादिषु हेत्वधिकरणेषु हेतुर्धूमो वर्तते तावत्सु सर्वेषु अधिकरणेषु साध्येन वर्तितव्यमिति लिङ्गनिर्देशेन सह सप्रयोगं पदार्थानामभिव्यक्तीकरणमेवात्राभिनयपदार्थः ।

पूर्वोक्तरीत्या व्याप्यव्यापकभावस्य लाभो भवतु इति धिया तर्कसङ्ग्रहकारेण पदवीप्सात्मकमुदाहरणमुपस्थापितम् । इदं प्रतीकात्मकमुदाहरणवाक्यन्तु स्पष्टप्रतिपत्तये । अर्थात् साध्यसाधनयोर्व्याप्यव्यापकभावं स्फुटीकृत्य हेतुव्यापकं साध्यं साध्यव्याप्यञ्च साधनमित्यभिप्रायेण तत्स्वरूपं निर्धारयितुञ्च व्याप्यबोधकं धूमपदं प्रथमं व्यापकबोधकञ्च अग्निपदं तदनन्तरं निर्दिष्टम् । वस्तुतस्तु सामान्यरूपेण यत्र यत्र हेतुस्तत्र तत्र साध्यमित्येव साहचर्यमुचितम् । एतेन यत्किञ्चिद्धेत्वधिकरणे साध्याभावो ग्रहीतुं न शक्यते, येन साध्यस्य हेतुव्यापकत्वं हेतोश्च साध्यव्याप्यत्वं नोपपद्येत ।

व्याप्तिं लक्ष्यीकृत्य यत्र यत्र हेतुस्तत्र तत्राग्निरिति साहचर्यात्मको नियम इति लक्षणं विधीयते । अत्र व्याप्तिरिति पदेन लक्ष्यं बुध्यते चेत् साहचर्यनियमः इत्यनेन च लक्षणम् । तत्र सहचरतीति = सहचरः = समानाधिकरणम्, सहचरस्य भावः = साहचर्यम् = सामानाधिकरण्यम् ।

तादृशसाहचर्यञ्चासौ नियमः = व्याप्तिविशेषः। हेतुव्यापकसाध्यसामानाधिकरण्यात्मको नियम एव लक्ष्यीभूताया व्याप्तेर्लक्षणमिति निष्कर्षः। तत्र हेतुसाध्ययोर्नियतसाहचर्यं व्याप्तिः। पूर्वपक्षीया व्याप्तिः सिद्धान्तव्याप्तिश्चेति पूर्वोत्तरभेदेन व्याप्तिर्द्विविधा। तत्र साध्याभाववदवृत्तित्वरूपा या पूर्वपक्षीया व्याप्तिः सा लक्ष्यमात्रसङ्ग्राहिका न भवितुमर्हति 'इदं वाच्यं ज्ञेयत्वाद्' इत्यादिके केवलान्वयिसाध्यकस्थले वाच्यत्वाभावस्याप्रसिद्धेरव्याप्तिः। अतस्तल्लक्षणमुपेक्ष्य अत्र नियतसाहचर्यात्मकमुत्तरपक्षीयं व्याप्तिसिद्धान्तलक्षणं गृह्यते। अत्र निपूर्वकयमधातोर्निष्पन्नस्य नियतपदस्यार्थो व्यापकम्, नियतस्य भावो नियतत्वम् = व्यापकत्वमिति यावत्।

तथा च हेतुव्यापकसाध्यसामानाधिकरण्यं व्याप्तेः सिद्धान्तलक्षणमिति साहचर्यनियम इति मूलपङ्क्तेरयमेवाभिप्रायः। तत्र सामानाधिकरण्यं नाम = एकाधिकरणनिरूपितवृत्तित्वम्। तच्च हेतुनिष्ठम्। अर्थात् साध्याधिकरणपर्वतादिनिरूपितवृत्तित्वं साध्यसाधकसद्धेतुनिष्ठमित्यर्थः। एतेन व्याप्तिसिद्धान्तलक्षणलक्ष्याः सद्धेतवो भवन्तीति साध्यसाधकानां सद्धेतूनां लक्ष्यत्वं सिद्ध्यति। तथा च हेतुव्यापकसाध्यसामानाधिरण्यं व्याप्तेः सिद्धान्तलक्षणम्। 'पर्वतो वह्निमान् धूमाद्' इत्यत्र पर्वते पक्षे धूमहेतुना वह्निः साध्यते। ततश्च हेतुर्धूमस्तद्व्यापकं साध्यं वह्निस्तत्सामानाधिकरण्यं वह्निसाधके धूमहेतौ अस्तीति भवति लक्षणसङ्गतिः। तत्र साध्यस्य वह्नेर्हेतुभूतधूमव्यापकत्वं वर्तते। तत्र व्यापकत्वं नाम हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्। तथा च हेत्वधिकरणे पर्वतादौ साध्येन अवश्यं भाव्यम्।

येन केनापि रूपेण हेतोर्धूमस्याधिकरणे पर्वतादौ वह्निर्नास्तीत्याकारकः प्रतीतिसाक्षिकाभावो नैव ग्रहीतुं शक्यः, अपि तु तदरिक्तघटपटाद्यभाव एव, तादृशाभावस्य प्रतियोगि घटादिकम्, तादृशप्रतियोगिताया अवच्छेदकं घटत्वादिकं न तु साध्यतावच्छेदकं वह्नित्वम्। अतस्तादृशप्रतियोगितानवच्छेदकं वह्नित्वं जातम्, तद्धर्मवत्त्वस्य वह्नौ सत्त्वाद् भवति धूमव्यापको वह्निः। अनया रीत्या धूमो वह्निव्याप्यो भवति चेद् धूमव्यापको वह्निरिति व्याप्ये धूमे व्याप्यता वर्तते, तादृशव्याप्यतानिरूपिता व्यापकता वह्नाविति हेतोर्व्यापकत्वसम्बन्धेनान्वयो व्यापकीभूते वह्नौ भवति। एवं सति व्याप्तिसिद्धान्तलक्षणानुसारेण साध्यसाधनयोर्व्याप्यव्यापकभावसम्बन्धश्च स्फुटमवधारयितुं शक्यते। एवम्भूता विषया एव न्यायबोधिन्यां स्फुटीकृत्य प्रतिपादिताः सन्ति।

तथैवोक्तव्याप्तिलक्षणस्यालक्ष्ये लक्षणसमन्वयश्च न भवति। तद्यथा- 'पर्वतो धूमवान् वह्नेः' इत्यत्र पर्वते पक्षे वह्निहेतुना धूमः साध्यते चेत्तन्न सम्भवति। यतो हि तादृशस्थले 'यत्र यत्र वह्निस्तत्र तत्र धूमः' इति साहचर्यात्मको नियमो न सङ्गच्छते। हेतोर्वह्नेर्यावत्सु

पर्वत-चत्वर-महानस-अयःपिण्डादिषु अधिकरणेषु मध्ये अयःपिण्डादिकमपि एकमधिकरणं वर्तते, तत्र साध्यो धूमो नास्ति। अतो यावत्सु हेत्वधिकरणेषु यदयःपिण्डादिकं तत्र वर्तमानोऽभावो धूमो नास्तीत्याकारकः प्रतीतिसाक्षिकसाध्याभावः, तादृशाभावस्य प्रतियोगी साध्यो धूमः, प्रतियोगिभूते साध्ये धूमे प्रतियोगिता तिष्ठति, तादृशप्रतियोगितायाः अवच्छेदकमेव साध्यतावच्छेदकं धूमत्वं भवति, तादृशधर्मवत्त्वमेव साध्ये धूमे सत्त्वादनवच्छेदकं साध्यं न भवितुमर्हतीति वह्निव्यापकत्वं धूमस्य विरहादलक्ष्ये धूमे व्याप्तिसिद्धान्तलक्षणं न सङ्गच्छते, अतो नातिव्याप्तिः।

तथैवान्यत्रापि लक्ष्ये लक्षणसमन्वयस्य प्रकारो ज्ञेयश्चेदलक्ष्ये लक्षणसमन्वयाभावश्चेति यथायथमूहनीयम्। एतेनेदं निश्चीयते-साध्यनिरूपितव्याप्तिविशिष्टो यो हेतुः स एव अव्यभिचारी साध्यसाधको भवति। अत एव 'पर्वतो धूमवान् वह्नेः' इत्यत्र पर्वते पक्षे वह्निहेतुना साध्यो धूमः साधयितुं न शक्यते, व्यभिचारात्। अर्थात् धूमात्मकसाध्यनिरूपिता या व्याप्तिरपेक्ष्यते सा तादृशवह्निहेतौ नास्ति। अतो वह्निहेतुर्धूमव्यभिचारी वर्तते। तादृशेन व्यभिचारिहेतुना पर्वते धूमस्य सिद्धिर्न भवितुमर्हति। व्याप्तिसिद्धान्तानुलक्षणानुसारेण इयं व्याप्तिरन्वयव्याप्तिरिति नाम्ना प्रसिद्धा वर्तते। तत्स्वरूपञ्च पश्चात् प्रदर्शयिष्यते।

पूर्वपक्षीयव्याप्तिस्तु साध्याभाववदवृत्तित्वम्। अर्थात् साध्याभावाधिकरणनिरूपितवृत्तित्वाभावत्वं पूर्वपक्षीयव्याप्तेर्लक्षणम्। अत्र 'पर्वतो वह्निमान् धूमाद्' इत्यत्र साध्यो वह्निस्तदभावः = वह्न्यभावः, तत्प्रतियोगिताको यो वह्न्यभावस्तदधिकरणं जलह्रदादिकं तन्निरूपितवृत्तिता मीनादौ तादृशवृत्तित्वाभावो धूमात्मके हेतौ भवतीति लक्षणसमन्वयः। अतो वह्निनिरूपिता या व्याप्तिस्तद्विशिष्टो धूमो भवतीति पर्वते वह्निसाधने धूमः सद्धेतुः। तथैव पर्वतो धूमवान् वह्नेरित्यत्र साध्यो धूमः, साध्याभावः = धूमाभावस्तदधिकरणमयोगोलकं तन्निरूपिता वृत्तिता एव वह्नौ, वृत्तित्वाभावस्य हेतावसत्त्वाद् नातिव्याप्तिः। अतः पर्वते वह्निहेतुना धूमस्य सिद्धिर्न भवितुमर्हति। एवमेवान्यत्रापि बोध्यम्।

## पक्षधर्मतानिरूपणम्

**मूलम्–व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।**

**व्याख्या-** व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इति परामर्शलक्षणघटकीभूता या व्याप्तिः सा प्रतिपादिता। इदानीं तद्घटकीभूता पक्षधर्मता का इति शङ्कां समादधानो ग्रन्थकारः

पक्षधर्मतालक्षणमाह- व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मतेति। व्याप्यस्य = व्याप्तिविशिष्टस्य साध्यसाधकत्वेनोपस्थापितस्य हेतोः पक्षेण सह वृत्तित्वं पक्षधर्मतायाः लक्षणम्। यथा 'पर्वतो वह्निमान् धूमाद्' इत्यत्र साध्यनिरूपितव्याप्तिविशिष्टो वह्निरूपसाध्यसाधकत्वेनोपस्थाप्यमानो हेतुर्धूमस्तस्य पर्वतादिवृत्तित्वं वर्तत इति व्याप्तिविशिष्टधूमवानयं पर्वत इत्याकारकं ज्ञानं पक्षधर्मता। अत्र पक्षधर्मतां लक्ष्यीकृत्य व्याप्यस्य पर्वतादिवृत्तित्त्वमिति लक्षणं विधीयते। अतो लक्षणं व्याप्यस्य पर्वतादिवृत्तित्वञ्चेल्लक्ष्यबोधकं पदं पक्षधर्मत्वमिति। तत्र व्याप्यो नाम व्याप्त्याश्रयः, षष्ठ्यर्थो निष्ठत्वम्। पर्वतादिपदेन यत्र साध्यसन्देहो वर्तते तादृशपक्षविशेषो गृह्यते। वृत्तित्वम् = आधेयत्वरूपसम्बन्धविशेषः। स च सम्बन्धो व्याप्तिविशिष्टस्य हेतोः पर्वतादिपक्षेण सह भासते। अर्थात् पर्वतादिपक्षे वृत्तित्वसम्बन्धेन व्याप्तिविशिष्टो हेतुरस्ति चेत् तादृशो धूमादिरेव पक्षधर्मस्तस्य धूमादेः पर्वतादिपक्षवृत्तित्वं पक्षधर्मतेत्युच्यते। अस्यैव नामान्तरं पक्षसम्बन्धविषयकं ज्ञानम्।

### पदानां प्रयोजनम्

अत्र पर्वतादिवृत्तित्वमात्रं पक्षधर्मतालक्षणमुच्यते चेद् वृक्षादावतिव्याप्तिः। यतो हि वृक्षादयः पर्वतादौ वर्तन्ते, अतस्तत्र पर्वतादिवृत्तित्वमस्त्येवेति भवत्येतल्लक्षणमतिव्याप्तम्। तदर्थं व्याप्यस्येति पदं दीयते। तत्पदनिवेशे च तत्र व्याप्तिविशिष्टत्वं नास्तीति नातिव्याप्तिः। व्याप्यस्य वृत्तित्वं पक्षधर्मत्वमित्युच्यते चेत्तदा व्याप्तिविशिष्टस्य यस्य कस्यापि साध्यासाधकस्य घटपटादिवृत्तित्वात् तत्र भवत्यतिव्याप्तिः। अतस्तद्वारणाय पर्वतादिपक्षबोधकं निवेश्यते। तत्पदे दत्ते सति तु तादृशघटपटादीनां पर्वतादिपक्षवृत्तित्वं नास्तीति नातिव्याप्तिः। सपरिकरो हेतुः साध्यसाधकः सद्धेतुरिति नव्यनैयायिकाः कथयन्ति। परिकरपदेन च व्याप्तिः पक्षधर्मता च बोद्धव्या। तादृशपक्षधर्मतोभयविशिष्टो यो हेतुः स एव निर्दुष्टः साध्यसाधको हेतुर्भवतीति नव्यनैयायिकानां निष्कर्षः।

## सभेदमनुमानप्रक्रियानिरूपणम्

**मूलम्– अनुमानं द्विविधं स्वार्थं परार्थञ्च। तत्र स्वार्थं स्वानुमितिहेतुः। तथाहि स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति - यत्र यत्र धूमस्तत्र तत्राग्निरिति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत् स्वार्थानुमानम्।**

**व्याख्या-** अनुमाननिरूपणप्रसङ्गेऽनुमितिकरणमनुमानमिति रीत्या तल्लक्षणं व्याख्यातम् । इदानीं तच्च कतिविधमिति जिज्ञासा समुदेति । तादृशीं जिज्ञासां समाधातुं तद्भेदं निर्दिशन् तर्कसङ्ग्रहकारो ब्रूते- अनुमितिकरणरूपं यदनुमानं तच्च स्वार्थं परार्थञ्चेति द्विविधम् = द्विप्रकारकमित्यर्थः । विशेषतो नैयायिकाः स्वार्थपरार्थभेदेन अनुमानस्य द्वैविध्यं स्वीकुर्वन्ति ।

इतः प्राक् स्वार्थपरार्थभेदेन अनुमानस्य द्वैविध्यं प्रदर्शितम् । इदानीं क्रमप्राप्तस्य स्वार्थानुमानस्य लक्षणनिर्देशेन सह तत्प्रक्रियाक्रमं निर्धारयितुं प्रवर्तते ग्रन्थकारः । स्वयमेवानुमित्यात्मकज्ञानाय पञ्चावयववाक्यानां प्रयोगं विधाय यामनुमितिं करोति अनुमित्सुर्जनस्तदर्थं यदनुमानं विधीयते तदेव स्वार्थमित्युच्यते । अत्र अन्येषां कृते पञ्चावयववाक्यानां प्रयोगो न विधीयते । अनुमित्यात्मकं ज्ञानं सम्पाद्यते तत्प्रयोगस्य विरहादेव स्वार्थानुमानं न्यायप्रयोज्यं न भवति । अत एव न्यायबोधिनीकारेण प्रोक्तम्- स्वार्थानुमानं नाम न्यायाप्रयोज्यानुमानम् । अत्र न्यायो हि प्रतिज्ञादिपञ्चकसमुदायः । तेषां प्रयोगं विनैव अनुमाता स्वयं प्रतिज्ञादिकमनुभूय अनुमित्यात्मकं ज्ञानं करोति चेत् तदेव स्वार्थानुमानमित्युच्यते ।

परं प्रतिबोधयितुं पञ्चावयववाक्यानां प्रयोगाभावात् । इममेवाभिप्रेतमर्थं प्रकाशयितुं पदकृत्यकारः स्वार्थमित्यस्य समासप्रकारं प्रदर्शयन् कथयति– स्वस्यार्थः प्रयोजनं यस्मात् तत् स्वार्थमिति समासः । अर्थात् स्वस्य = स्वकीयस्य, अर्थः = प्रयोजनम्, अनुमित्यात्मकं फलं यस्मादनुमानादुपपन्नं भवति, तदेव स्वार्थामनुमानम् = स्वानुमितिहेतुरित्यर्थः । अयञ्च बहुव्रीहिसमासः । तेन स्वस्य = अनुमातुः कृतेऽनुमित्यात्मकं कार्यं प्रति यदनुमानं विधीयते तदेव स्वार्थम् = स्वप्रयोजनपरम् । परं प्रति बोधयितुं पञ्चावयववाक्यप्रयोगरहितमित्यर्थः ।

तादृशानुमितिश्च केन क्रमेण सम्पद्यत इत्यतस्तत्क्रमप्रकारमित्थं निर्दिशति ग्रन्थकारः– तथा हि प्रथममनुमित्सुः स्वयं पाकशालादौ यत्र यत्र धूमस्तत्र तत्राग्निरिति हेतुसाध्ययोः साहचर्यात्मकं व्याप्तिज्ञानं करोति । तच्च व्याप्तिज्ञानमनुभवात्मकं भवति । ततः पश्चात् पर्वतसमीपं गच्छति, तदानीं पर्वते अविच्छिन्नां धूमरेखां पश्यति, तद्दृष्ट्वा तत्र (पर्वते) तस्यानुमित्सोः पुरुषस्य अग्नेः सन्देहो जायते ।

यतो हि अग्निजन्यो धूमो भवति, तत्र पूर्वं पाकशालादौ 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति प्रत्यक्षसाहचर्येण अनुभवात्मकं ज्ञानं जातं तत्पूर्वकृतसाहचर्यानुभवोऽहमिदानीं पर्वतेऽस्मिन्

धूमं विलोक्य स्मरामि यत्र यत्र धूमस्तत्र तत्राग्निरिति। इदञ्च व्याप्तेः स्मरणात्मकं ज्ञानम्। तत्र प्रथमक्षणे पाकशालादौ अग्निधूमयोः साहचर्यात्मकज्ञानवान् पुरुषः पर्वतसमीपं गत्वा पर्वते धूमं पश्यति तज्ज्ञानं पक्षधर्मतेत्युच्यते। ततः परं द्वितीयक्षणे तादृशसाहचर्यवतः पुरुषस्य व्याप्तेः स्मरणात्मकं ज्ञानं भवति- 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति। तेन च "अग्निव्याप्यो धूमः" इत्याकारकं व्याप्तिज्ञानं जायते द्वितीयक्षणे। ततः परं वह्निव्याप्तिविशिष्टधूमवान् अयं पुरोदृश्यमानः पर्वत" इति यज्ज्ञानं तदेव लिङ्गपरामर्शात्मकमित्युच्यते। तत्र लिङ्गं नाम व्याप्तिबलेन लीनम् = अदृष्टं वह्न्यादिकं गमयति = बोधयति यत्तल्लिङ्गम्। एतादृशी ह्यनुमितिश्च चतुर्थक्षणे जायते। एवम्भूतानुमितिनिष्पत्तये यदनुमानं परं प्रति पञ्चावयववाक्यानां प्रयोगं विना भवति तदेव स्वार्थानुमानमित्युच्यते। यस्माद्धि स्वप्रतिपत्तिं प्रति हेतुर्भवति तस्मात्तत्स्वार्थानुमानमित्यर्थः।

### परार्थानुमानप्रकारः

**मूलम्– यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तत् परार्थानुमानम्। यथा - पर्वतो वह्निमान्, धूमवत्त्वाद्, यो यो धूमवान् स स वह्निमान् यथा महानसम्, तथा चायं, तस्मात् तथेति। अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते।**

क्रमप्राप्तं स्वार्थानुमानभिन्नं परं प्रतिबोधयितुं प्रतिज्ञादिपञ्चावयवप्रयोज्यं परानुमितिहेतुभूतं परार्थानुमानं प्रतिपादयितुकामो ग्रन्थकारो 'यत्तु' इत्यादि ग्रन्थेन परार्थानुमानप्रक्रियामुपस्थापयति। तत्र यत्तु नाम = यदनुमानमित्यर्थः। यो ज्ञातानुमानप्रकारो जनः साध्यसाधकाद् धूमात् पर्वतो वह्निमानित्यनुमितिमवधार्यान्यमज्ञातानुमानप्रकारजनमुद्दिश्य पञ्चावयववाक्यानि यथाक्रमं प्रयुज्यानुमितिहेतुभूतां प्रक्रियां बोधयति तत्परार्थानुमानमिति नैयायिकाः कथयन्ति। तत्रोदाहरणं पर्वतो वह्निमानिति वाक्यम्।

अस्य वाक्यस्य नामान्तरं प्रतिज्ञा। प्रतिज्ञावाक्यमित्यर्थः। ततः पर्वतः कथं वह्निमानिति जिज्ञासायां तत्साधको हेतुः प्रस्तूयते धूमवत्त्वादिति। धूमज्ञानज्ञाप्यं वह्निरूपं साध्यमित्यर्थः। इदञ्च साध्यसाधकं हेतुवाक्यं लिङ्गमिति प्रसिद्धं नामान्तरम्। तत्कथं सम्भवतीति जिज्ञासायां तदुदाहरणस्वरूपमित्थमुच्यते- यो यो धूमवान् भवति स स वह्निमान्, यथा- पाकशालादिकम्। यतो हि पाकशालायां धूमो वर्तते चेत् तत्र वह्निरपि। इदमेवोदाहरणवाक्यमित्यर्थः। तथा चायं पर्वतो वर्तते।

अर्थाद् वह्निव्याप्यधूमवानयं पर्वतस्तथैवास्ति। इदञ्चोपनयवाक्यस्वरूपम्। तस्माद् वह्निव्याप्यधूमवत्त्वादयं पर्वतो वह्निमानिति निष्कर्षात्मकं ज्ञानमेव निगमनमिति कथ्यते। अस्यैव प्रसिद्धं नामान्तरमनुमितिः। अनया रीत्या पञ्चावयवानां वाक्यानां प्रयोगद्वारा ज्ञातानुमानप्रक्रियो जनोऽन्यमनुमित्सुं प्रति बोधयति चेत्तथाविधमनुमानं परार्थम्। अनेन एतादृशप्रतिज्ञादिपञ्चवाक्येन प्रतिपादितात् = यथाक्रमं निर्देशिताल्लिङ्गपरामर्शात्मकात् ज्ञानाद् अनुमित्सुरन्योऽपि अग्निम् = धूमहेतुज्ञानज्ञाप्यमदृष्टं साध्यरूपमग्निं प्रतिपद्यते = अनुमिनोति = अनुमित्यात्मिकां प्रमितिमवधारयति।

तत्र प्रतिज्ञादिपञ्चकसमुदायो न्यायः। तादृशन्यायप्रयोज्यं परार्थानुमानं भवति। एतादृशानुमानेनैव अनुमेयपदार्थानां प्रतिपत्तिरुपपद्यते। निश्चयात्मकं ज्ञानं जायते। अनुमेययदार्थप्रतिपत्तये एषा विशेषेण न्यायदर्शनेन निर्दिष्टा अनुमानप्रक्रिया ह्यत्यन्तं वैज्ञानिकी व्युत्पादिका बोधपरका च मन्यते। इदमेकं दिग्दर्शनमात्रम्।

## पञ्चावयववाक्यनिरूपणम्

**मूलम्– प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्त्वादिति हेतुः। यो यो धूमवान् स वह्निमान् यथा महानस इति उदाहरणम्। तथा चायमिति उपनयः। तस्मात् तथेति निगमनम्।**

**व्याख्या-** स्वार्थानुमाने परार्थानुमाने च पञ्च अवयवा उपयोगिनो भवन्तीति पूर्वमुक्तम्। ते च पञ्च अवयवाः के ? तन्नामानि च कानीति जिज्ञासायामुच्यते प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवा इति। प्रतिज्ञा च हेतुश्च उदाहरणञ्च उपनयञ्च निगमनञ्चेति द्वन्द्वसमासः। स्वार्थानुमितिं परार्थानुमितिञ्च प्रति उक्तानि प्रतिज्ञादिपञ्चवाक्यानि हेतुभूतानि। प्रतिज्ञादिपञ्चकत्वमवयवसामान्यलक्षणम्। अथवा प्रतिज्ञाद्यन्यतमत्वमवयवसामान्यलक्षणम्। तत्रान्यतमत्वं नाम भेदकूटावच्छिन्नप्रतियोगिताकभेदवत्त्वम्। तच्च प्रत्येकं प्रतिज्ञाहेत्वादिवाक्येषु सत्त्वाद् भवति लक्षणसङ्गतिः।

अतः परमेकैकस्य प्रतिज्ञादिवाक्यस्य लक्षणमुच्यते- **साध्यनिर्देशः प्रतिज्ञा (न्या.सू. १।१।३३)** इति न्यायसूत्रानुसारेण साध्यविशिष्टपक्षबोधकं वचनं प्रतिज्ञा इत्युच्यते। यथा- पर्वतो वह्निमानिति प्रतिज्ञावयववाक्यम्। अत्र साध्यो वह्निश्चेत् पर्वतः पक्षः वह्निः संयोगेन पर्वते वर्तते। अतः

संयोगसम्बन्धेन वह्निविशिष्टः पर्वतस्तद्बोधकं पर्वतो वह्निमानिनिति प्रतिज्ञावचनम् । इत्थञ्च तादृशं वाक्यं हि प्रतिज्ञाबोधकं भवतीति निश्चेतुं शक्यते । यतो हि पर्वतरूपस्य पक्षस्य साध्यविशिष्टत्वात् साध्येन विशेषणेन विशिष्टो पर्वतो भवतीति पर्वतो वह्निमानिनिति प्रतिज्ञावयववाक्यमिति निश्चीयते । तथैव- शब्दोऽनित्यः, अयमात्मा इत्यादीनि प्रतिज्ञावाक्यानि यथायथं ज्ञेयानि । द्वितीयमवयवात्मकं हेतुबोधकं वाक्यम् । **उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः (न्या.सू. १।१।३४)** न्यायसूत्रानुसारेण उदाहरणस्य साधर्म्यात् = सामानाधिकरण्यात्, अर्थात् पाकशालादौ वह्निधूमयोः सामानाधिकरण्यं प्रत्यक्षीक्रियते, ततः पुरोवर्तिनि पर्वते धूमो दृश्यते, तादृशधूमदर्शनेन पर्वतस्य वह्निमत्त्वं सिद्ध्यतीति उदाहरणसादृश्यात् साध्यस्य वह्नेः साधनम् = हेतुर्धूमोऽस्तीति निश्चीयते ।

तथैव यदा पर्वतो वह्निमान् इति वाक्यं श्रूयते तदा कस्मात् पर्वतस्य वह्निमत्त्वं सम्भवतीति जिज्ञासा जायते तन्निवृत्तये हेतुवाक्यं प्रयुज्यते- धूमवत्त्वादिति धूमादित्यर्थः । यतो हि साध्यसाधकं हेतुपदं पञ्चम्यन्तं भवति । अतो धूमवत्त्वादित्युक्तम् । अत्र पर्वते धूमो दृश्यते । अतो धूमसद्भावात् पर्वतो वह्निमानस्तीति निश्चेतुं शक्यते । तथैव क्वचित् तृतीयान्तं पदमपि हेतुवचनं भवति । यथा- 'अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि' अत्रान्वयव्याप्त्या व्यतिरेकव्याप्त्या च साध्यसाधकं लिङ्गमन्वयव्यतिरेकीति पदद्वयं तृतीयान्तं वर्तते । तेन साध्यसाधकस्य लिङ्गस्यान्वयव्यतिरेकित्वं सिद्धं भवति ।

अनेन प्रकारेण प्रायः पक्षसाध्यहेतुघटितानुमानवाक्येषु हेतुबोधकं पदं पञ्चमीविभक्त्यन्तमेव भवति । तत्कथं सम्भवति ? कुत्रचित् प्रत्यक्षस्थले एतादृशमुदाहरणं प्रदर्श्यतामिति हेतुवाक्यप्रयोक्तारं प्रति जिज्ञासा क्रियते । तन्निवृत्तये प्रत्यक्षात्मकमुदाहरणवाक्यमुपस्थाप्यते- यो यो धूमवान् भवति स स वह्निमानवश्यं भवति, यथा पाकशालादिकम् इति । तत्र वह्निधूमयोः सामानाधिकरण्यं प्रत्यक्षतोऽनुभूयते, अतस्तत्स्वरूपं स्पष्टयन् कथयति- पदकृत्यकारः- 'व्याप्तिप्रतिपादकं दृष्टान्तमुदाहरणम्' इति । येन दृष्टान्तवचनेन व्याप्तिः प्रतिपाद्यते तादृशं वचनमुदाहरणमित्युच्यते । यो यो धूमरूपहेतुमान् (पाकशालादिकम्) स स वह्निरूपसाध्यवानित्युदाहरणवाक्यं व्याप्तिबोधकम् । तत्र धूमस्य वह्निजन्यत्वाद् धूमो वह्निव्याप्तिविशिष्ट इति । तद्विशिष्टपाकशालाद्युदाहरणद्वारा निश्चीयते । अतः पाकशालादिकमुदाहरणम् ।

"तथा चायमित्युपनयः" इत्युपनयस्य अभिनयात्मको निर्देशः । अस्यैव प्रसिद्धं नामान्तरं परामर्शः । तथा चेत्यस्य तेन प्रकारेण, वह्निव्याप्यधूमो वर्तत इति निश्चयेन अयम् = पर्वतादिपक्षस्तादृशव्याप्तिविशिष्टहेतुमानस्तीति श्रोतुः पुंसो निश्चयो भवति । अत्र व्याप्तिविशिष्टस्य

हेतोर्धूमस्य पक्षेण पर्वतेन सह सम्बन्धविषयकं ज्ञानं जायते। अतस्तत्स्वरूपं प्रकाशयन् कथयति पदकृत्यकारः- 'उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनय' इति। अर्थादुदाहरणविषयीभूता या साध्यनिरूपिता व्याप्तिस्तदविशिष्टत्वेनानुभूयमानस्य हेतोर्या पक्षधर्मता = पक्षेण सह सम्बन्धस्तत्प्रतिपादकं वचनमुपनयः। अस्यैव संज्ञान्तरं परामर्श इति नव्याः प्रतिपादयन्ति।

तस्मात्तथेति निगमनम्। तत्र तस्मान्नाम पक्षस्य साध्यनिरूपितव्याप्तिविशिष्टहेतुमत्त्वात्, तथा = पक्षः साध्यवानिति निश्चयात्मकं ज्ञानमेव निगमनमित्युच्यते। यथा- पर्वतो वह्निमानिति 'प्रतिज्ञावचनस्य वह्निनिरूपितव्यप्तिविशिष्टधूमवान् पर्वतः' इति यदुपनयस्वरूपमुपपन्नं भवति, तस्मात् = तादृशव्याप्तिविशिष्टधूमवत्त्वात्, तथा = पर्वतो वह्निमानित्युपपन्नमुपसंहारात्मकं वाक्यं निगमनम्।

इदञ्च ज्ञानमनुमितिरिति नव्याः कथयन्ति। अनया रीत्या यथाक्रमं पर्वतो वह्निमानिति प्रतिज्ञा। धूमादिति पञ्चम्यन्तं पदं साध्यसाधकं लिङ्गं हेतुः। यो धूमवान् स वह्निमान् यथा महानसम् इति व्याप्तिप्रतिपादकं वाक्यमुदाहरणम्। तथा चायम् = वह्निव्यप्तिविशिष्टधूमवानयमिति परामर्शानुकरणात्मकं वाक्यमुपनयः। अयमेव परामर्शः लिङ्गपरामर्शो वेति नव्यनैयायिका वदन्ति। तस्मात्तथेत्युक्तौ पक्षस्य पर्वतस्य वह्निव्याप्तिविशिष्टधूमवत्त्वात् पर्वतो वह्निमानिति निश्चयात्मकं ज्ञानं निगमनम्। इयमेवानुमितिप्रमेत्युच्यते। एतादृशपञ्चावयववाक्यसमुदाय एव न्याय इति नाम्ना व्यवह्रियते। तत्र प्रतिज्ञादयः प्रत्येकं ये सन्ति ते अवयवपदवाच्याः न्यायावयवाः इत्यर्थः। एतानि वाक्यानि परस्यानुमितिं प्रति उपयोगीनि भवन्तीति तेषामनुमितिहेतुत्वमुपपद्यते = सिद्ध्यतीत्यर्थः।

## स्वार्थानुमितिपरार्थानुमित्योः करणनिर्धारणम्

**मूलम्– स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्।**

**व्याख्या-** इतः पूर्वं स्वार्थं परार्थञ्चेति द्विविधस्यानुमानस्य पार्थक्यं प्रदर्शितम्। तत्र सम्प्रति योऽनुमाता स्वयमेवं पञ्चावयववाक्यानि अनुभवन् स्वप्रतिपत्तयेऽनुमितिं करोति सा स्वार्थानुमितिरित्युच्यते। अर्थात् स्वार्थं स्वीयप्रयोजनाय सम्पन्ना अनुमितिः = अनुमित्यात्मकं ज्ञानं स्वार्थानुमितिरित्यर्थः।

तथैव पूर्वदर्शितरीत्या परं प्रति बोधयितुं यत्र प्रतिज्ञादिपञ्चावयववाक्यानि यथाक्रमं प्रयुज्य अनुमित्यात्मकं फलमुत्पाद्यते सा परार्थानुमितिपदवाच्या परस्यात्मनि सम्पन्नानुमितिः ।

इत्थञ्चानुमितिप्रक्रियाभेदेन स्वार्थानुमितिः परार्थानुमितिश्चेति भिन्नभिन्नसंज्ञकानुमितिरपि द्विविधा । तादृशानुमितिद्वयं प्रति लिङ्गपरामर्श एव करणम् । अनुमीयते अनेनेति करणव्युत्पत्त्या निष्पन्नस्यानुमानपदस्यानुमितिकरणमर्थः । तदैव लिङ्गपरामर्शात्मकं करणं भवतीति स्वार्थानुमितिं परार्थानुमितिञ्च प्रति लिङ्गपरामर्शस्यैव करणत्वाद् लिङ्गपरामर्शोऽनुमानमित्युक्तं तर्कसङ्ग्रहकारेण ।

अत्र तस्मादित्यस्य द्विविधानुमितिं प्रति लिङ्गपरामर्शस्य करणत्वादित्यर्थः । एतादृशो लिङ्गपरामर्श एव तृतीयं ज्ञानमित्युच्यते । तृतीयक्षणे लिङ्गपरामर्शात्मकं ज्ञानं कथमुपपन्नं भवतीति परामर्शनिरूपणावसरे स्फुटीकृत्य व्याख्यातमस्ति । एतेनानुमितिं प्रति व्याप्तिज्ञानं करणं भवतीति प्रतिपादयतां नैयायिकानां मतमपि निरस्तम् । यतो हि तर्कसङ्ग्रहकारेण एवकारपूर्वकं लिङ्गपरामर्शस्य द्विविधानुमितिकरणत्वं व्यवस्थापितम् ।

केचन व्याख्यातारोऽस्याभिप्रायमित्थं निर्दिशन्ति- लिङ्गपरामर्शतत्कारणीभूतज्ञानमनुमानमित्यर्थः । एतेन ज्ञायमानलिङ्गस्य करणत्वं स्वीकुर्वतां प्राचां मतमपि निरस्तं भवति । अतीतानागतधूमादिनापि यज्ञशालादौ वह्नेरनुमित्युपपत्तेः । तत्र ये व्यापारवत्कारणं करणमिति स्वीकुर्वन्ति, तन्मते व्यप्तिज्ञानमेव करणं लिङ्गपरामर्शो व्यापार इति यथामतं तत्स्वरूपं निर्धार्यते ।

## लिङ्गभेदनिरूपणम्

**मूलम्– लिङ्गं त्रिविधम्–अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति ।**

**व्याख्या-** इतः पूर्वं स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणमिति ग्रन्थेन स्वार्थानुमितिं परार्थानुमितिञ्च प्रति तृतीयलिङ्गपरामर्शस्यैव करणत्वं प्रतिपादितम् । इदानीं लिङ्गपरामर्शघटकीभूतं लिङ्गं कतिविधं किं नामधेयञ्चेति शिष्यस्य या जिज्ञासा जायते तदुपशमनाय यथाप्रसङ्गं नामोल्लेखेन सह तद्भेदनिर्देशो विधीयते । तथा च लिङ्गं त्रिविधम् = त्रिप्रकारकमित्यर्थः । तत्र लिङ्गं नाम लीनम् = अदृष्टं साध्यरूपमर्थं गमयति = बोधयति यत्तल्लिङ्गमिति व्युत्पत्त्या अदृष्टसाध्यरूपस्यार्थस्य बोधकं सिद्धं हेतुभूतं लिङ्गमित्यर्थः यतो हि सिद्धस्यैव पदार्थस्य साध्यसाधनत्वं सम्भवति येन खलु असिद्धस्य अदृष्टस्य वस्तुनः सिद्धिः क्रियते ।

तच्च (लिङ्गम्) अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति भेदेन त्रिप्रकारकं भवति । यतो हि नैयायिका अनुमेयपदार्थप्रतिपत्तये अनुमानत्रयं पुरस्कृत्य अनुमेयान् पदार्थान् साधयितुमिच्छन्ति । अत्रान्वयो नाम अन्वयव्याप्तिश्चेद् व्यतिरेको नाम अभावघटिता व्याप्तिरित्यर्थः । तत्र व्यतिरेकपदवाच्यार्थोऽभावः । यस्मिन्ननुमानवाक्ये उभयविधा व्याप्तिर्लभ्यते । अर्थादन्वयव्याप्तिर्व्यतिरेकव्याप्तिश्चेति यस्मिन् साध्यसाधके हेतौ लभ्यते तादृशो हेतुरुभयविधव्याप्तिविशिष्टो भवति । अतस्तल्लिङ्गम् = साध्यसाधको हेतुस्तद्घटितो लिङ्गपरामर्शात्मकमनुमानमन्वयव्यतिरेकि ।

## अन्वयव्यतिरेक्यनुमाननिरूपणम्

**मूलम्– अन्वयेन व्यतिरेकेण च व्याप्तिमद् अन्वयव्यतिरेकि । यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निर्यथा महानसमिति अन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यप्तिरेकव्याप्तिः ।**

**व्याख्या-** इदानीमुदाहरणप्रदर्शनपुरस्सरमन्वयव्यतिरेक्यनुमानस्वरूपं प्रस्तूयते । यथा- पर्वतो वह्निमान् धूमादित्यनुमानवाक्यम् । अत्र पर्वतः पक्षः, वह्निः साध्यम्, धूमादिति हेतुः । धूमहेतुना पर्वते वह्निः साध्यते । अत्र साध्यसाधको धूमहेतुरन्वयव्याप्त्या व्यतिरेकव्याप्त्या च युक्तः । तत्र वह्नौ साध्ये धूमस्यान्वयव्यतिरेकव्याप्तिमत्त्वं कथमिति शङ्कां समादधानो ग्रन्थकारः कथयति- अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि । यथा वह्नौ साध्ये धूमवत्त्वम् इति ।

अन्वयेन व्यापकसामानाधिकरण्यरूपव्याप्त्या तद्विशिष्टमनुमानमेवान्वयव्याप्तिमदनुमानमित्युच्यते । यत्र धूमस्तत्राग्निरिति साहचर्यानुरोधेन धूमव्यापकवह्निसामानाधिकरण्यरूपान्वयव्याप्तिर्धूमात्मके हेतौ वर्तते । तादृशान्वयव्याप्तेरुदाहरणञ्च महानसम् । यतो हि महानसे वह्निधूमयोः साहचर्यं प्रत्यक्षतोऽनुभूयते । पर्वतो वह्निमान् धूमादित्यत्र हेतावन्वयव्याप्तिमत्त्वादन्वयलिङ्गकमनुमानम् । एवमेवान्यत्रापि अयमात्मा ज्ञानात्, शब्दोऽनित्यः कृतकत्वादित्याद्यनुमानानि अन्वयव्याप्तिकानि भवितुमर्हन्ति । तथैवोक्तस्थले व्यतिरेकव्याप्तिश्च दृश्यते । तत्र व्यतिरेको नामाभावः ।

ततश्च साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तेर्लक्षणम् । व्यतिरेकस्थले यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभाव इति रीत्याऽन्वयव्याप्तिविपरीततया व्याप्यव्यापकभावस्वरूपं

स्वीक्रियते । तथा च यत्र जलह्रदादौ वह्न्यभावो लभ्यते तत्र धूमाभावस्यापि वर्तमानत्वाद् वह्न्यभावव्यापकीभूताभावो धूमरूपहेत्वाभावस्तत्प्रतियोगित्वं धूमे सत्त्वाद् भवति लक्षणसङ्गतिः ।

इममेव विषयं स्फुटीकृत्य न्यायबोधिनीव्याख्यायामुच्यते– इयञ्च व्याप्तिर्यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभाव इति । वह्न्यभावस्य यावत्सु जलह्रदाद्यधिकरणेषु धूमरूपहेत्वाभावस्य (धूमाभावस्य) सत्त्वात् तत्प्रतियोगित्वं हेतुनिष्ठमिति व्यतिरेकव्याप्तिविशिष्टो धूमहेतुभर्वतीति पूर्वोक्तमनुमानं यथा अन्वयि तथैव व्यतिरेकि च । अर्थादन्वयव्यतिरेकव्याप्तिविशिष्टलिङ्गकमनुमानं पर्वतपक्षकवह्निसाध्यकधूमहेतुकम् इत्यर्थः । एतादृशव्यतिरेकव्याप्तिकपरामर्शस्तु वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवानयं पर्वत इत्याकारकः ।

अनया रीत्या अन्वयव्याप्तिमत्त्वेन व्यतिरेकव्याप्तिमत्त्वेन च पर्वते पक्षे वह्निसाधने धूमलिङ्गकमनुमानमन्वयव्यतिरेकीति निश्चीयते । एतादृशस्थलेषु अधोनिर्दिष्टव्याप्यव्यापकभावस्वरूपपरिचायकपद्यमिदं सर्वथाऽनुसंन्धेयम् । तद्यथा-

**व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते ।**
**तयोरभावयोस्तस्माद् विपरीतः प्रतीयते ।**
**अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते ।**
**साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः ।**

पर्वतो वह्निमान् धूमात्, अयमात्मा ज्ञानादित्यादिभावस्थलेषु भावयोः = अभावभिन्नयोर्वह्निधूमादिभावपदार्थयोर्येन रूपेण व्याप्यव्यापकभावः = व्याप्यत्त्वं व्यापकत्वमिष्यते = विवक्ष्यते, तयोरभावयोः = तादृशभावपदार्थयोर्व्यतिरेक्यनुमानप्रयोगे तु अन्वयानुमानभिन्नतया पर्वतो वह्निमान् धूमादित्यादिकभावस्थलीयानुमानात्, तद्विपरीततया = अन्वयानुमानभिन्नतया प्रतीयते = अवगम्यते = ज्ञानविषयीक्रियत इत्यर्थः ।

तत्र अन्वयव्याप्तिप्रदर्शने साधनम् = साध्यस्य साधको हेतुर्लिङ्गं वा व्याप्यम् = व्याप्त्याश्रयीभूतं भवति, तस्य प्रयोगश्च प्रथमतया भवति । साध्यम् = हेतुज्ञानज्ञाप्यमदृष्टं साध्यम् (वह्न्यादिकम्) व्यापकम् = हेतुमन्निष्ठात्यन्ताभावाप्रतियोगिरूपं हेतुव्यापकं भवति । यत्र यत्र हेतुस्तत्र तत्र साध्यमिति साहचर्यनियमानुरोधेन हेतुव्यापकसाध्यसामानाधिकरण्यम्, तच्च साध्यसाधकहेतुनिष्ठमित्यर्थः । अन्यथा = अन्वयव्याप्तिविपरीतानुमानप्रयोगे साध्याभावः = वह्न्यभावः, व्याप्यः = व्याप्त्याश्रयो

भवति, चेत् साधनात्ययः = हेत्वाभावः (धूमाभावः) व्यापकः। अर्थात् साध्याभावव्यापकीभूताभावो हेत्वाभावः।

ततश्च साध्याभावस्य व्याप्यत्वम्, हेत्वाभावस्य च व्यापकत्वमिति रीत्या अन्वयव्याप्तिविपरीतरूपेण व्याप्यव्यापकभावः प्रतीयते। एषा व्याप्यव्यापकभावव्यवस्था यावत्सु अन्वयव्यतिरेक्यनुमानेषु प्रवर्तते। अतस्तादृशस्थलेषु पूर्वोक्तानुसारेणैव व्याप्यव्यापकभावस्य प्रदर्शनं विधेयम्। तथैव अन्वयव्याप्तिकस्थले व्यतिरेकव्याप्तिकस्थले लक्ष्यानुसारेण व्याप्तिलक्षणमुक्त्वा तत्समन्वयो विधेयः।

## केवलान्वयिलक्षणनिरूपणम्

**मूलम्– अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात् पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।**

**व्याख्या-** अन्वयव्यतिरेकव्याप्तिकानुमानं निरूपितम्। इदानीं क्रमप्राप्तं केवलान्वयिनो लक्षणमुपस्थाप्यते। यत्र केवलमित्यस्य अर्थः = मात्रम्। अन्वयपदस्यार्थः = अन्वयव्याप्तिः। यस्मिन् साध्यसाधके हेतौ अन्वयमात्रव्याप्तिरनुभूयते तादृशमनुमानं केवलान्वयीत्युच्यते। यथोक्तं तल्लक्षणं तर्कसङ्ग्रहकारेण- अन्वयमात्रव्याप्तिकं केवलान्वयि इति। तदुदाहरति ग्रन्थकारः- घटोऽभिधेयः प्रमेयत्वात् पटवदिति। अस्मिन्ननुमानवाक्ये- घटः पक्षः, अभिधेयत्वं साध्यम्, प्रमेयत्वं हेतुः, पटवदिति दृष्टान्तः। तथा च प्रमेयत्वहेतुना घटे पक्षे अभिधेयत्वं साध्यते। तत्रोदाहरणञ्च पटवदिति, यतो हि पटे साध्यम्=अभिधेयत्वम्, हेतुश्च=प्रमेयत्वम् वर्तते, अतः पटस्य दृष्टान्तत्वं सर्वजनानुभवगम्यत्वम्।

यत्र यत्र प्रमेयत्वं तत्र तत्र अभिधेयत्वमिति साहचर्यनियमो दृश्यते। हेतोः प्रमेयत्वस्याधिकरणे प्रमेये द्रव्यादिपदार्थे साध्यस्य = अभिधेयत्वस्य अभावो न लभ्यते। यतो हि जगति सर्वेऽपि पदार्थाः प्रमेयात्मकाः, अतस्तेऽभिधेयाश्च अभिधानार्हा इत्यर्थः। अभिधातुं योग्याः, सर्वेऽपि जगति प्रतीयमानाः पदार्थाः प्रमातुं योग्या भवन्त्येव।

तत्र प्रमेयत्वं नाम = प्रमाविषयत्वम्। प्रमा च = यथार्थज्ञानम्, तादृशयथार्थज्ञानविषयीभूताः पदार्था एव प्रमेयपदेन अभिधीयन्ते = व्यवह्रियन्ते इत्यर्थः। अनया रीत्योक्तस्थले अभिधेयत्वरूपसाध्यसाधके प्रमेयत्वहेतौ हेतुव्यापकसाध्यसामानाधिकरण्यरूपान्वयव्याप्तिमात्रं लभ्यते, तत्र अभिधेयत्वरूपसाध्यस्य

सर्वत्र विद्यमानत्वात् तदभावः क्वापि न लभ्यते । अतोऽन्वयमात्रव्याप्तिकं प्रमेयत्व लिङ्गकमिदमनुमानं केवलान्वयीत्युच्यते । अत्र व्यतिरेकदृष्टान्ताभावाद् व्यतिरेकव्याप्तिर्न सम्भवति । तस्माद् उक्तञ्च ग्रन्थकारेण- अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति । सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च ।

अत्र घटोऽभिधेयः प्रमेयत्वादित्यादिस्थलेषु हेतुसाध्ययोः = प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिः = अन्वयव्याप्तिभिन्ना या साध्याभावव्यापकीभूताभावव्याप्तिः, सा तत्र नास्ति = न सम्भवति, तत्र किं कारणमिति जिज्ञासायामुच्यते सर्वस्यापि प्रमेयत्वात् = जगति विद्यमानस्य अनुभूयमानस्य च पदार्थस्य प्रकृष्टज्ञानविषयत्वात्, तदभावः क्वापि न प्रसिद्धः । तथैव अभिधेयत्वं नाम = अभिधानयोग्यत्वं तदपि सर्वत्र पदार्थेषु वर्तत इति तदभावोऽपि क्वापि लब्धुं न शक्यः । अतस्तथाविधाभिधेयत्वाभावस्या-प्रसिद्धया साध्याभावव्यापकीभूताभावरूपा व्यतिरेकव्याप्तिस्तत्र नैव सङ्गच्छत इति अन्वयव्याप्तिमात्रं विद्यते, तस्माद् घटपक्षकाभिधेयत्वसाध्यकप्रमेयत्वलिङ्गकमनुमानं केवलान्वयि ।

अत एव केवलान्वयिलक्षणमुपस्थापयता न्यायबोधिनीकृता प्रोक्तम्- 'केवलान्वयित्वञ्चात्यन्ताभावाप्रतियोगित्वम् । एतल्लक्षणलक्ष्यञ्च केवलान्वयित्वेनाभिमतं हेतुभूतं प्रमेयत्वादिकम् । घटोऽभिधेयः प्रमेयत्वादित्यत्र हेत्वधिकरणे प्रमेयपदार्थे क्वापि प्रमेयत्वं नास्तीति वक्तुं न शक्यते, सर्वत्र प्रमेयत्वस्य वर्तमानत्वादपि तु घटो नास्तीत्याकारकः प्रतीतिसाक्षिकाभावस्तत्प्रतियोगित्वं घटेऽप्रतियोगित्वञ्च प्रमेयत्वहेतौ सत्त्वाल्लक्षणसमन्वयः । तथैवाभिधेयत्वरूपस्य साध्यस्यापि केवलान्वयित्वात्, तादृशसाध्यनिरूपितव्यतिरेकव्याप्तेरसत्त्वादेवान्वयमात्रव्याप्तिकं केवलान्वयीति यल्लक्षणं तर्कसङ्ग्रहकारेण प्रोक्तं तत् सर्वथोपपन्नमिति भावः । अन्वयमात्रव्याप्तिकमिति लक्षणघटकानां पदानां व्युत्पत्तिं निर्दिशन् पदकृत्यकृत् ब्रूतेऽन्वयेनैव व्याप्तिर्यस्मिन् स तथा । अयमभिप्रायः—अन्वयरूपेणैव या व्याप्तिः साध्यसाधके यस्मिन् प्रमेयत्वादिहेतौ येन रूपेण भासते तादृशव्याप्तिको हेतुः केवलान्वयी । एवम्भूतं साध्यसाधकं यल्लिङ्गं तत्केवलान्वयि ।

## केवलव्यतिरेक्यनुमानलक्षणनिरूपणम्

**मूलम् – व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद् गन्धवद् यथा जलम् । न चेयं तथा । तस्मान्न तथेति । अत्र यद् गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ।**

**व्याख्या-** केवलान्वयानुमाननिरूपणानन्तरं क्रमप्राप्तं केवलव्यतिरेकानुमानं निरूप्यते । व्यतिरेकमात्रव्याप्तिकत्वं केवलव्यतिरेक्यनुमानस्य लक्षणम् । अर्थाद् यस्मिन् हेतौ व्यतिरेकव्याप्तिमात्रं

लभ्यते, तदतिरिक्तान्वयव्याप्तिः, अन्वयव्यतिरेकोभयात्मिका व्याप्तिश्च न सम्भवति चेत्तादृशमनुमानं केवलव्यतिरेकीति नाम्ना व्यवह्रियते । यथा पृथिवी स्वेतरभिन्ना गन्धवत्त्वात्, यन्नैवं तन्नैवं यथा जलम् । अस्मिन्ननुमाने पृथिवी पक्षत्वेन गृह्यते । अतः पृथिवीत्वावच्छिन्नपृथिवीपदार्थः पक्षः । स्वेतरभिन्नेत्यत्र स्वपदेन पृथिवीद्रव्यं गृह्यते तदितरो नाम = पृथिव्या भेदः, अन्योन्याभावः इत्यर्थः, भिन्ना = भेदवती । पृथिवीतराणि यानि जलादीनि द्रव्याणि, तेषां (जलादीनाम्) भेदः पृथिव्यां वर्तते । अतः पृथिवीतरभेदः साध्यः, गन्धवत्त्वं हेतुः ।

तथा च पक्षभूतायां पृथिव्यां गन्धवत्त्वहेतूनां स्वेतरभेदः साध्यते । अत्रान्वयदृष्टान्तो न लभ्यते । उक्तञ्च- यन्नैवं तन्नैवं यथा जलमिति यत्र पृथिव्यामितरभेदः साध्यते तत्र साध्यं सन्दिग्धं वर्तते, पृथिवीं विहाय जलादौ गन्धो नास्ति । यतो हि गन्धः पृथिव्या विशेषगुणः, अतः पृथिवीमात्रवृत्तिर्गन्धः । अमुमेवाशयं स्पष्टयन्नाह मूलकारः- यदितरेभ्यो न भिद्यते न तद् गन्धवदिति । जलाद्यष्टद्रव्ये भेदाभावो यत्र तत्रैव गन्धाभावो यथा जलम् । एतादृशव्यतिरेकव्याप्तिमात्रकं गन्धहेतुकमनुमानमिदम् ।

ततश्च मूलकारीयलक्षणवाक्यमाधृत्य न्याबोधिनीकारो तल्लक्षणघटकमात्रपदस्यार्थं विशदयन् स्फुटीकरोति- 'अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकत्वम्' इति । पृथिवी स्वेतरसमस्तभिन्ना गन्धवत्त्वादित्यत्र यद् द्रव्यं (पृथिवी) तदितरभेदवदित्यन्वयदृष्टान्तो न सुलभः, तादृशदृष्टान्तस्याभावादेव हेतुव्यापकसाध्यसामानाधिकरण्यरूपा याऽन्वयव्याप्तिः सा गन्धवत्त्वहेतौ न सम्भवतीत्यन्वयव्याप्तिशून्यत्वमस्ति, तथैव यत्र यत्र पृथिवीतरभेदाभावस्तत्र गन्धाभाव इति व्यतिरेकदृष्टान्तो जलादौ प्राप्यते । अतो जलादिकं व्यतिरेकदृष्टान्तः ।

ततश्च साध्यो यः स्वेतरभेदस्तदभावव्यापकीभूतगन्धात्मकहेतोरभावः = गन्धाभावस्तत्र साध्याभावव्यापकत्वस्य सत्त्वाद् व्यतिरेकव्याप्तिमत्त्वञ्च पूर्वोक्तेतरभेदसाधके गन्धवत्त्वहेतावस्तीति भवति लक्ष्ये व्यतिरेकहेतौ लक्षणसमन्वयः । अमुमेवार्थमभिप्रेत्य तर्कसङ्ग्रहकारो यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलमिति व्यतिरेकव्याप्तिनिर्देशपूर्वकं सदृष्टान्तं तत्स्वरूपं व्यवस्थापितवान् । ततः परमुपनयात्मकं वाक्यं निर्दिशन् कथयति तर्कसङ्ग्रहकारो न चेयं तथा इति ।

इह इयमित्यनेन पक्षो निर्दिश्यते, सा तथा = इतरभेदाभावव्यापकगन्धाभावती पृथिवी न भवितुमर्हतीति । तेन इतरभेदसिद्ध्यर्थं व्यतिरेकव्याप्तिमात्रकगन्धवत्त्वहेतुरिति व्यतिरेकव्याप्तिज्ञानं जायते, तदनन्तरञ्च 'इतरभेदाभावव्यापकीभूतगन्धाभावस्य यः प्रतियोगी गन्धस्तद्वती पृथिवी' इति परामर्शाकारो निष्पद्यते । तज्जन्यानुमितिश्च पृथिवी स्वेतरभेदवतीति । व्यतिरेकेणैव =

अभावरूपेणैव, व्याप्तिः = साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपा या व्याप्तिः = सा यस्मिन् साध्यसाधके गन्धवत्त्वहेतौ लभ्यते तादृशमितरभेदसाधकमनुमानमित्यर्थः ।

अत्र व्यतिरेकपदानिवेशेऽन्वयव्यतिरेकीत्यनुमाने भवत्यतिव्याप्तिः तद्वारणाय व्यतिरेकपदं निवेश्यते । तन्निवेशे च अन्वयव्यतिरेक्यनुमाने पर्वतो वह्निमान् धूमादित्यत्र व्यतिरेकमात्रव्याप्तिकं नास्ति, अन्ययव्याप्तिकमपि तत्रास्तीति नातिव्याप्तिः । तथा च पृथिवी स्वेतरभिन्नेति पृथिवीत्वावच्छिन्नपृथिव्युद्देश्यकेतरभेदत्वावच्छिन्नेतरभेदविधेयकानुमितिरुपपद्यते ।

**केवलव्यतिरेक्यनुमानस्थले प्रतिज्ञादिकपञ्चावयवानां प्रयोगक्रमश्च अधोनिर्दिष्टानुसारेणावबोधनीयः**

| | **अवयवाः** | **उदाहरणानि** |
|---|---|---|
| १. | प्रतिज्ञा | पृथिवी स्वेतरभिन्ना (जलादिभिन्ना) |
| २. | हेतुः | गन्धवत्त्वात् (गन्धादित्यर्थः) |
| ३. | उदाहरणम् | यत्र जलादिभेदाभावस्तत्र गन्धवत्त्वाभावः, यथा- जलादिकम् इत्युदाहरणम् |
| ४. | उपनयः (परामर्शः) | न चेयं पृथिवी जलादिभेदाभावव्यापकीभूतगन्धाभाववती, अपि तु गन्धवती (अस्यैव अपरं प्रसिद्धं नाम परामर्शः) |
| ५. | निगमनम् | इयं पृथिवी स्वेतरभेदवती (इयञ्चानुमितिः) । |

**विशेषः**

अत्र पृथिवीत्वावच्छिन्नपृथिवीमात्रस्य पक्षत्वात्, तत्र गन्धवत्त्वस्य (गन्धस्य) सन्दिग्धत्वात् पृथिव्याः कोऽपि भागः सपक्षो भवितुं नार्हति । अतः पर्वतो वह्निमान् धूमादित्यत्र यथा महानसादिकमन्वयोदाहरणं सुलभं दृश्यते न तथा पृथिवी स्वेतरभिन्ना गन्धवत्त्वादित्यत्र । अतोऽन्वयव्याप्तेरसत्त्वात् पृथिवीपक्षक-स्वेतरभेदसाध्यकगन्धहेतुकानुमानं केवलव्यतिरेकि । इदञ्चानुमानमितरभेदसाधकम् । तस्मादस्य वैलक्षण्यं दृश्यते ।

## पक्षनिरूपणम्

**मूलम्– सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः ।**

**व्याख्या-** पक्षधर्मतेत्यत्र पक्षपदं श्रूयते । स च पक्षः कः ? किञ्च तदुदाहरणमिति जिज्ञासायां पक्षलक्षणमुच्यते– सन्दिग्धसाध्यावान् पक्ष इति । अत्र पक्ष इति लक्ष्यबोधकं पदञ्चेत् सन्दिग्धसाध्यवानिति दलं लक्षणबोधकम् । सन्दिग्धञ्च तत् साध्यञ्चेति सन्दिग्धसाध्यम् = द्वन्द्वकर्मधारयसमासः । सन्दिग्धसाध्यमस्मिन्नस्तीति सन्दिग्धसाध्यवान् यो भवति स पक्षः ।

'सम्' इति पूर्वकदिह्धातोः क्तप्रत्यये सति सन्दिग्धमिति क्तप्रत्ययान्तं क्रियापदं निष्पन्नं भवति । तत्र धात्वर्थः सन्देहः, क्तप्रत्ययेन विषयतावदर्थोऽभिधीयते । प्रकृते च प्रकारतावानर्थो गृह्यते । तादृशप्रकारतावतश्चाभेदसम्बन्धेन साध्यपदार्थेऽन्वयः । तथा च संशयनिरूपितप्रकारतावदभिन्नसाध्यनिष्ठप्रकारतानिरूपितविशेषतावान् पक्षः । पर्वतो वह्निमान् धूमादित्यत्र वह्निं कामयमानः कश्चन पर्वतसमीपं गत्वा पुरोदृश्यमानः पर्वतो वह्निमान् न वेति सन्दिग्धे । तदा स तस्मिन् पर्वते धूमं पश्यति, तेनायं पर्वतो धूमवानिति ज्ञानं तस्य पुरुषस्य जायते, इदञ्च पक्षधर्मताज्ञानमित्युच्यते । तत्र प्रथमतया पर्वतोऽयं वह्निमान् न वेति यत् संशयात्मकं ज्ञानमुत्पन्नं भवति, तत्र साध्यस्य वह्नेर्भानं प्रकारतया जायते, पर्वतश्च विशेष्यतया भासत इति संशयनिरूपितप्रकारतावदभिन्नवह्निनिष्ठा या आधेयता तन्निरूपिताधिकरणतावान् पर्वतो भवतीति धूमवत्त्वे हेतौ पर्वतः पक्षः ।

न्यायबोधिनीकारो मूलोक्तं लक्षणं स्पष्टयन् कथयति- साध्यप्रकारकसन्देहविशेष्यत्वं पक्षत्वम् इति । तदुदाहरति- पर्वतो वह्निमान् न वेति । अस्मिन् संशयात्मके ज्ञाने साध्यो वह्निः प्रकारतया भासते, चेत् पर्वतो विशेष्यतया प्रतीयते । तथा च साध्यप्रकारकसन्देहविशेष्यत्वं पर्वतो वह्निमान् न वेत्यत्र पर्वते वर्तते । अतो धूमहेतुना पर्वते वह्निरूपसाध्यसाधने सन्देहविशेष्यत्वं पर्वतस्य सत्त्वाद् भवति पक्षलक्षणलक्ष्ये पर्वते समन्वयः ।

अत्र पर्वतो वह्निमानित्यनुमितौ सत्यां पर्वतो वह्निमान् न वेति वह्निप्रकारकपर्वतविशेष्यकसन्देहविषयकं ज्ञानं नियमेन जायते, तत्र च साध्यस्य वह्नेः प्रकारतया पर्वतस्य पक्षस्य विशेष्यतया भासमानत्वात् विशेष्यभूतः पर्वतः पक्ष इत्युच्यते । अत एवैतल्लक्षणं प्राचां न तु नव्यानाम् । तल्लक्षणनिरूपणावसरे

अमुमेवाशयं प्रकाशयन्नाह न्यायबोधिनीकारः- इदञ्च लक्षणमनुमितेः पूर्वं साध्यसन्देहो नियमेन जायते इत्यभिप्रायेण प्राचीनैः कृतम् ।

नवीनाः पूर्वोक्तपक्षलक्षणे विमतौ युक्तिमुपस्थापयन्तः कथयन्ति- यस्मिन् काले कश्चन पुरुषः गृहाभ्यन्तरे प्रकोष्ठे स्थितो भवति गगने मेघगर्जनमकस्मात् शृणोति तदा तस्य गृहान्तर्वर्तिनः पुरुषस्य साध्यसन्देहो नास्ति, तस्यां स्थितावपि गगनं मेघवदिति गगनोद्देश्यकमेघप्रकारकानुमितिरुत्पद्यते, सा चानुमितिः केनापि निरोद्धुं न शक्यते । तदानीं साध्यसन्देहरूपपक्षस्य विरहेऽपि तादृशानुमितेर्दर्शनात् सन्दिग्धसाध्यवत्त्वं पक्षत्वमिति पक्षलक्षणं नोचितम्, लक्ष्यमात्रस्यासङ्ग्रहात् अर्थात् तल्लक्ष्यमात्रे पक्षलक्षणस्य समन्वयाभावात्तादृशप्राचीनकृतं लक्षणमुपेक्ष्य अनुमित्युद्देश्यत्वं पक्षत्वमिति पक्षलक्षणं नवीनैः स्वीक्रियते । अनुमित्युद्देश्यत्वं तु पक्षमात्रे सत्त्वाद् लक्ष्यमात्रे लक्षणगमनाद् न कश्चन दोषावसरः ।

## सपक्षः

**मूलम्– निश्चितसाध्यवान् सपक्षः । यथा तत्रैव महानसम् ।**

**व्याख्या-** पक्षलक्षणनिरूपणानन्तरं क्रमप्राप्तं सपक्षलक्षणमुच्यते- निश्चितसाध्यवान् सपक्ष इति । अत्र सपक्षं लक्ष्यीकृत्य निश्चितसाध्यवानिति सपक्षलक्षणं विधीयते । साध्यप्रकारकनिश्चयविशेष्यत्वमिति मूलवाक्यार्थः । यस्मिन् स्थले साध्यस्य वह्न्यादेर्निश्चयो वर्तते, तत्रैव साध्यप्रकारकनिश्चयविशेष्यत्वं भवितुमर्हति । यथा- पर्वते पक्षे वह्निः साध्यो भवति । तत्र तत्प्रकारकनिश्चयविशेष्यत्वं महानसादावस्तीति साध्यप्रकारकनिश्चयविशेष्यत्वेन प्रतीयमानं महानसादिकं सपक्षः । तत्रैव (महानसादावेव) साध्यप्रकारकनिश्चयसाध्यविशेष्यत्वस्य वर्तमानत्वादित्यर्थः । तथा च पर्वतो वह्निमान् धूमादित्यत्र महानसादिकं सपक्षः तत्र वह्निरूपसाध्यवत्त्वस्य निश्चयात् ।

## विपक्षः

**मूलम्– निश्चितसाध्याऽभाववान् विपक्षः यथा तत्रैव महाह्रदः ।**

**व्याख्या-** सपक्षलक्षणं निरूप्य इदानीं प्रसङ्गसङ्गत्या क्रमप्राप्तं विपक्षलक्षणं सोदाहरणं निरूपयितुमारभते ग्रन्थकारः । तथा चोक्तम्- निश्चितसाध्याभाववान् विपक्ष इति । यस्मिन् स्थले साध्याभावस्य

निश्चयो दृश्यते, तस्यैव विपक्षत्वम्। अत्र साध्याभावः प्रकारतया (विशेषणतया) भासते चेद् यत्र साध्याभावस्य निश्चयो भवति तस्य भानं विशेष्यतयेति। इत्थञ्च साध्यभावप्रकारको यो निश्चयस्तद्विशेष्यत्वं विपक्षत्वम्। यथा पर्वतो वह्निमानित्यत्र वह्न्यभाववान् ह्रदो विपक्ष भवति। ह्रदे कथमपि वह्निरूपं साध्यं स्थातुं न शक्नोति। अतो वह्न्यभावप्रकारकनिश्चयविशेष्यत्वस्य ह्रदे सत्त्वाद् भवति विपक्षलक्षणलक्ष्ये निश्चितसाध्याभाववति महाह्रदे लक्षणसमन्वयः। अत्र ह्रदपदमुपलक्षकम्। यत्र क्वापि जलह्रदनदीतडागादिषु साध्याभावस्य निश्चयो वर्तते, तानि सर्वाणि स्थानानि निश्चितसाध्याभाववन्तीति तादृशां सर्वेषां निश्चितसाध्याभाववतां विपक्षत्वमिति यथायथमूहनीयम्। एतेन पक्षसपक्षविपक्षाणां लक्षणानि उदाहरणानि च प्रदर्शितानि। तथा च पर्वतो वह्निमान् धूमादित्यत्र पर्वतः पक्षः सन्दिग्धसाध्यवत्त्वात्, महानसं सपक्षः निश्चितसाध्यवत्त्वात्, महाह्रदो विपक्षो निश्चितसाध्याभाववत्त्वादिति रीत्या स्थलानुसारेण पक्षसपक्षविपक्षाणां लक्षणानि उदाहरणानि च निर्धारयितुं शक्यन्ते।

## हेत्वाभासविभागनिरूपणम्

**मूलम्– सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः।**

**व्याख्या-** इतः प्राग् व्याप्तिपक्षधर्मताविशिष्टाः साध्यसाधकाः सद्धेतवो निरूपिताः। इदानीं हेतुगतान् दोषान् प्रदर्शयितुं हेत्वाभासानां भेदाः प्रस्तूयन्ते। तत्रादौ हेत्वाभासपदस्य व्युत्पत्तिनिर्देशनं विधीयते। एतेन हेत्वाभासपदबोध्यो योऽर्थस्तन्निर्धारणे सौकर्यं जायते। ततश्च हेत्वाभासपदं द्विधा व्युत्पन्नं भवति। तथा चात्र पदद्वयम्- हेतुपदम्, आभासपदञ्च। तत्र आभासन्त इति आभासाः = व्यभिचारविरोधादिदोषविशेषाः। हेतूनाम् = साध्यसाधकत्वेनोपस्थापितानामाभासाः = हेतुनिष्ठा व्यभिचारादयो दोषविशेषा इत्यर्थः। अत्र षष्ठीतत्पुरुषसमासः। एतादृशव्युत्पत्त्या निष्पन्नेन हेत्वाभासपदेन हेतुगता व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधादिदोषाः परिज्ञायन्ते।

हेतुवदाभासते इति व्युत्पत्त्या च हेत्वाभासपदस्य निष्पत्तिर्भवति। तत्र हेतुना तुल्यमिति विग्रहे वतिप्रत्यये कृते हेतुवदिति पदं निष्पद्यते। अत्र वतिप्रत्ययस्य तुल्यार्थे विधानाद्धेतुवदित्यस्य हेतुतुल्यमर्थः। स वस्तुतो हेतुर्नास्ति हेतुतुल्यम् = हेतुसदृशमनुभूयते। अर्थात् साध्यसाधकत्वाभाववति साध्यसाधकत्वभानमेव निरुक्तव्युत्पत्त्या निष्पन्नस्य हेत्वाभासपदस्यार्थः। तेन हि दुष्टाः साध्यासाधका अहेतव इत्यर्थः पर्यवस्यति।

इत्थञ्च व्युत्पत्तिभेदेन हेत्वाभासपदलभ्यमर्थद्वयम्, हेतुगता दोषविशेषा, व्यभिचारादयः। दुष्टाः (दोषविशिष्टा) अहेतवश्चेति। तर्कसङ्ग्रहकारेण तु हेतुगतदोषज्ञानं विना तद् विशिष्टानां हेतूनां निरूपणासम्भवात् प्रथमं दुष्टानां सव्यभिचारादिहेतूनां विभागो दर्शितः। किञ्च नैयायिका हेत्वाभासपञ्चकं स्वीकुर्वन्ति। अतः तान् निर्दिशन्नाह तर्कसङ्ग्रहकारः सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्चेति ।

अत्र सामान्यतया व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधाः पञ्च दोषाः सन्ति। एते च दोषा हेतुगता भवन्तीति ते दोषा यस्मिन् हेतौ वर्तन्ते प्रतीयन्ते च ते दुष्टा हेतव इत्युच्यन्ते, अतस्तान् दुष्टान् हेतून् प्रदर्श्य तादृशहेतूनां साध्यसाधकत्वं न भवितुमर्हतीति निश्चीयते। तथा चास्मिन् हेतौ व्यभिचारनामको दोषो दृश्यते स हेतुः सव्यभिचारः = व्यभिचारदोषेण युक्तः तथैव विरोधो दोषविशेषस्तेन युक्तो हेतुर्विरुद्धः। सत्प्रतिपक्षदोषविशिष्टो हेतुः सत्प्रतिपक्षितः, सत्प्रतिपक्षदोषेण युक्तः। तथैवासिद्धिदोषस्तेन युक्तो हेतुरसिद्धः, एवमेव बाधदोषेण दूषितो हेतुर्बाधितः। अनया रीत्या पञ्च हेत्वाभासाः पञ्चभिर्व्यभिचारादिभिर्दोषैर्युक्ताः ये भवन्ति ते दुष्टाः साध्यं साधयितुमसमर्थाः = अहेतव इत्यर्थः ।

### हेत्वाभासलक्षणम्

मूलकारेण हेत्वाभाससामान्यलक्षणं विनैव तेषां (हेत्वाभासानाम्) विभागः प्रदर्शितः। हेत्वाभासपदस्यैव दुष्टहेतुपरकत्वात् तदुपपत्तये स्वतन्त्रं लक्षणं नावश्यकमिति सूत्रकाराणां मतमिति तदनुसारेणैव भाष्यादिव्याख्याग्रन्थेषु स्फुटीकृत्य व्याख्यातं वर्तते। अतः सा एव सरणिस्तर्कसङ्ग्रहकारेणापि अनुसृतेति प्रतीयते। तस्मादेव तु न्यायसूत्रकारेण स्वातन्त्र्येण हेत्वाभासलक्षणप्रतिपादकं सूत्रं नैवोपदिष्टम्। तद्यथा- **सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः (न्या.सू. १।२।४)** अत्र केवलं हेत्वाभासानां विभागमात्रं निर्दिष्टम्। तथा च हेतुलक्षणाभावादेव व्यभिचारादिदोषैर्युक्ता हेतवो हेत्वाभासपदावाच्या भवन्तीति निष्कर्षः समधिगम्यते ।

सूत्रनिर्दिष्टहेत्वाभासविभागमात्रेण हेत्वाभासस्य समग्रं स्वरूपं निर्धारयितुं न शक्यत इति मनसि निधायैव उत्तरवर्तिनो व्याख्यातारो विवरणकाराश्च नैकविधानि हेत्वाभासलक्षणानि सोदाहरणं प्रदर्श्य विस्तारपूर्वकं तेषां लक्षणानां निरूपणं विहितवन्तः। तेषु ह्येकं व्याप्तिपक्षधर्मताद्यन्यतमशून्यत्वं हेत्वाभासलक्षणम्। असद्धेतव एव हेत्वाभासलक्षणलक्ष्या भवन्ति। यथा पर्वतो धूमवान् वह्नेरित्यत्र वह्निहेतौ धूमरूपसाध्यनिरूपिता व्याप्तिर्नास्ति, अतो धूमहेतौ व्याप्तिशून्यत्वमस्तीति

भवति लक्षणसमन्वयः। तथैव ह्रदो वह्निमान् धूमादित्यत्र "ह्रदो धूमाभाववान्" वर्तत इति पक्षधर्मताशून्यत्वं तत्र विद्यत इति भवति तत्र लक्षणसमन्वयः। तथैव क्वचिद् व्याप्तिशून्यत्वं क्वचित् पक्षधर्मताशून्यत्वम्, कुत्रचिच्चोभयशून्यत्वामिति रीत्या तथाविधा हेतवो दुष्टा भवन्तीति ते हेतवः साध्यं साधयितुं न पारयन्ति।

निष्कृष्टं लक्षणन्तु न्यायबोधिनीकारेणेत्थं निर्दिष्टम् - यद्विषयकत्वेन ज्ञानस्यानुमितितत्करणान्यतरप्रतिबन्धकत्वं तत्त्वं दोषसामान्यस्य लक्षणम्। अत्र यद्विषयकत्वेनेत्यत्र यत्पदं दोषबोधकम्, विषयकत्वेनेत्यत्र तृतीया विभक्तिः श्रूयते, तदर्थोऽवच्छिन्नत्वम्। यो विषयो यस्य (ज्ञानस्य) यद्विषयकम्, तस्य भावस्तत्त्वं यद्विषयकत्वं तेनेति व्युत्पत्त्या यद्विषयकत्वेन तृतीयान्तं समस्तं पदसमूहात्मकं वाक्यम्। तत्र यद्विषयकं नाम दोषविषयकं ज्ञानम्। तच्च अनुमितिस्तत्करणान्यतरप्रतिबन्धकं भवति।

तद्वत्ताबुद्धिं प्रति तदभाववत्ताबुद्धिः प्रतिबन्धिकेति नियमः। तत्र बाधज्ञानेन अनुमितिः प्रतिबध्यते। अतोऽनुमितिप्रतिबन्धकं बाधविषयकं ज्ञानम्। प्रतिबन्धके बाधविषयके ज्ञाने अनुमितिनिष्ठा प्रतिबध्यतानिरूपिता प्रतिबन्धकता वर्तते, तादृशप्रतिबन्धकतावच्छेदकं बाधविषयकत्वं तेन अवच्छिन्ना याऽनुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता बाधविषयकज्ञाननिष्ठा तद्वत्त्वञ्च बाधविषये लभ्यते। तथैव ज्ञानस्येत्यत्र षष्ठ्यर्थो वृत्तित्वम्, तस्यानुमितिनिष्ठा या प्रतिबध्यता तन्निरूपितप्रतिबन्धकतावच्छेदके यद्विषयकत्वेऽन्वयः। ततश्च यद्विषयकत्वावच्छिन्नमनुमितितत्करणान्यतरप्रतिबन्धकत्वं तत्त्वं हेत्वाभासत्वमिति हेत्वाभाससामान्यलक्षणम्।

बाधव्यभिचारादिदोषविषयकं ज्ञानं प्रतिबन्धकम्, प्रतिबन्धकतावच्छेदकञ्च तादृशबाधव्यभिचारादिविषयकत्वं तदवच्छिन्ना या अनुमितितत्करणान्यतरनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता तत्त्वं हेत्वाभासत्वमिति लक्षणार्थः। बाधविषयकं ज्ञानं साक्षादनुमितिप्रतिबन्धकम्। व्यभिचारविषयकं ज्ञानञ्च व्याप्तिज्ञानप्रतिबन्धकम्। ज्ञानयोरेव प्रतिबध्यप्रतिबन्धकभावः सम्भवति। ह्रदो वह्निमान् धूमादित्यत्र 'वह्न्यभाववान् ह्रदः' इत्याकारकं ह्रदविशेष्यकं वह्न्यभावप्रकारकं ज्ञानं भवति, तेन ह्रदो वह्निमानित्याकारिकानुमितिः प्रतिबध्यते। ततश्चोक्तस्थले वह्न्यभाववान् ह्रद इत्याकारकं यथार्थज्ञानं यदा वर्तते तदा ह्रदो वह्निमानित्याकारकं ज्ञानं न भवितुमर्हति।

लक्षणघटकान्यतरपदेन श्रूयमाणपदद्वयस्य मध्ये विवक्षितमेकं पदं गृह्यते । तथा च ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववान् ह्रद इत्याकारकबाधविषयकं ज्ञानं ह्रदो वह्निमानित्याकारकानुमितिप्रतिबन्धकं तादृशानुमितिप्रतिबन्धकतावच्छेदकं वह्न्यभाववद्ध्रदविषयकत्वं तदवच्छिन्ना या वह्न्यभाववद्ध्रदविषयकज्ञाननिष्ठा प्रतिबन्धकता तत्त्वं (प्रतिबन्धकविषयत्वम्) वह्न्यभाववान् ह्रद इति भवति बाधस्थले लक्षणसमन्वयः । अतो ह्रदे पक्षे वह्निसाधने धूमहेतुर्बाधितः, बाधदोषवानित्यर्थः । तादृशेन बाधितेन हेतुना ह्रदे पक्षे वह्निः साधयितुं न शक्यते ।

तथैव पर्वतो धूमवान् वह्नेरित्यत्र साध्यो धूमस्तदभाववान् तप्तायःपिण्डः, तद्वृत्तित्वमेव वह्नौ वर्तते । अतो धूमाभाववद्वृत्तिर्वह्निरित्याकारकं व्यभिचारविषयकं ज्ञानं पर्वतो धूमवानित्याकारकानुमितिकरणं धूमाभाववदवृत्तिवह्निरिति व्याप्तिज्ञानप्रतिबन्धकं भवतीति तादृशव्याप्तिज्ञाननिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकं धूमाभाववद्वृत्तिवह्निविषयकत्वं तदवच्छिन्नं प्रतिबन्धकत्वं तत्त्वम् । तस्य धूमाभाववद्वृत्तित्वविशिष्टवह्नौ सत्त्वाद् व्यभिचारस्थले भवति लक्षणसमन्वयः ।

अत एव पर्वते पक्षे धूमसाधने वह्निहेतुर्व्यभिचारी व्यभिचारदोषवानित्यर्थः । तादृशेन व्याभिचारिहेतुना पर्वते धूमस्य सिद्धिर्न सम्भवतीति निष्कर्षः । तथैव पर्वतो वह्निमान् प्रमेयत्वात्, अयमात्मा पदार्थत्वात्, अयं मनुष्यः प्राणित्वादित्यादीनि स्थलानि व्यभिचारिदोषपरकाणीति यथायथं विचार्य तेषां हेत्वाभासत्वं व्यवस्थापनीयम् । हेतुगता बाधादिदोषा यदा ज्ञायन्ते तदा अनुमितिः, अनुमितिकरणं परामर्शः, व्याप्तिज्ञानं वा न भवितुमर्हति । तेन बाधव्याभिचारादिविषयकाणि ज्ञानानि अनुमितितत्करणव्याप्तिज्ञानप्रतिबन्धकानि भवन्ति । अनुमितिर्व्याप्तिज्ञानञ्च प्रतिबध्यमेव भवतीति ज्ञानद्वयस्य प्रतिबध्यत्वं प्रतिबन्धकत्वञ्च यथाप्रसङ्गं विमृश्य व्यवस्थापनीयम् । एतेन वादिना असद्धेतुप्रयोगद्वारा प्रतिवादी निग्रहीतुं न शक्यते, तथैव प्रतिवादिनाऽपि वादी न निग्रहीतुं शक्यः । यतो हि वादिना उद्भाविते = उपस्थापिते ह्यसद्धेतौ दोषं प्रदर्श्य तथाविधहेतौ साध्यासाधकत्वं प्रमाणयितुं समर्थो भवति हेत्वाभासविषयकज्ञानवान् प्रतिवादी । तस्मादेव व्याप्तिपक्षधर्मताविशिष्टा ये सद्धेतवस्तन्निरूपणानन्तरं दुष्टहेतुगतानां दोषाणां सम्यग् बोधार्थं तदुपयोगिनां हेत्वाभासानां निरूपणं सर्वथा युक्तियुक्तमिति वादिनं प्रति सप्रमाणं वक्तुं प्रभवति । एतस्य प्रयोजनं तु केन ज्ञानेन किं ज्ञानं प्रतिबध्यते ? कथञ्च तदिदिति निर्धारणसामर्थ्यसम्पादनम् ।

यथा- पर्वतो वह्निमान् प्रमेयत्वादित्यत्र कश्चन प्रमेयत्वहेतुना पर्वते वह्निं साधयितुं प्रवर्तते चेत् तत्र ज्ञातहेत्वाभासः प्रतिवादी साध्यव्यभिचारी वर्तते अयं हेतुरिति सकारणमुपपादयति । कथमिति चेद् यत्र यत्र प्रमेयत्वं तत्र तत्र वह्निरिति साहचर्यनियमो तत्र न सङ्गच्छते । यतो हि सर्वे इदं जानन्ति- प्रमेयत्वं

प्रमेयमात्रवृत्तिधर्मः, अतो यावत्सु घटपटादिपदार्थेषु प्रमेयत्वं वर्तते, तन्मध्ये वह्निरूपं यत्प्रमेयं तत्रैव वह्नित्वात्मकं प्रमेयत्वं तिष्ठति न तु घटपटादिप्रमेये । अतो वह्निरूपं यत्साध्यं तदभाववति घटपटादिरूपे प्रमेये प्रमेयत्वस्य वृत्तित्वात् साध्याभाववद्वृत्तिप्रमेयत्वमित्याकारकं व्यभिचारविषयकं ज्ञानं यदा वर्तते तदा साध्याभाववदवृत्तिप्रमेयत्वमित्याकरकं व्याप्तिज्ञानं न भवितुमर्हति ।

अतः प्रमेयत्वहेतुना पर्वते वह्निर्भवता साधयितुं न शक्यत इति ज्ञातहेत्वाभासः प्रतिवादी वादिना प्रस्तुते हेतौ दोषं प्रदर्श्य तादृशहेतोः साध्यसाधकत्वं कथमपि न सम्भवतीति सप्रमाणं वादिनोपस्थापितमनुमानं दूषयितुं सर्वथा समर्थो भवति । अमुमेवाभिप्रायमभिव्यञ्जयितुं न्यायबोधिनीकारो ब्रूते- पर्वतो वह्निमान् प्रमेयत्वादित्यत्र प्रमेयत्वहेतौ वह्न्यभाववद्वृत्तित्वरूपव्यभिचारे ज्ञाते वह्न्यभाववदवृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम् इति । अर्थाद् व्यभिचारदोषस्य ज्ञाने सति व्याप्तिज्ञानं प्रतिबध्यं भवति । एतादृशज्ञानद्वयस्य प्रतिबध्यप्रतिबन्धकभावनिर्धारणसामर्थ्यसम्पादनमेव तत्प्रयोजनमिति निष्कर्षः

हेत्वाभासः सव्यभिचार-विरुद्ध-सत्प्रतिपक्षासिद्ध-बाधितभेदेन पञ्चधा प्रतिपादितः । सव्यभिचारः पुनः साधारणासाधारणानुपसंहारिभेदात् त्रिविधः । आश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धभेदेन असिद्धो हेत्वाभासोऽपि त्रिविधः । एतेषां स्वरूपं क्रमेणात्र प्रस्तौति ग्रन्थकारः ।

**मूलम्– सव्यभिचारोऽनैकान्तिकः । स त्रिविधः साधारणासाधारणानुपसंहारिभेदात् । तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा पर्वतो वह्निमान् प्रमेयत्वादिति । प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।**

**व्याख्या-** सव्यभिचारो नाम अनैकान्तिकः । सव्यभिचारस्यैव अनैकान्तिक इति नामान्तरमस्ति । व्यभिचारः = एकत्राव्यवस्था । सह व्यभिचारेण वर्तत इति सव्यभिचारः । यथा 'पर्वतो धूमवान् वह्नेः' इत्यत्र हेतुभूतो वह्निर्न सद्धेतुरस्ति । परन्तु स हेतुः सव्यभिचारो वर्तते । व्यभिचारदोषवानित्यर्थः । साध्यनिष्ठप्रतियोगितानिरूपकाभाववद्वृत्तित्वं साधारणस्य लक्षणम् । अस्य च ज्ञानस्य तद्वत्ताबुद्धिं प्रति तदाभाववत्तानिश्चयमुद्रया पूर्वपक्षव्याप्तिज्ञानप्रतिबन्धकत्वम् ।

ग्रन्थकृत् तदुदाहरति– यथा पर्वतो वह्निमान् प्रमेयत्वादिति । यत्र यत्र प्रमेयत्वं तत्र तत्र वह्निरिति साहचर्यं न सम्भवति । कथमिति चेत् प्रमेयत्वं यावत्प्रमेयपदार्थे वर्तते, साध्यो वह्निः संयोगेन पर्वते वर्तते । अतो वह्निरूपं यत्साध्यं तदभाववति ह्रदे प्रमेयत्वहेतोर्वृत्तित्वाद् वह्न्यभाववदवृत्तिप्रमेयत्वमिति व्याप्तिज्ञानं न भवितुमर्हति । साध्याभाववद्ह्रदवृत्तिप्रमेयत्वमिति व्यभिचारविषयकज्ञानस्य प्रतिबन्धकत्वात् । अतः प्रमेयत्वहेतुः पर्वते पक्षे वह्निरूपं साध्यं साधयितुं

न शक्नोति, साधारणव्यभिचारात्। अर्थाद् वह्निसाधकः प्रमेयत्वहेतुः साधारणव्यभिचारी, वह्निरूपसाध्याभाववति ह्रदे प्रमेयत्वस्य विद्यमानत्वात्।

तथैव 'धूमवान् वह्नेः' इत्यत्र हेतुर्वह्निः। स वह्निर्यद्यपि धूमवति महानसादौ वर्तते एव, अथापि धूमाभाववति तप्तायःपिण्डादावपि वर्तते। एतावता वह्निरूपस्य हेतोः साध्यरूपधूमवत्तदभाववदित्येतदुभयत्र सत्त्वादयं हेतुः साध्यसाध्याभावसाधारणः।तेनान्यतरकोटिनिर्णयो न जायते। अतश्चायं दोषोऽनैकान्तिक इति। तथा च सभिव्यचारोऽनैकान्तिक इति उच्यमाने साधारणादीनां त्रयाणामनुगतं सामान्यलक्षणम्। ऐकान्तिको नामान्यतरकोटिनिर्णयावसानः। एकोऽन्ते वर्तते स एकान्तः। एकान्त एव ऐकान्तिकः। स्वार्थे ठक्। अत्र एको नाम निर्णयः सिद्धान्तो वा। अन्तश्चावसानम्। तथा च ऐकान्तिको नाम अन्यतरकोटिनिर्णयावसान इति। तद्विपरीतोऽनैकान्तिकः। निश्चये सति विचारस्यान्तो जायते। निश्चये जाते सति न विचारो वर्धते।

इत्थमपि व्याख्यानं विधीयते- एकस्मिन् अन्ते निश्चयो नियत ऐकान्तिकः। तद्विपरीतोऽनैकान्तिकः।

अन्तो नाम सिद्धान्तः। एतन्नाम यो हेतुरेकस्मिन् सिद्धान्ते नियतो वर्तते, स ऐकान्तिकः, न ऐकान्तिक इति अनैकान्तिकः। स एव सव्यभिचार इति।

कृष्णवल्लभाचार्यश्चेत्थं प्रतिपादयति- एकः = साध्यमेव अन्तः = नियामकः = नियमस्य व्याप्त्यात्मकस्य निरूपको यस्य स एकान्तः, स एव ऐकान्तिकः, स्वार्थे ठक्, साध्यनिरूपितव्याप्तिमानित्यर्थः, न ऐकान्तिक इत्यनैकान्तिकः, साध्यनिरूपितव्याप्तिग्रहप्रतिबन्धकग्रहविषयविशिष्ट इत्यर्थः, व्यभिचाारीति यावत्। तस्य च साधारणाद्यन्यतमत्वं लक्षणं बोध्यम्।

सव्यभिचारस्त्रिविधः साधारणासाधारणानुपसंहारिभेदात्। तत्र साधारणः साध्याभाववद् वृत्तिः। साध्याभावाधिकरणनिरूपितवृत्तित्वमर्थः। यथा 'पर्वतो धूमवान् वह्नेः' इत्यत्र धूमाभाववद्वृत्तिर्वह्निरिति धूमभावाधिकरणे जलह्रदादौ वह्निहेतोर्वृत्तित्वात् पर्वते धूमस्य साध्यत्वे वह्निहेतुर्व्यभिचारीति व्यभिचारो दोषः। अयमेव साधारणः। एतस्य साधारणव्यभिचारस्य ज्ञानेन साक्षाद् व्याप्तिज्ञानं प्रतिबध्यते व्याप्तिज्ञानानुत्पत्तौ च परामर्शाभावादनुमितिरपि नोत्पद्यत इति परम्परयाऽनुमितिप्रतिबन्धकयथार्थज्ञानविषयः साधारणव्यभिचारो दोषः। सव्यभिचारपदस्य साधारणादित्रयसाधारणत्वेऽप्ययमेव 'सव्यभिचारः = व्यभिचारी' इति बहुधा व्यपदिश्यते। उपर्युक्ते व्यभिचारसामान्यलक्षणेऽपि तथैव जातम्। त्रिषु वर्तमानस्यैकस्य व्यावर्तकलक्षणस्याप्राप्तेः।

**मूलम्– सर्वसपक्षविपक्षव्यावृत्तः असाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति।**

**व्याख्या-** साधारणसव्यभिचारनिरूपणानन्तरमिदानीं क्रमप्राप्तमसाधारणसव्यभिचारलक्षणमुच्यते। स एव सद्धेतुर्यः पक्षवृत्तिः, सपक्षवृत्तिः, विपक्षावृत्तिश्च भवति। परं सर्वसपक्षेभ्यो सर्वविपक्षेभ्यो व्यावृत्तः पक्षमात्रवृत्तिस्तु असाधारणनामको हेत्वाभासो भवति। एतन्नाम सर्वेभ्यः सपक्षेभ्यः, सर्वेभ्यो विपक्षेभ्यश्च व्यावृत्तः पक्षमात्रवृत्तिरसाधारण इति। यथा 'शब्दो नित्यः शब्दत्वाद्' इत्यत्र पक्षीभूते शब्दे नित्यत्वं साध्यते। हेतुश्च शब्दत्वम्।

तच्च शब्दत्वं सर्वेषु नित्यत्ववत्सु आकाशात्मपरमाणुषु सपक्षीभूतेषु अथ च सर्वेषु चानित्यत्ववत्सु विपक्षीभूतेषु घटपटादिपदार्थेषु नास्ति, अपि तु पक्षीभूते शब्दे एव वर्तते। अतोऽयं शब्दत्वरूपो हेतुरसाधारणोऽनैकान्तिक इति। यतो हि शब्दत्वं न नित्यपदार्थात्माकाशादिषु वर्तते न वा अनित्येषु घटपटादिषु, किन्तु शब्द एव वर्तत इति शब्दे पक्षे शब्दत्वहेतुना नित्यत्वं साधयितुं न शक्यते असाधारणानैकान्तिकत्वात्।

**मूलम्– अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति।**

**व्याख्या-** यस्मिन्ननुमाने अन्वयदृष्टान्तो व्यतिरेकदृष्टान्तश्च न लभ्यते सोऽनुपसंहारी। 'सर्वमनित्यं प्रमेयत्वाद्' इत्यत्र सर्वं पक्षीभूतं वर्तते। साध्यञ्च अनित्यत्वम्, तत्साधको हेतुर्हि प्रमेयत्वम्। तत्र सर्वपदेन अशेषस्य पक्षत्वात् सपक्षविपक्षाभावाद् दृष्टान्ताभावः। दृष्टान्ताभावाच्चायं हेतुः सव्यभिचारः। यश्चानुपसंहारी व्यभिचारीति कथ्यते। एतादृशस्थलेषु दृष्टान्तासम्भवाद् दृष्टान्तरहितत्वमनुपसंहारिव्यभिचारस्य लक्षणमित्यपि वक्तुं शक्यते। अनेन व्यतिरेकव्याप्तिज्ञानं प्रतिबध्यते।

**मूलम्– साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वाद्, घटवदिति। (अत्र) कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्।**

**व्याख्या-** द्वितीयो हेत्वाभासो विरुद्धः, विरोधदोषवानित्यर्थः। साध्याभावस्य व्याप्तो हेतुर्विरुद्धो भवति। यो हेतुः नियमेन साध्याभावाधिकरणे एव तिष्ठति न कदापि साध्याधिकरणे तिष्ठति,

एतादृशलक्षणयुक्तो हेतुर्विरुद्ध इति । यथा 'शब्दो नित्यः कृतत्वाद्' इत्यत्र साध्यं नित्यत्वम्, हेतुश्च कृतकत्वम् । यत्र यत्र कृतकत्वं तत्र तत्र न नित्यत्वमपि तु नित्यत्वाभावः । यत्र यत्र नित्यत्वं तत्र तत्र न कृतकत्वमपि तु कृतकत्वाभावः । तत्र कृतकत्वं नाम कार्यत्वम् । तथा च यत्र यत्र नित्यत्वाभावस्तत्र तत्र कृतकत्वं भवति । एतावता साध्याभावेन (नित्यत्वाभावेन) कृतकत्वं व्याप्तं भवति । अत उपर्युक्ते अनुमानवाक्ये प्रयुक्तः कृतकत्वहेतुर्विरुद्धो हेत्वाभासोऽस्ति । उक्तञ्च- साध्याभावव्याप्तो हेतुर्विरुद्ध इति ।

### पदानां प्रयोजनम्

अत्र सद्धेतुवारणाय साध्याभावव्याप्त इति । एतन्नाम साध्याभावव्याप्त इति दलेऽनुक्ते 'हेतुर्विरुद्धः' इत्येतादृशं लक्षणं जायते, तथा सति सद्धेतौ अतिव्याप्तिर्जायते । अतः साध्याभावव्याप्त इति पदं निवेशितम् । अथ च असम्भववारणाय व्याप्तेति । एतन्नाम 'साध्याभावो हेतुर्विरुद्धः' इत्युक्ते सति असम्भवो जायते । यतो हि साध्याभावो हेतुरेव न भवति, अतो दोषस्य का कथा । परिष्कृतलक्षणं तु- साध्याभावव्यापकीभूताभावप्रतियोगी हेतुर्विरुद्ध इति । अनेन विरुद्धहेत्वाभासविषयकज्ञानेन च साध्याभावग्रहसामग्रीत्वेन अनुमितिः प्रतिबध्यते ।

**मूलम्– यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः । यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत् । शब्दोऽनित्यः कार्यत्वाद् घटवत् ।**

**व्याख्या-** 'सन् प्रतिपक्षो यस्य सः' इति विग्रहे सत्प्रतिपक्षशब्दस्य निष्पत्तिर्भवति । सत्प्रतिपक्षदोषविशिष्टो हेतुरित्यर्थः । 'सँश्चासौ प्रतिपक्षश्चे'ति विग्रहेण निष्पन्नं सत्प्रतिपक्षपदं दोषपरकम् । वादिप्रतिवादिनोश्चर्चायाः 'कथा' इति संज्ञा । तत्र वादी स्वपक्षसाधनाय 'शब्दो नित्यः श्रावणत्वात् शब्दत्ववद्' इत्यनुमानवाक्यं प्रयुङ्क्ते । तत्र श्रावणत्वहेतुना शब्दे पक्षे यदा नित्यत्वं साधयति तदा अभ्रान्तोऽप्यन्यो जनः श्रावणत्वहेतुना शब्दे नित्यत्वं साधयितुं न शक्यमिति जानन्नपि प्रतिपक्षिप्रयुक्तश्रावणत्वहेतौ दोषोद्भावनाय शब्देऽनित्यत्वसाधनाय च हेत्वन्तरं कार्यत्वं प्रयुङ्क्ते शब्दो नित्यः कार्यत्वाद् घटवदिति । प्रथमः श्रावणत्वहेतुः सत्प्रतिपक्षः । एवञ्च 'साध्याभावव्याप्यप्रतिहेतुमत्पक्षकः सत्प्रतिपक्षः' इत्यागतम् । इदञ्च दुष्टहेतुलक्षणम् । दोषलक्षणं तु साध्याभावव्याप्यवत्पक्षत्वम् ।

पदानामर्थस्तु पदकृत्यकारेण सम्यग् विहितः- यस्य हेतोः साध्याभावसाधकम्=साध्याभावस्य अनुमापकं हेत्वन्तरं प्रतिपक्षो हेतुर्विद्यते, स हेतुः सत्प्रतिपक्ष । सत्प्रतिपक्षदोषवानित्यर्थः । यथा एकेन 'शब्दो नित्यः श्रावणत्वाद्' इत्यत्र श्रावणत्वहेतुना शब्दे नित्यत्वे साध्ये सति तत्रैवेतरेण 'शब्दोऽनित्यः कार्यत्वाद्' इति अनुमानान्तरं प्रयुञ्जानेन साध्याभावसाधकम् = अनित्यत्वसाधकम् 'कार्यत्वम्' इति हेत्वन्तरं प्रयुक्तमतः श्रावणत्वमपेक्ष्य कार्यत्वहेतुः सत्प्रतिपक्षः, अथ च कार्यत्वमपेक्ष्य श्रावणत्वहेतुः सत्प्रतिपक्ष इति । अस्यां स्थितौ न शब्दो नित्य इत्यनुमितिः, न वा शब्दोऽनित्य इत्यनुमितिरुत्पद्यते परस्परं प्रतिबन्धात् ।

### असिद्धः

**मूलम्– असिद्धस्त्रिविधः–आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति ।**

**व्याख्या-** तर्कसङ्ग्रहकारोऽन्नम्भट्टोऽसिद्धं विभजते- असिद्धस्त्रिविधेत्यादिना । तथा चासिद्धहेत्वाभास आश्रयस्वरूपव्याप्यत्वभेदेन त्रिधा विभक्तः । पक्षहेत्वादीनां स्वरूपस्यैवासिद्ध्या व्याप्तेरप्यसम्भवादेषामसिद्ध इति नाम । असिद्धिदोषवानित्यर्थः । तर्कसङ्ग्रहकारेण असिद्धसामान्यस्य लक्षणं नोक्तम् । सूत्रकारो गौतमश्च पुनरसिद्धस्य कृते साध्यसमपदं प्रयुङ्क्ते- साध्याविशिष्टः साध्यत्वात् साध्यसमः इति । अर्थाद् यथा साध्यं पक्षे सन्दिग्धत्वेनानुमानकालेऽसिद्धम्=साध्यं भवति तथैव हेतुरपि पक्षेऽवर्तमानः सन् सन्दिग्धत्वेनाप्रसिद्धत्वेन वा पक्षे हेतुवदसिद्धम्= साध्यं भवति । सूत्रस्थं 'साध्याविशिष्टः' इति पदं व्याचिख्यासुर्भाष्यकार आह- साध्येनाविशिष्टः साधनीयत्वादिति । यथा- 'छाया द्रव्यं गतिमत्त्वाद्' इत्यत्र गतिमत्त्वहेतुरसिद्धः । यतो हि अत्र पक्षः छाया । तत्र द्रव्यत्वसाधनार्थं गतिमत्त्वं हेतुरुपात्तो वर्तते । परं यथा छायायां द्रव्यत्वं साध्यम्, तथैव तत्र गतिमत्त्वमपि साध्यमेव । अतोऽयं साध्यसमो हेत्वाभास इति । साध्यसमञ्च नव्याः प्रायेण असिद्धत्वेन व्यवहरन्ति । तर्कसङ्ग्रहकारेण असिद्धलक्षणस्यानुक्तत्वेऽपि पदकृत्यकारश्चन्द्रजसिंहः आश्रयासिद्ध्याद्यन्यतमत्वम-सिद्धत्वम् इति असिद्धसामान्यलक्षणमुक्तवान् ।

क्रमप्राप्त्या आदौ आश्रयासिद्धहेत्वाभासं दर्शयति-

**मूलम्– आश्रयासिद्धो यथा- 'गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्' । अत्र गगनारविन्दमाश्रयः, स च नास्त्येव ।**

**व्याख्या-** आश्रयो नाम पक्षः । स एव यस्य हेतोरसिद्धः स हेतुराश्रयासिद्धः । आश्रयासिद्धदोषवानित्यर्थः । एतन्नाम आश्रयस्य प्रकृतहेत्वाश्रयपक्षस्याभाव इति । यथा 'गगनारविन्दं सुरभ्यरविन्दत्वात्' सरोजारविन्दवद्' इति । एवमेव 'काञ्चनमयपर्वतो वह्निमान् धूमाद्' इति । अत्र क्रमशो गगनारविन्दं काञ्चनमयपर्वतश्च आश्रयौ । तयोरभाव एवाश्रयासिद्धिः । तथा च पक्षतावच्छेदकाभाववत्पक्षकत्वम् आश्रयासिद्धस्य लक्षणम् । पक्षे यद् विशेषणं तत् पक्षतावच्छेदकमित्युच्यते । गगनसम्बन्धः काञ्चनमयत्वञ्चोक्तस्थले पक्षतावच्छेदकम् । यद्यप्यरविन्दत्वं पर्वतत्वञ्च धर्मितावच्छेदकविधया पक्षे विशेषणत्वात् पक्षतावच्छेदकमेव । तच्च विशेष्येऽरविन्दे पर्वते च वर्तते, अथापि विशेषणान्तरस्य गगनसम्बन्धस्य काञ्चनमयत्वस्य च विशेष्येऽरविन्दे पर्वते चाभावाद् विशिष्टस्यैव पक्षत्वादप्रसिद्धिर्भवत्येवेति दोष एव । एतेन आश्रयासिद्धविषयकहेत्वाभासज्ञानेन अरविन्दं सुरभिरित्याकारिकानुमितिः प्रतिबध्यते ।

इदानीं ग्रन्थकारः सोदाहरणं स्वरूपासिद्धहेत्वाभासं प्रस्तौति-

**मूलम् – स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् ।**

**व्याख्या-** स्वरूपेण हेतुरसिद्ध एव स्वरूपासिद्धः । स्वरूपासिद्धदोषवानित्यर्थः । तल्लक्षणं तु पक्षे हेत्वभावः किं वा हेत्वभाववत्पक्षः स्वरूपासिद्धिः । 'शब्दो गुणश्चाक्षुषत्वाद्' इत्यत्र पक्षः शब्दः तत्र गुणत्वं साध्यम् । शब्दे गुणत्वसाधनार्थं चाक्षुषत्वहेतुः प्रयुक्तः । शब्दस्य श्रावणत्वात् तत्र शब्दे चाक्षुषत्वं नास्ति । अतोऽत्र चाक्षुषत्वहेतुः स्वरूपेणासिद्धः । अतः स्वरूपासिद्ध इत्युच्यते । एतेन चाक्षुषत्वाभाववान् शब्द इति स्वरूपासिद्धिविषयकज्ञाने सति गुणत्वव्याप्यचाक्षुषत्ववानयं शब्द इत्याकारकपरामर्शस्यानुत्पत्त्या तादृशपरामर्शस्य प्रतिबन्धकं स्वरूपासिद्धिविषयकं ज्ञानमिति निश्चीयते । तेन प्रतिबध्यं तादृशपरामर्शात्मकं ज्ञानमित्यर्थः । अर्थात् साध्यव्याप्यहेतुमत्तात्मकस्य परामर्शस्य प्रतिबन्धः क्रियते स्वरूपासिद्धहेत्वाभासेन । स्वरूपासिद्धश्च शुद्धासिद्धभागासिद्धविशेषणासिद्धविशेष्यासिद्धभेदेन चतुर्विधः ।

**मूलम्– सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । पर्वतो धूमवान् वह्निमत्त्वाद् इत्यत्र आर्द्रेन्धनसंयोग उपाधिः । तथाहि यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र**

**वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति । अयोगोलक आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वाद् आर्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद् वह्निमत्त्वं व्याप्यत्वासिद्धम् ।**

**व्याख्या-** सोपाधिकः इत्यस्य उपाधिसहितो हेतुरित्यर्थः । अर्थाद् यो हेतुर्व्याप्यत्वासिद्धो भवति स उपाधिसहितः । तादृशो हेतुर्व्याप्यत्वासिद्धाख्यः । व्याप्यो नाम व्याप्त्याश्रयः । व्याप्यत्वञ्च व्याप्तिः । व्याप्तेरसिद्धिरित्यर्थः । तत्र उपाधिश्च पुनः साध्यव्यापकत्वे सति साधनाव्यापकत्वम् । एतन्नाम साध्यस्य व्यापकः, साधनस्य च अव्यापकः (व्याप्यः) एवोपाधिः । यथा 'धूमवान् वह्नेरि'त्यत्र साध्यो धूमः, साधनञ्च वह्निः । वह्निसत्त्वे द्विविधा स्थितिर्दृश्यते- एकत्र धूमसत्त्वम्, अन्यत्र च धूमाभावः । यथा महानसचत्वरादौ वह्निसत्त्वे धूमसत्त्वम्, अयोगोलकादौ वह्निसत्त्वेऽपि धूमाभावः ।

तत्र वह्निसत्त्वे एकत्र किमर्थं धूमोऽन्यत्र च किमर्थं नास्ति इति चेद् एकत्र सहयोगिसत्त्वाद्, अन्यत्र च सहयोगिनोऽभावादिति महानसचत्वरादौ सहयोगिसत्त्वाद् अयोगोलकादौ सहयोगिनोऽभावात् । तत्र महानसचत्वरादौ वह्निसत्त्वे धूमसत्त्वार्थं न केवलं वह्निरेव हेतुः अपि तु तत्र आर्द्रेन्धनसंयोगश्च हेतुरिति- सहयोगी इति यावत् । तत्र वह्निना सह आर्द्रेन्धनसंयोगस्य सहयोगे लब्धे सति धूमो जायते, स आर्द्रेन्धनसंयोगः (सहयोगी) एव उपाधिः । स च साध्यव्यापकः, साधनस्य च अव्यापकः (व्याप्यः) । यथा 'महानसचत्वरगोष्ठादिकं धूमवद् वह्नेः' इत्यत्र पक्षो महानसादिकम् । एवमेव साध्यो धूमः, हेतुश्च वह्निः । यत्र यत्र धूमो भवति तत्र यथा वह्निर्भवति तथैव अवश्यमपि आर्द्रेन्धनसंयोगोऽपि भवत्येव, आर्द्रेन्धनसंयोगाभावे धूमाभावात् ।

एतावता यथा धूमो वह्नेर्व्याप्यस्तथैव आर्द्रेन्धनसंयोगस्यापि व्याप्य इति । तावता च साध्यनिरूपितम् = धूमनिरूपितं व्यापकत्वमार्द्रेन्धनसंयोगे सिद्ध्यति । एवमेव यत्र वह्निस्तत्र आर्द्रेन्धनसंयोगो नास्ति, यथा अयोगोलके । तावता च आर्द्रेन्धनसंयोगो वह्निरूपस्य साधनस्य अव्यापकः सिद्ध्यति । तथा च सुतरां वह्नौ आर्द्रेन्धनसंयोगाव्याप्यत्वं सिद्धम् । एतावता साध्यव्यापकत्वे सति साधनस्याव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । तदुपाधिवशादेव धूमार्थं वह्निर्हेतुर्जातः । एतन्नाम सोपाधिना वह्निना एव धूमः साध्यते, न तु निरुपाधिना वह्निना । यो हि सोपाधिर्हेतुर्भवति, न स सद्धेतुः अपि तु व्याप्यत्वासिद्धो हेत्वाभास इति ।

**साध्यव्यापकत्वसाधानाव्यापकत्वविचारः**

(१) साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्-

साध्यस्य समानमधिकरणं यस्य अत्यन्ताभावस्य स साध्यसमानाधिकरणात्यन्ताभावः । यथा 'महानसादिकं धूमवद् वह्नेः' इत्यत्र साध्यो धूमः । तस्य अधिकरणं महानसादिकम् । तत्रस्थोऽत्यन्ताभावो नार्द्रेन्धनसंयोगस्यापि तु घटादेः । तथा च घटाद्यत्यन्ताभावस्य प्रतियोगी घटः । प्रतियोगित्वं घटे अप्रतियोगित्वञ्चार्द्रेन्धनसंयोगेऽतः प्रस्तुतप्रसङ्गे साध्यव्यापकः (धूमव्यापकः) आर्द्रेन्धनसंयोगः ।

(२) साधनवन्निष्ठाऽत्यन्ताभावप्रतियोगित्वं साधनाऽव्यापकत्वम्- प्रस्तुते 'धूमवान् वह्नेः' इत्याकारेऽनुमाने हेतुर्वह्निः । हेतुमच्च यथा महानसादिकं तथैव तप्तायोगोलकमपि । एतावता साधनवत्तप्तायोगोलकम् । तन्निष्ठोऽत्यन्ताभावः आर्द्रेन्धनसंयोगस्य । तथात्यन्ताभावस्य प्रतियोगी आर्द्रेन्धनसंयोगः । तत्र प्रतियोगित्वं सिद्धमतस्तदेव साधनाव्यापकत्वमिति आर्द्रेन्धनसंयोगरूपोपाधिकत्वादेव पर्वते धूमस्य साध्यत्वे साध्यसाधकत्वेन प्रयुक्तो वह्निहेतुर्व्याप्यत्वासिद्धः ।

इदानीं क्रमप्राप्तं सोदाहरणं बाधितहेत्वाभासं प्रदर्शयति ग्रन्थकारः-

**मूलम्– यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः । यथा वह्निरनुष्णो द्रव्यत्वाज्जलवत् । अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम् ।**

**व्याख्या-** यस्य हेतोः साध्यस्याभावः पक्षे प्रत्यक्षादिना प्रमाणान्तरेण निश्चितः स हेतुर्बाधितः । तथा च 'साध्याभाववत्पक्षो बाधः' इति बाधदोषस्य लक्षणम् । तादृशपक्षकत्वादुक्तो हेतुर्बाधित इति । यथा 'ह्रदो वह्निमान्' इत्यत्र 'वह्न्यभाववद्ध्रदः' इति बाधः । ह्रदे वह्न्यभावः प्रत्यक्षसिद्धः । एवमेव 'वह्निरनुष्णो द्रव्यत्वाद्' इत्यत्र 'वह्निरुष्णः' इति बाधः । वह्नेरुष्णत्वस्य स्पार्शनप्रत्यक्षेण गृह्यमाणत्वादिति । एतादृशं बाधविषयकं ज्ञानं साक्षादनुमितिप्रतिबन्धकं भवति । एवं दुष्टहेतूनां स्वरूपेऽवगते एभिर्हेतुभिः (असद्धेतुभिः) अनुमितिर्न जायते, तथैव व्याप्तिज्ञानं परामर्शात्मकं ज्ञानं वा व्यभिचारासिद्ध्यादिविषयकहेत्वाभासज्ञानेन प्रतिबध्यते ।

॥ **इत्यनुमानप्रकरणम्** ॥

# उपमाननिरूपणप्रकरणम्

इदानीं ग्रन्थकृदुपमितिप्रक्रियां यथाक्रममुपस्थापयति–

**मूलम्– उपमितिकरणम् उपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः । तत्करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । तथा हि कश्चिद् गवयशब्दार्थम् अजानन् कुतश्चिदारण्यकपुरुषाद् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति । तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते ।**

**व्याख्या-** प्रसङ्गसङ्गत्या क्रमप्राप्तस्योपमानस्य लक्षणमाह उपमितिकरणम् इति । उपमितिरपि यथार्थज्ञानमेव । उपमितेः = उपमितिनामकस्य यथार्थानुभवस्य यत्करणम् = असाधारणं कारणं तदुपमानं तृतीयं प्रमाणमित्यर्थः । उपमितेर्लक्षणान्तरमाह संज्ञा संज्ञीति । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः । संज्ञा = नाम, संज्ञी = नामी, तन्नामकं वस्तु । तयोर्यत् सम्बन्धज्ञानं वाच्यवाचकभावरूपसम्बन्धज्ञानं सोपमितिः । उपमितिरेवोपमानप्रमाणस्य फलमित्यर्थः ।

## पदानां प्रयोजनम्

यदि उपकरणमुपमानम् इति लक्षणं स्यात् तदा कुठारादौ छिदादिकरणेऽतिव्याप्तिर्भवेत् । यतो हि छिदादिक्रियायां कुठारादि उपकरणं (साधनम् ) भवति । अतस्तद्वारणाय मितिरित्युक्तम् । मितेः = ज्ञानस्य करणमुपमानम् इत्येव लक्षणं स्यात् तदा प्रत्यक्षादावतिव्याप्तिः स्याद् यतो हि मितिर्मानं प्रत्यक्षादिष्वपि भवति । तन्निरासाय उप इत्युपसर्गपदं दत्तम् । यदि संज्ञासंज्ञिज्ञानमुपमितिरित्येव लक्षणं स्यात् तदा अनुमित्यादावतिव्याप्तिः स्यात्, यतो हि संज्ञासंज्ञिज्ञानं तु अनुमित्यापि भवति । अतस्तद्वारणाय सम्बन्ध इत्युक्तम् । यदि सम्बन्धज्ञानमनुमितिरिति लक्षणं स्यात् तदा संयोगादावतिव्याप्तिः स्यात्, यतो हि सम्बन्धज्ञानं संयोगादिनापि भवति । अतस्तद्वारणाय संज्ञासंज्ञि इति पदं प्रदत्तम् । किं तदुपमानमिति जिज्ञासां निवारयन्नाह सादृश्यज्ञानम् इति । सादृश्यज्ञानमेव उपमानमिति । एवञ्च गोसादृश्यविशिष्टपिण्डज्ञानं करणम् । अतिदेशवाक्यार्थस्मरणं व्यापारः । उपमितिः फलम् ।

उपमीयते अनेन इति करणव्युत्पत्या सादृश्यमाध्यमेन यज्ज्ञानं जायते तदेवोपमितिः । तत्करणमुपमानम् । **प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्** इति गौतमसूत्रादपि सादृश्यज्ञानस्य करणत्वं प्रतीयते । तथा

च गोसदृशो गवयपदवाच्य इति आरण्यकपुरुषस्यातिदेशवाक्यश्रवणसमनन्तरं ग्रामीणस्य गोसदृशो गवयपदवाच्य इति शाब्दज्ञानं जायते । तदनन्तरं कालान्तरे वनं गतस्य तस्य पुरुषस्य गवयादौ यद् गोसादृश्यप्रत्यक्षं जायते तेन च पूर्वानुभूतवाक्यार्थस्मृतिरुत्पद्यते । ततश्च गवयो गवयपदवाच्य इति ज्ञानमुत्पद्यते । सैवोपमितिः । तत्करणं सादृश्यज्ञानम् । तदेवोपमानम् । गोसदृशो गवयः इत्यत्र गवयपदं संज्ञा गवयमृगः संज्ञी । अनयोः सम्बन्धज्ञानं गवयपदस्य गवयमृगोऽर्थ इति ज्ञानमुपमितिः । आरण्यकपुरुषेणोक्तं 'गोसदृशो गवयः' इत्यतिदेशवाक्यम् । अरण्ये गोसदृशमृगदर्शनेन जातं गवये गोसादृश्यज्ञानमेवोपमितिकरणमुपमानप्रमाणम् । तदा जातमतिदेशवाक्यार्थस्मरणं व्यापारः ।

एवं रीत्या सादृश्यज्ञानेनातिदेशवाक्यार्थस्मरणद्वारा उपमितिर्जायते । तत्करणं सादृश्यज्ञानमेव, तदेवोपमानप्रमाणम् । तच्चोपमानं त्रिविधं सादृश्यविशिष्टपिण्डज्ञानम्, असाधारणधर्मविशिष्टपिण्डज्ञानं, वैधर्म्यविशिष्टपिण्डज्ञानम् । सादृश्यज्ञानम्, असाधारणधर्मज्ञानम्, वैधर्म्यज्ञानमिति वा । (सादृश्यज्ञानम्) सादृश्यविशिष्टपिण्डज्ञानं तु मूलकारेणैवोक्तम्- गोसदृशो गवय इति । (असाधारणधर्मज्ञानम्) असाधारणधर्मविशिष्टपिण्डज्ञानं यथा खड्गमृगः कीदृग् ? इति पृष्टे नासिकालसदेकशृङ्गोऽनतिक्रान्तगजाकृतिश्चेति तज्ज्ञातृभ्यः श्रुत्वा कालान्तरे तादृशं पिण्डं पश्यन्नतिदेशवाक्यार्थं स्मरति । तदनन्तरं खड्गमृगे खड्गमृगपदवाच्य इत्युपमितिरुत्पद्यते । अत्र नासिकालसदेकशृङ्ग एवासाधारणधर्मः, तत्करणमेव ।

तादृशधर्मविशिष्टपिण्डज्ञानं तस्य जातम् । (वैधर्म्यज्ञानम्) वैधर्म्यविशिष्टपिण्डज्ञानं यथा उष्ट्रः कीदृग् ? इति पृष्टे अश्वादिवत् किन्तु न समानपृष्ठो न ह्रस्वग्रीवशरीरश्चेति आप्तोक्ते, कालान्तरं तत्पिण्डदर्शनाद् वैधर्म्यविशिष्टपिण्डज्ञानम्, ततोऽतिदेशवाक्यार्थस्मरणम्, तत एष पिण्ड उष्ट्रपदवाच्य इत्युपमितिर्जायते ।

॥ **इत्युपमानप्रकरणम्** ॥

## शब्दप्रमाणनिरूपणप्रकरणम्

**मूलम्–आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः । यथा गामानयेति । शक्तं पदम् । अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः ।**

**व्याख्या-** क्रमप्राप्तं शब्दप्रमाणं निरूपयति- आप्तवाक्यमिति । न केवलं ध्वनिः शब्दप्रमाणम् । केवलं ध्वनिना न कस्यापि शाब्दप्रमा जायते । न वा वर्णः, तस्यापि तथैव स्थितेः । न वा केवलं शब्दः, तस्यापि शाब्दबोधजनकत्वाभावात् । अनाप्तवाक्यमपि न शब्दप्रमाणम् । तादृशस्य वाक्यस्य शाब्दप्रमाकरणत्वरहितत्वात् । तर्हि किं शब्दप्रमाणमित्यत्र सूत्रकारो गौतममुनिः **आप्तोपदेशः शब्दः** इति सूत्रितवान् । तदेव दर्शयति तर्कसङ्ग्रहकारः- आप्तवाक्यं शब्द इति । तथा च आप्तप्रयुक्तत्वे सति वाक्यत्वं शब्दप्रमाणत्वम् ।

तेनाप्तोक्तेन वचनेन यज्ज्ञानं जायते तच्छाब्दज्ञानम्, तत्करणं शब्दप्रमाणम् । तच्च दृष्टादृष्टभेदेन द्विविधम् । तथा चाह सूत्रकारः- 'स द्विविधो दृष्टादृष्टार्थत्वात्' । 'आप्तवाक्यं शब्दः' इत्यत्र घटकत्वेन आप्तपदमागतम् । अतोऽत्र कोऽयमाप्तः ? इति जिज्ञासां परिहरन्नाह ग्रन्थकार- 'आप्तस्तु यथार्थवक्ता' इति । शब्दलक्षणं वदता तर्कसङ्ग्रहकारेण 'आप्तवाक्यं शब्दः' इत्युक्तं वर्तते । तत्र आप्तस्य वाक्यमिति विग्रहः । तावता आप्तवाक्यम् इत्यत्र घटकीभूतमाप्तपदं व्याकुर्वन् अन्नम्भट्टः 'आप्तस्तु यथार्थवक्ता' इत्यवोचत् । तत्र आप्तो नाम न केवलं मित्रम्, न वा यथार्थज्ञानयुक्तो जनः । कदाचन कामक्रोधलोभादिवशात् तदुक्तेश्चायथार्थत्वसम्भवात् । कस्तर्हि आप्तः ? इत्यत्रोच्यते आप्तश्च यथार्थवक्ता । तस्योपदेश एव शब्दः ।

परं कश्चन जनो यदा सत्यं वक्ति तदैव तस्मिन् आप्तत्वम् एवञ्च तेनोक्तं वाक्यं प्रामाणिकम् । एवमेवात्र इदमप्यवधार्यम्- यत्र स्वयं भ्रान्तोऽपि तदजानन्नेव सत्यं मत्वा वक्ति, तदा स नाप्तः । अतो ज्ञात्वा यथार्थवक्ता एव आप्त इति । एतावता सर्वत्र आर्यम्लेच्छादिषु चाप्तत्वं समानरूपेण स्थातुं शक्नोति, फलतः सर्वे यथार्थवक्तार आप्ता भवितुं शक्नुवन्ति ।

ननु तदापि आप्तत्वे ज्ञाते सत्येव यथार्थत्वं ज्ञायते, यथार्थत्वे ज्ञाते सत्येव आप्तत्वं ज्ञायते इत्येतादृशान्योन्याश्रयदोष एवेति चेदपि सत्यं, परन्तु आप्तश्चासौ उपदेश इत्येतादृशे समासे कृते उक्तो दोषो निवर्तते । 'आप्तवाक्यं शब्दः' इति घटकीभूतमाप्तपदं विविच्य वाक्यमित्यादिना वाक्यपदं विवृणोति- वाक्यं तु पदसमूहः इत्यादिना । यथा गामानयेति । शक्तं पदम् । तत्र शक्तं नाम शक्त्याश्रयम् ।

शक्तिश्च पदेन सह पदार्थस्य सम्बन्धविशेषः । तादृशशक्तानां पदानां समूह एव वाक्यम् । पदञ्च पुनः शक्तिविशिष्टोऽकारादिवर्णसमुदाय इति । एतन्नाम शक्तपदसमूह एव वाक्यम् । शक्त्या किञ्चिदर्थबोधकत्वं पदलक्षणम् ।

वैयाकरणास्तु परस्परान्वयिभावापन्नक्रियाकारकवाचकपदसमुदायो वाक्यमिति निगदन्ति। तार्किकमते तु पदसमूहमात्रस्य वाक्यत्वेन क्रियापदसमभिव्याहारनियमाभावाद् 'नीलो घटः' इति क्रियावाचकपदप्रयोगविरहस्थलेऽपि वाक्यत्वं सम्मतमेव। वस्तुतस्तु तार्किकमते 'घटः' इत्यपि वाक्यमेव। घट इत्यत्र प्रकृतिप्रत्ययभेदेन पदद्वयमस्ति। तत्र घट इति प्रकृतिपदञ्चेद् घटपटोत्तरं सु इति प्रत्ययपदम्। सुप्रत्ययेन एकत्वस्य, घटपदेन घटस्य च बोधेन 'एकत्वविशिष्टो घटः' इति विशिष्टबोधजननात्।

शक्तं शक्तियुक्तम्। नैयायिकैर्वैशेषिकैश्च शक्तेरतिरिक्तपदार्थत्वस्यानङ्गीकारात् 'शक्तम्' इति कथमुच्यते ? इत्यत्राह- 'अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः' इति। 'ईश्वरसङ्केतः शक्तिः' इति शक्तेः स्वरूपम्। ईश्वरसङ्केतसन्दर्शकं वाक्यञ्च 'अस्मात् पदादयमर्थो बोद्धव्यः' इति।

प्रसङ्गेऽत्र तर्कसङ्ग्रहस्य आलोकटीकाकारस्य वाक्यमिदं सङ्गच्छते। तदेवात्रोपन्यस्यते- "लोके हि गवादिशब्दाः सर्वदेशकालेषु सर्वेषामपि सास्नादिमत्प्राणिविशेषबोधजनका दृश्यन्ते। कथमेवमविसंवादेन शब्दप्रयोगः, शाब्दबोधश्च ? पूर्वपूर्वपुरुषाणां परम्परया तथा प्रयोगवशादिति चेत्, प्रथमप्रयोगः कस्येति वक्तव्यम्। 'गावो वा एतत्सत्रमासत' इत्यादिषु वैदिकप्रयोग एव प्रथमप्रयोग इति चेद्, वेदस्येश्वरोपदेशरूपत्वाद्, ईश्वर एवैतादृशबोधजनकेच्छया एतानि पदानि प्रयुक्तवानिति ज्ञायते। यथा गुणवृद्ध्यादिसंज्ञाः पाणिनिना तत्तदर्थबोधेच्छया सङ्केतिता इदानीमपि तथैव प्रयुज्यन्ते।

ततश्च 'गुणवृद्ध्यादिपदं तत्तदर्थबोधजनकं भवतु' इति पाणिनीच्छापूर्वकं यथा, तथैव गवादिपदान्यपि तदुच्चारयितुरीश्वरस्येच्छया तत्तदर्थबोधनसमर्थानि भवन्तीति 'अस्मात्पदादयमर्थो बोद्धव्यः' इतीश्वरेच्छैव शक्तिपदार्थो नातिरिक्ता शक्तिः"। एतदत्पदजन्यबोधविषयतावानर्थः। यतो हि शक्त्या पदबोध्यार्थो भवति। तदनुसारेण पदप्रकारकार्थविशेष्यकशाब्दबोधः सम्पद्यते।

अनेन प्रकारेण 'पदसमूहो वाक्यम्। आप्तवाक्यं पुनः शब्दः प्रमाणम्' इत्यादिकमुक्तम्। प्रमाणं तावत् प्रमाकरणम् इत्यपि वर्णितम्। प्रमा च यथार्थानुभवः। अनुभवो नाम नवीनं ज्ञानमिति। ननु तर्हि 'श्यामः, गृहं, पुस्तकं मन्दिरम्' इति श्यामादिपदसमूहोऽपि वाक्यं वर्तते, इतोऽपि नवीनानुभवो भवेत्। परमस्माभिर्न तथानुभूयते। भवत्येव तत्र श्यामाद्यर्थानां बोध इति चेत्, नायं बोधः, परमर्थस्मरणमात्रम् ... इत्यादिशङ्कां निराचिकीर्षुराह- 'आकाङ्क्षे'ति। अत्रापि प्रसङ्गे आलोकाख्यटीकाकर्तुरधस्तनं वाक्यमवगन्तव्यम्-

“ननु गवादिपदसमूह एव चेद् वाक्यम्, तर्हि ‘गौरश्वः पुरुषो हस्ती’ इत्यादिपदसमूहादपि कश्चन बोधो भवेत्। भवत्येव तत्र गवाद्यर्थानां बोध इति चेत्, नायं बोधः। किन्त्वर्थस्य स्मरणमात्रम्। शाब्दबोधो नाम शब्दजन्यः परस्परान्वितार्थविषयको यथार्थानुभवः। चतुर्विधयथार्थानुभवेषु हि ‘शाब्दः’ इति विभागः प्रादर्शि। ‘गौरश्वः’ इत्यादिवाक्याच्छाब्दबोधो न भवितुमर्हति, किन्तु विशकलितपदार्थस्मृतिरेव। एवम् ‘अग्निना सिञ्चति’ इति वाक्ये श्रुतेऽपि शाब्दबोधो न जायते, बाधितार्थकत्वात्। एवं प्रातः ‘घटपदम्’ उक्त्वा सायम् ‘आनय’ इति पदप्रयोगेऽपि शाब्दबोधो न भवति, पदानामत्यन्तं व्यवधानात्।

एवं कोशादावपि पदानामर्थोपस्थितिमात्रं भवति। एषु स्थलेषु वाक्ये श्रुतेऽपि शाब्दबोधः कुतो न जायते ? इति शङ्कायाम्, तेषु स्थलेषु शाब्दबोधानुत्पत्तेः कारणान्याह- ‘आकाङ्क्षे’त्यादिना’-

**मूलम्– आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा। अर्थाबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। आकाङ्क्षादिरहितं वाक्यमप्रमाणम्। यथा ‘गौरश्वः पुरुषो हस्ती’ति न प्रमाणम्, आकाङ्क्षाविरहात्। ‘अग्निना सिञ्चती’ति न प्रमाणम्, योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं, सान्निध्याभावात्।**

**व्याख्या-** वाक्यार्थज्ञानं प्रति पदानां परस्परमाकाङ्क्षा, परस्परबाधाभावो योग्यता, पदानामविलम्बेनोच्चारणं सन्निधिश्चेति त्रितयमपेक्ष्यते। एतावता पदज्ञानम्, पदार्थोपस्थितिः, तात्पर्यज्ञानमथ च उपर्युक्तं त्रितयमित्येतदादाय षट् तत्त्वानि शाब्दबोधं जनयन्तीति ज्ञायते। अत आकाङ्क्षादीनि वाक्यार्थज्ञाने हेतुभूतानि वर्तन्ते। उक्तेषु स्थलेषु वाक्ये श्रुतेऽपि शाब्दबोधाभावस्तु आकाङ्क्षादिकारणानामभावादिति निश्चीयते। आकाङ्क्षादीनामुद्देशानन्तरं तेषां लक्षणान्याह- पदस्य पदान्तरेत्यादिना। ननु आकाङ्क्षा नाम इच्छा, योग्यता नाम उत्कर्षसम्पादकसद्गुणवत्त्वम्, सन्निधिश्च सामीप्यम्, द्वयोरेकत्र समावेश इति यावत्।

एते चाचेतने शब्दे कथं स्युः ? किञ्च श्रोतृनिष्ठानामेतेषां कारणत्वे शाब्दबोधेच्छारहितस्य, अयोग्यस्य, वक्तृसमावेशरहितस्यापि शाब्दबोधोत्पत्त्या नैतेषां कारणत्वकथनं युक्तमिति शङ्कायां क्रमेणाकाङ्क्षादीन् निर्वक्ति- पदस्येति। पदस्य = कस्यचित्पदस्य। पदान्तरम् = अन्यत् समीपस्थं पदम्, तद्व्यतिरेकस्तदप्रयोगः। तत्प्रयुक्तम् = तन्निबन्धनम् – तत्पदे सति बोधः, तदभावे च

न बोध इत्येवंरूपम्, अन्वयाननुभावकत्वम् = परस्परान्वयविशिष्टविषयकशाब्दबोधाजनकत्वं यदा भवति, तदा तयोः पदयोराकाङ्क्षा। यथा क्रियापदे श्रुते, कर्त्राकाङ्क्षा, कर्तृवाचकपदे प्रयुक्ते क्रियाकाङ्क्षा च भवति। तद्वाचकपदाभावे च शाब्दबोधो न भवति। एवं सकर्मकधातुश्रवणे कर्माकाङ्क्षा, विशेष्यविशेषणवाचकपदादीनां परस्परमाकाङ्क्षादि च ज्ञेयम्।

अर्थबाधाभावो योग्यता। एतन्नाम अर्थस्य अबाधो बाधनिश्चयाभावः। अत्र 'एकपदार्थे' इत्याध्याहार्यम्। तथा च एकपदार्थे अपरपदार्थबाधनिश्चयाभावो योग्यता इति समायातम्। वह्निना सिञ्चतीत्यत्र सेककरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयसत्त्वान्न तादृशवाक्याच्छाब्दबोधः। अविलम्बितप्रवृत्तिकं पदोच्चारणं सन्निधिः। पदानामविलम्बेनोच्चारणमावश्यकम्। तदभावादेव प्रातः 'गाम्' इत्युच्चार्य, सायम् पुनरानय इत्युच्चारिते सति तयोरन्वयबोधो न भवति। तयोः सान्निध्याभावादिति। उक्तमस्माभिरुपरिष्टाद् 'आप्तवाक्यं शब्दः प्रमाणम्' इति। तच्च वाक्यमाकाङ्क्षादियुतमपेक्षितम्। आकाङ्क्षादिरहितं वाक्यं प्रमाणं भवितुं नार्हति। एतावता कतिपयेषु वाक्येषु पदज्ञाने सत्यपि, सत्यपि च शक्तिज्ञाने आकाङ्क्षाद्यन्यतमकारणाभावान्न शाब्दबोधः सकलकारणसन्निधाने सत्येव कार्योपत्तिसम्भवात्। 'गौरश्वः पुरुषो हस्ती' इत्यत्र तेषां पदानां परस्परमाकाङ्क्षाया अभावान्न शाब्दबोधः। यथा घटवद् भूतलमित्युक्ते घटभूतलयोराधाराधेयभावाद् आधारस्याधेयाकाङ्क्षा, आधेयस्याधाराकाङ्क्षा च वर्तते। अत्र घटस्य भानमाधेयत्वेन भवति चेद् भूतलस्य आधारत्वेन। तथा च भूतलनिष्ठाधिकरणतानिरूपिताधेयता घटे वर्तते, तदाश्रयो घटः। तथा न हि गोपदार्थस्याश्वपदार्थस्य च परस्परमाकाङ्क्षा काचिद्वर्तते, एवमेव पुरुषस्य हस्तिपदार्थस्य चेति। अत आकाङ्क्षाभावान्न शाब्दबोधः। अत एव कोशान्न शाब्दबोधः, परस्पराकाङ्क्षाभावात्। एवमन्यत्राप्यूह्यम्।

इदानीं प्रसङ्गसङ्गत्या सलक्षणं वाक्यभेदं प्रदर्शयति ग्रन्थकारः–

**मूलम्– वाक्यं द्विविधम्- वैदिकं लौकिकं च। वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्। वाक्यार्थज्ञानं शाब्दज्ञानं, तत्करणं शब्दः।**

**व्याख्या-** वैदिकलौकिकभेदेन द्विविधं वाक्यं भवति। वैदिकं नाम ईश्वरोच्चरितत्वे सति अर्थबोधकपदसमूहत्वम्। एतावता ईश्वरोक्तवाक्यं वैदिकवाक्यम्। लौकिकत्वं नाम प्रयोगहेतुभूतयथार्थज्ञानवत्पुरुषोच्चरितत्वे सति अर्थबोधकपदसमूहत्वम्। एतावता पुरुषोच्चरितं वाक्यं लौकिकम्। ईश्वरोच्चरितं वाक्यं वैदिकम्। एतादृशं वैदिकञ्च सर्वमपि प्रमाणत्वेन गृह्यते चेल्लौकिकं पुनराप्तोक्तत्वे सति प्रमाणं तदितरत्तु अप्रमाणमिति।

वाक्यतो जायमानमर्थज्ञानमेव शाब्दज्ञानम् । तस्य ज्ञानस्य व्यापारवद् असाधारणं कारणं शब्द इति ।

**पारिभाषिकपदानामर्थाः**

हेतुतावच्छेदकसम्बन्धः = येन सम्बन्धेन हेतुः पक्षे तिष्ठति, स हेतुतावच्छेदकः सम्बन्धः । यथा पर्वतो वह्निमान् धूमादित्यत्र धूमहेतुः संयोगसम्बन्धेन पर्वते पक्षे तिष्ठति । अतस्तत्र हेतुतावच्छेदकसम्बन्धः संयोगः ।

परामर्शः = व्याप्तिविष्टिस्य हेतोः पक्षेण सह यः सम्बन्धस्तद्विषयकं ज्ञानं परामर्शः । स चानुमितिजनको व्यापारविशेषः । यथा- पर्वतो वह्निमानित्यनुमितिं प्रति वह्निव्याप्तिविशिष्टस्य धूमस्य पक्षेण पर्वतेन सह यः संयोगसम्बन्धस्तद्विषयकं वह्निव्याप्यधूमवानयं पर्वत इत्याकारकं ज्ञानम् ।

अनुमितिः = प्रमाचतुष्टयवादिनो नैयायिकास्तासु अनुमितिरेका प्रमा ।

अनुमित्यात्मकं प्रकृष्टं ज्ञानमित्यर्थः । सा च परामर्शजन्या भवति ।

हेत्वविषयकम् = यस्मिन् ज्ञाने विषयतासम्बन्धेन हेतुविषयो न भवति तादृशं ज्ञानं हेत्वविषयकमित्युच्यते । हेतुविषयताऽनिरूपकं ज्ञानमित्यर्थः । यथा- पर्वतो वह्निमानित्याकारिकाऽनुमितिः । सा हेतुविषयिणी न भवितुमर्हति । यतो हि अनुमितिः कदापि हेतुविषयीभूता न सम्भवति । अतोऽनुमितिर्हेत्वविषयिका । अर्थादनुमितिनिष्ठविषयिता- निरूपिता विषयता साध्यसाधके हेतौ नास्तीत्यर्थः ।

## पदानामर्थपरिचयः

साध्यम् = साधयितुं योग्यम् ।

प्रमाणम् = प्रमायाः साधनम् ।

प्रमा = यथार्थानुभवः ।

अनुमितिः = अनुमित्यात्मकं प्रकृष्टं ज्ञानम् ।

पक्षतावच्छेदकधर्मः = येन धर्मेण पक्षता अवच्छिन्ना भवति, स पक्षतावच्छेदकधर्मः । पक्षताया व्यावर्तकधर्मविशेषः ।

दृष्टान्तः = लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ।

यथाक्रमम् = क्रमेण, क्रमम् अनतिक्रम्य ।

जिज्ञासुः = ज्ञातुकामः ।

करणम् = असाधरणं कारणम् ।

व्यापारः = तज्जन्यत्वे सति तज्जन्यजनकः (सम्बन्धविशेषः) ।

नव्याः = नवीननैयायिकाः ।

अश्वः = घोटकः ।

हस्ती = गजः ।

लिङ्गम् = सूचकम्/हेतुः ।

लिङ्गी = साध्यः ।

व्याप्तिः = साध्याभाववदवृत्तित्वरूपः सम्बन्धविशेषः ।

अनवधारणात्मकम् = अनिश्चयात्मकम् ।

| | | |
|---|---|---|
| भूयोदर्शनम् | = | असकृद्दर्शनम् । |
| अङ्गम् | = | अवयवः । |
| साहचर्यम् | = | सामानाधिकरण्यम् । |
| सोपाधिकः | = | उपाधिसहितः |
| सुकरः | = | सरलः । |
| संज्ञा | = | नाम । |
| संज्ञी | = | नामवान् /नामी । |
| विशिष्टः | = | विशेषणेन युक्तः । |
| शाब्दबोधः | = | शब्दजन्यो बोधः । |
| चिख्यापयिषा | = | वक्तुमिच्छा । |
| वैदिकम् | = | वेदसम्बद्धम्, वेदे विद्यमानम् । |

## अभ्यासः

### १. संक्षिप्तमुत्तरं देयम्

(क) अनुमितिलक्षणं विलिखत ।

(ख) अनुमितिपरामर्शयोः कः सम्बन्धः ?

(ग) पर्वतो वह्निमानित्यनुमितौ उद्देश्यविधेयभावं निर्धारयत ।

### २. उपयुक्तोत्तरे √ चिह्नं देयम्

(क) प्रत्यक्षनिरूपणानन्तरं किं निरूप्यते ?

(अनुमितिः, अनुमानम् , पक्षधर्मता)

(ख) अनुमानं किम्पूर्वकं भवति ?

(प्रत्यक्षपूर्वकम् , उपमितिपूर्वकम्, पक्षधर्मतापूर्वकम्)

(ग) अनुमितिं प्रति करणं किम् ?

(अनुमानम्, परामर्शः, पक्षधर्मताज्ञानम्)

(घ) अनुमितौ व्यापारः कः ?

(परामर्शः, व्याप्तिज्ञानम्, पक्षधर्मतापूर्वकम्)

(ङ) अनुमानमिति पदं कथं व्युत्पद्यते ?

(अनुमिनोतीत्यनुमानम्, अनुमीयते अनेनेति, अनु पश्चाद् मीयन्ते इति)

### २. अतिसंक्षिप्तमुत्तरं देयम्

(क) प्रमापदस्य अर्थः कः ?

(ख) परामर्शजन्यं ज्ञानमनुमितिरित्यत्र लक्ष्यबोधकं पदं किम् ?

(ग) शब्दप्रमाणं किम् ?

(घ) वाक्यं नाम किम् ?

(ङ) पदस्वरूपं किम् ?

(च) का नाम शक्तिः ?

(छ) वाक्यार्थज्ञाने हेतुः कः ?

(ज) आकाङ्क्षा का ?

(झ) का नाम योग्यता ?

(ञ) सन्निधिः कः ?

(ट) वाक्यं कतिविधम् ?

## ३. रिक्तस्थानं पूरयत

(क) अनुमितिं प्रति व्याप्तिज्ञानं ... भवति ।

(ख) अनुमितिकरणं ... भवति ।

(ग) व्यापारवदसाधारणं ... करणं भवति ।

(घ) अनुमितौ व्यापारः ... भवति ।

(ङ) अनुमीयतेऽनेनेति व्युत्पत्त्या ... निष्पद्यते ।

## ४. परस्परं मेलयत

| | |
|---|---|
| परामर्शजन्या | परामर्शः कारणम् |
| अनुमितिं प्रति | पर्वतोद्देश्यकवह्निविधेयः |
| पर्वतो वह्निमानित्यनुमितौ | अनुमितिः |

## ५. व्याख्यात्मकमुत्तरं देयम्

(क) उपजीव्योपजीवकभावस्याभिप्रायं प्रकाशयत ।

(ख) सोदाहरणं पक्षलक्षणं वर्णयत ।

(ग) पञ्चावयववाक्यानि सोदाहरणानि प्रदर्शयत ।

(घ) लिङ्गभेदं निर्दिश्य केवलान्वयिस्वरूपं प्रकाशयत ।

(ङ) सभेदं हेत्वाभासस्य लक्षणं विलिख्य सोदाहरणं सव्यभिचारं निरूपयत ।

(च) सपदकृत्यमनुमितिस्वरूपं प्रकाशयत ।

## ६. विवेचनात्मकमुत्तरं देयम्

(क) सङ्गतिनिर्देशपूर्वकमनुमानस्वरूपं विवेचयत ।

(ख) अनुमानस्य प्रत्यक्षपूर्वकत्वं विचारयत ।

(ग) व्याप्तिज्ञानस्य करणत्वं स्फुटीकुरुत ।

(घ) परामर्शस्य स्वरूपं विवेचयत ।

(ङ) उपमितिप्रक्रियां साधु विवेचयत ।

(च) शब्दप्रमाणं साधूपपादयत ।

(छ) वाक्यार्थज्ञानहेतुमुद्दिश्य आकाङ्क्षास्वरूपं निरूपयत ।

## ७. कक्षाभ्यासो गृहाभ्यासश्च

(क) हेत्वाभासस्य स्वरूपविषये कक्षायां मित्रैः सह विमर्शो विधेयः ।

(ख) विरुद्धहेत्वाभासविषये एकं लेखं विरचय्य गुरवे प्रदर्शनीयः ।

(ग) सत्प्रतिपक्षहेत्वाभासमादाय कक्षायां मित्रैः सह प्रश्नोत्तरकार्यं विधेयम् ।

(घ) उपमितिप्रक्रियाविषये कक्षायां सखिभिः सह विमर्शो विधेयः ।

(ङ) आप्तविषये कक्षायां मित्रैः सह प्रश्नोत्तरात्मकं कार्यं विधेयम् ।

(च) आकाङ्क्षायोग्यतासन्निधिविषयकमेकमनुच्छेदो रचनीयः ।

## ८. परियोजनाकार्यम्

(क) 'पर्वतो वह्निमान् धूमाद्' इतिवत् किमपि अपरमनुमानवाक्यं निर्माय तस्य पञ्चावयववाक्यानि विमृश्य निर्मात ।

(ख) एकं किमपि वाक्यं परिकल्प्य तस्य शाब्दबोधविधिं शिक्षकपरामर्शेन निर्धार्य प्रदर्शयत ।

## ९. सर्जनात्मकोऽभ्यासो रचनात्मकोऽभ्यासश्च

(क) साध्यसाधकानां सद्धेतूनां स्वरूपमादाय सप्रयोगमनुच्छेदद्वयं रचयत ।

(ख) 'हेत्वाभासज्ञानस्योपयोगिता' इति शीर्षके लघुनिबन्धो लेखनीयः ।

(ग) परार्थानुमानविधिमाधृत्य एकं संवादं रचयत ।

**पञ्चमः पाठः**

# अवशिष्टगुणतोऽभावपदार्थान्ताः

## अयथार्थानुभवनिरूपणम्

पूर्वं तावत् प्रत्यक्षानुमित्युपमितिशाब्दभेदेन यथार्थानुभवस्य चतुर्विधत्वं प्रतिपादितम् । इदानीं अयथार्थानुभवं विभजते संशयविपर्ययतर्केत्यादिना–

**मूलम्– अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात् । एकस्मिन् धर्मिणि विरुद्धनानाधर्म-वैशिष्ट्यावगाहि ज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वेति । मिथ्याज्ञानं विपर्ययः । यथा शुक्तौ इदं रजतमिति । व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादिति ।**

**व्याख्या-** तथा च संशयो विपर्ययस्तर्कश्चेति त्रिविधोऽयथार्थः । प्रथमं संशयस्य लक्षणमाह- एकस्मिन्निति । एकस्मिन् धर्मिणि एकस्मिन् पुरोवर्तिनि पदार्थे, विरुद्धाः = व्यधिकरणाः ये धर्माः स्थाणुत्वपुरुषत्वादयः तेषां वैशिष्ट्यम् = सम्बन्धः, तदवगाहि = तद्विषयकं ज्ञानं संशय इत्यर्थः । अर्थादेकस्मिन् विशेष्ये परस्परविरुद्धानेकविशेषणान्यवगाहमाना बुद्धिः संशय इति कथ्यते । तमुदाहरति यथेति पदेन । अयं स्थाणुर्भूमौ स्थितस्य शुष्कवृक्षस्य भागः अथवा पुरुषो जनः इत्यनिर्णयावस्था । दूरतोऽग्रे उन्नतं वस्तु स्थाणुपुरुषोभयसमानं दृष्ट्वा अयं स्थाणुर्वा पुरुषो वेति संशयमापन्नो भवति कश्चन । तस्मिन् ज्ञाने परिदृश्यमानम् एवं विशेष्यं भवति तत्र च विरुद्धौ स्थाणुत्वपुरुषत्वधर्मौ प्रकारौ भवतः । तादृशं ज्ञानं संशयो भवतीत्यर्थः ।

**अस्यायमाशयः**

एकस्मिन्नेव विशेष्ये यत्र भावाभावौ विशेषणतया अवभासेते तज्ज्ञानं संशयो भवति । यथा भूतलं

घटवद् वा न वा इति । अत्र हि भूतले घटो घटाभावश्च विशेषणतया भासते इत्येवंविधज्ञानं संशय इति । अर्थादेकस्मिन् धर्मिणि भावाभावविषयकं ज्ञानं संशय इत्यर्थः ।

क्रमप्राप्तं विपर्ययस्य लक्षणं निर्दिशति मिथ्याज्ञानमित्यादिना । तदभाववति तत्प्रकारज्ञानम् । अयथार्थज्ञानमित्यर्थः । विपर्ययो भ्रमो विपरीतभावना इत्यर्थान्तरम् । यथार्थज्ञानेऽतिव्याप्तिवारणाय मिथ्या इत्युक्तम् । तदुदाहरति यथा शुक्ताविति पदेन । विपरीतं ज्ञानं विपर्ययो भवति । दृश्यमाने ज्ञाने अविद्यमाना अपि धर्मा विशेषणीभूय भासन्ते । यथा पुरतो विद्यमाना रज्जुः, तां कश्चित् सर्प इति जानाति, एवञ्च शुक्तिं दृष्ट्वा रजतं मनुते । तथैव आतपे प्रकाशमानं वालुकादिकमपि जलवत्प्रतीयते । एवं वस्तुस्थित्यननुगुणम् = अर्थाननुसारि, अयथार्थज्ञानं दोषवशाद् भवति ।

तर्कस्य लक्षणं जगाद- व्याप्यारोपेणेति । व्याप्यस्य अग्न्यभावादेः, आरोपेण = आहार्यज्ञानेन व्यापकस्य = धूमाभावादेः य आरोपः = आपादनं स तर्क इत्यर्थः । यत्र व्याप्यमस्ति तत्रावश्यं व्यापकमपि भवतीति नियमोऽस्ति सापेक्षत्वात् । यत्र तदुभयं नास्तीति प्रथममेव ज्ञातमथापि यदि व्याप्यं भवेत् तर्हि व्यापकमपि भवेदिति आहार्यारोपः क्रियते । सोऽयमारोप एव तर्क इत्युच्यते । यथा एकेन समीचीनतया न पठितम्, तस्मात् स परीक्षायामनुत्तीर्णः । एवं ज्ञात्वापि यदि स वदेत् यदि मयापि सम्यक् पठितं भवेत् तदाहमप्यवश्यं परीक्षायामुत्तीर्णो भवेयमिति । सोऽयमारोपस्तर्कः । उदाहरति यदीति पदेन । अत्रापि यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादिति । असम्भवदोषवारणाय व्याप्यारोप इत्यादिपदम् । अयं तर्कः प्रमाणानुग्राहक इति नैयायिकाः सिद्धान्तयन्ति ।

## स्मृतिभेदनिरूपणम्

**मूलम्– स्मृतिरपि द्विविधा । यथार्थायथार्था च । प्रमाजन्या यथार्था । अप्रमाजन्याऽयथार्था ।**

**व्याख्या-** यथार्थायथार्थभेदेनानुभवस्यापि द्वैविध्यं पूर्वं निरूपितम् । सम्प्रति संस्कारमात्रजन्यं ज्ञानमित्येवंरूपा स्मृतिरपि यथार्थायथार्थभेदेन द्विधा वर्तत इति सन्दर्श्यते । यथार्थानुभवजन्या स्मृतिर्यथार्था चेद् अयथार्थानुभवजन्या स्मृतिरयथार्थेति विवेकः ।

अनुभवः खलु संस्कारद्वारा स्मृतिं जनयति । कारणभूतानुभवानुसारेण कार्यभूता स्मृतिरपि यथार्था अयथार्था च भवतीति तात्पर्यम् । प्रमाजन्या यथार्था । अप्रमाजन्या अयथार्था इति बोध्यम् ।

## सुखनिरूपणम्

**मूलम्– सर्वेषामनुकूलतया वेदनीयं सुखम्।**

**व्याख्या-** बुद्धेरनन्तरं क्रमप्राप्तं सुखादिगुणनिरूपणमारभते- सर्वेषामनुकूलतयेत्यादिना। सर्वेषां प्राणिनाम् आत्मानुकूलतया वेदनीयो गुणः सुखम्। इष्टत्वेन वेदनीयम् = ज्ञानविषयः, सुखमित्यर्थः। तत्तु धर्मेणैव प्राप्यते। उक्तञ्च विश्वनाथेन कारिकायाम्- **सुखं तु जगतामेव काम्यं धर्मेण जायते** इति। अतः सुखं प्रति धर्मः कारणम्। अथवा धर्ममात्रासाधारणकारणो गुणः सुखम्। अन्यदेकं प्रसिद्धं सुखस्य लक्षणमित्थं वर्तते– इतरेच्छानधीनेच्छाविषयत्वमिति।

## दुःखनिरूपणम्

**मूलम्– प्रतिकूलतया वेदनीयं दुःखम्।**

**व्याख्या-** सुखलक्षणविपरीततया दुःखलक्षणं ज्ञेयं भवति। चेतनशीलानां प्राणिनामात्मप्रतिकूलतया वेदनीयो गुणो दुःखम्। अस्य कारणानि देशकालपुरुषभेदेन विभिन्नानि भवन्ति। अस्मिन् काले यद् दुःखकारणं कालान्तरे तदेव सुखकारणमपि भवितुमर्हति। तद् दुःखमधर्माज्जायते। धर्माधर्मफलमेव क्रमेण सुखदुःखमिति ज्ञेयम्। **अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम्** इत्याह भट्टाचार्यः।

## इच्छाक्रोधकृतिनिरूपणम्

**मूलम्– इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः।**

**व्याख्या-** स्वार्थं परार्थं वा अप्राप्तवस्तुप्रार्थना इच्छा। अप्राप्तस्य वस्तुनः स्वार्थं प्रति इदं मे भूयात्, परार्थं प्रति अस्य इदं भवतु इति वा प्रार्थना इच्छा। सा इच्छा आत्ममनसोः संयोगात् सुखाद्यपेक्षातः स्मृत्यपेक्षातो वा उत्पद्यते। पदार्थधर्मसङ्ग्रहे 'स्वार्थं परार्थं वा अप्राप्तप्रार्थनेच्छा, सा चात्ममनसोः संयोगात् सुखाद्यपेक्षातः स्मृत्यपेक्षातो वोत्पद्यत इति प्रशस्तपादाचार्य उक्तवान्। इच्छां प्रति इष्टसाधनताज्ञानं कारणं भवति।

इदानीं द्वेषस्य लक्षणमुच्यते । पूर्वकाले येन कारणेन दुःखं प्राप्तम्, तत् स्मृत्वा य उद्वेगो मनसि जायते स एव द्वेषः । तस्य इत्थं लक्षणमलक्षि प्रशस्तपादमहाभागेन–'प्रज्वलनात्मको द्वेषः, यस्मिन् सति प्रज्वलितमिवात्मानं मन्यते स द्वेषः । स चात्ममनसोः संयोगात् दुःखापेक्षातो वोत्पद्यते' इति । दुःखहेतुं प्रति द्विष्टसाधनात्मकं ज्ञानं द्वेषः । यस्मिन् सति प्राणिनां धर्माधर्मप्रवृत्तिर्जायते । इच्छया, द्वेषेण वा जनाः धर्मेऽधर्मे वा प्रवर्तन्ते । उक्तं च सूत्रे– **इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः** (**वै.सू. ६।२।१४**) इति । तस्य द्वेषस्य पञ्च भेदाः सन्ति, ते च क्रोधः, द्रोहः, मन्युः, अक्षमा, अमर्षश्चेति ।

प्रयत्नत्वजातिर्यत्र वर्तते स एव प्रयत्नः । इष्टसाधनभूतं प्रति इच्छया, द्विष्टसाधनभूतं प्रति द्वेषाद् वा जनाः प्रयतन्ते । स प्रयत्नो द्विविधः, जीवनपूर्वकः, इच्छाद्वेषपूर्वकश्च । सुप्तावस्थायां जाग्रदवस्थायाञ्च इच्छाद्वेषविहीनं प्राणसञ्चालनमनवरतरूपेण भवत्येव स एव जीवनपूर्वकप्रयत्नः । पूर्ववर्णितानुसारेण इच्छया द्वेषाद् वा यः प्रयत्नो जायते स इच्छाद्वेषपूर्वकप्रयत्नः । परन्तु कारिकाकारेण विश्वनाथेन इच्छाद्वेषपूर्वकप्रयत्नं त्रिधा विभज्य प्रयत्नस्य त्रिविधत्वमुक्तम् । तद्यथा–प्रवृत्तिप्रयत्नः, निवृत्तिप्रयत्नः, जीवनयोनिप्रयत्नश्च । तत्र इष्टसाधनभूतं प्रति यः प्रवृत्तिर्जायते सः प्रवृत्तिप्रयत्नः । द्विष्टसाधनभूतं प्रति या निवृत्तिर्भवति सः निवृत्तिप्रयत्नः । जीवनयोनिप्रयत्नस्तु सर्वदा अतीन्द्रियो भवति, शरीरे प्राणसञ्चारे कारणञ्च भवति । उक्तञ्च– **प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्** इति ।

## धर्माधर्मनिरूपणम्

**मूलम्– विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः ।**

**व्याख्या-** विहितकर्मेत्यत्र वेदशब्दो योजनीयः । तथा च वेदविहितकर्मजन्यो धर्म इति धर्मलक्षणं सम्पद्यते । वेदेन विहितं वेदविहितम्, तच्च कर्म वेदविहितं कर्म, तस्माज्जन्य इत्यर्थः । अधर्मकर्मजन्येऽतिव्याप्तिवारणाय वेदविहित इति पदम् । यागादिक्रियायामतिव्याप्तिवारणाय कर्मजन्य इति पदं दत्तम् । वस्तुतः स्वर्गमोक्षादिसाधनात्मको यो गुण स धर्मः । इह लौकिकपारलौकिकसकलसुखादीनां साधनं धर्म एव । कथं वेदविहितकर्मादिना धर्मः स्यात् ? इत्यत्र कारिकाकार आह–

**धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् ।**
**गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः ॥** इति ।

अत्रापि मूले पूर्ववद् वेदशब्दं योजयित्वा अर्थनिर्धारणं विधेयम् । तथा च वेदनिषिद्धकर्मजन्योऽधर्म इत्यधर्मस्य लक्षणम् । वेदेन निषिद्धं यत् सुरापानादिकं कर्म, तज्जन्यो गुणोऽधर्म इत्यर्थः, नरकादिसकलदुःखानां हेतुभूतो गुणोऽधर्म एव । स तु वेदनिषिद्धकर्मकरणाज्जायते । वेदविहितकर्मजन्यो धर्मः, तथा निषिद्धकर्मजन्योऽधर्मश्च कथं नश्यति ? इत्यत्र विश्वनाथ आह कारिकावल्याम्–

**अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः ।**
**प्रायश्चित्तादिनाश्योऽसौ जीववृत्तिस्त्विमौ गुणौ** ॥ इति ।

इमौ धर्माधर्मौ मिथ्याज्ञानाद् जन्येते, तत्त्वज्ञानाद् नश्यतः । ततश्च धर्माधर्मयोर्नष्टयोः सतोर्मुक्तिर्लभ्यते । एतौ हि अदृष्टपदबोध्यौ स्तः ।

## आत्मनो विशेषगुणनिरूपणम्

**मूलम्– बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना द्विविधाः । नित्या अनित्याश्च । नित्या ईश्वरस्यानित्या जीवस्य ।**

**व्याख्या-** बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा आत्ममात्रगुणाः सन्ति । अत्रात्मपदेन जीवात्मा परमात्मा च गृह्यते । तस्मिन्नात्मनि समवायेन ये बुद्ध्यादयोऽष्टौ गुणास्तिष्ठन्ति ते आत्ममात्रस्य विशेषगुणाः । अर्थाद् बुद्ध्यादयोऽष्टौ गुणा आत्मेतरावृत्तिगुणा इत्यर्थः । जीवमात्रनिष्ठानां कर्माधीनानां तेषामनित्यत्वम् । बुद्धीच्छाप्रयत्नानामीश्वरगतानां नित्यत्वं जीवगतानाञ्चानित्यत्वमिति बोधयति- बुद्धीच्छाप्रयत्ना ... इत्यादिभिः ।

## सभेदं संस्कारलक्षणनिरूपणम्

**मूलम्– संस्कारस्त्रिविधः । वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना । आत्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तदवस्थापकः स्थितिस्थापकः कटादिपृथिवीवृत्तिः ।**

**व्याख्या-** पूर्ववर्णितेषु चतुर्विंशतिगुणेषु अन्तिमो गुणः संस्कारः । तस्य लक्षणं सङ्क्षेपेण वर्ण्यते । संस्कारत्वजातिर्यत्र वर्तते स संस्कारः । मूले संस्कारस्य लक्षणमकृत्वैव तद्विभागो दर्शितः ।

पदकृत्यकारेण चन्द्रजसिंहेन सामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् संस्कार इत्युक्तम् । दीपिकायां तु संस्कारत्वजातिमान् संस्कार इत्युक्तं वर्तते ।

स च संस्कारः त्रिविधः, वेगभावनास्थितिस्थापकभेदात् । एतेषां त्रयाणां संस्काराणां मध्ये वेगाख्यसंस्कारः पृथिव्यादिचतुष्टयमनोवृत्तिः । तत्र वेगस्य लक्षणं गुरुत्वादिभिन्नत्वे सति द्वितीयादिपतनासमवायिकारणत्वमिति । वेगश्च मूर्त्तिमत्सु पञ्चसु द्रव्येषु निमित्तविशेषापेक्षातः कर्मणो जायते । अनुभवजन्यस्मृतिहेतुभूतो भावनाख्यसंस्कारो जीवात्मवृत्तिः । अयं भावनाख्यः संस्कारो ह्यात्मगुणो दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुर्भवति । अतश्चोच्यते- 'अनुभवजन्यत्वे सति स्मृतिप्रत्यभिज्ञानहेतुत्वं भावनाया लक्षणम्' इति । क्रियाविशेषजनकः स्थितिस्थापकसंस्कारः । अन्यथाकृतस्येति पदेन स्थितिस्थापकं संस्कारं दर्शयति ग्रन्थकारः । तथा च पूर्वकालसम्बन्धिविलक्षणसंस्थानजातीयस्थापकः पुनरुत्पत्तिजनक इति । अयञ्च संस्कारः स्पर्शवद् द्रव्येषु वर्तमानो घनावयवसन्निवेशविशिष्टेषु कालान्तरावस्थायिषु स्वाश्रयमन्यथाकृतं यथावस्थितं स्थापयति । स्थितिस्थापकसंस्कारः कटादिपृथिव्यां वर्तते ।

## सभेदं कर्मलक्षणनिरूपणम्

**मूलम्– चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनम् । विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत् सर्वं गमनम् । पृथिव्यादिचतुष्टयमनोमात्रवृत्ति ।**

**व्याख्या-** संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म इति । कर्मणो लक्षणमित्थमाह कणादः- **एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्** (वै.सू. १।१।१७) । संयोगभिन्नं संयोगस्य असमवायिकारणं कर्म कर्मत्वसम्बन्धाद् इति वा कर्म इत्युक्तं प्रशस्तपादभाष्ये । कर्म द्रव्यमात्रे तिष्ठति । उत्क्षेपणम् अपक्षेपणम् आकुञ्चनं प्रसारणं गमनञ्चेति भेदेन कर्म पञ्चविधं मूलोक्तम् । न वास्मिन् सन्दर्भे **कर्तुरीप्सिततमं कर्म** (पा.सू. १।४।४९) पाणिनिनिर्दिष्टं पारिभाषिकं कर्म । न वा वेदान्तदर्शनोक्तं नित्यनैमित्तिकादिकं कर्म बोद्धव्यम् । अत्र क्रियामात्रस्य कर्मत्वमुच्यते ।

अत उक्तं मूले चलनात्मकं कर्म इति । एतदनुसारं चलति इति प्रतीतिसिद्धक्रियात्वरूपजातिमत्त्वं कर्मत्वम् । तच्च कर्म उत्क्षेपण-अवक्षेपण-आकुञ्चन-प्रसारण-गमनभेदेन पञ्चविधं वर्तते

इत्याह कणभुग्- 'उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि' इति। तर्कसङ्ग्रहादौ अपक्षेपणपदस्य प्रयोगोऽस्ति। सूत्रकारेण तु पुनरवक्षेपणमित्युक्तमस्ति।

चलने जाते सति पूर्वदेशाद् वस्तुनो विभागो जायते। ततः पूर्वसंयोगो नाश इति। तत उत्तरदेशसंयोगोत्पत्तिः।

१. द्रव्यस्य ऊर्ध्वदेशेन संयोगस्य कारणं यत् कर्म भवति तदुत्क्षेपणम्।

२. द्रव्यस्य अधोदेशेन संयोगस्य कारणं यत् कर्म भवति तदपक्षेपणम्।

३. द्रव्यस्य सन्निकृष्टसंयोगस्य कारणं यत् कर्म तदाकुञ्चनम्।

४. द्रव्यस्य विप्रकृष्टसंयोगस्य कारणं यत् कर्म तत् प्रसारणम्।

५. अनियतदिग्देशसंयोगजनकं कर्म गमनमस्ति।

उपर्युक्तमुत्क्षेपणादिकं नियतदिग्देशसंयोगजनकं कर्म अस्ति। परन्तु गमने तु तादृशो नियमो नास्ति। तत्तु अनिर्दिष्टदिशि स्थितेन देशेन सह द्रव्यस्य संयोगे कारणं भवति। उत्क्षेपणादिकं कर्म तु नियमेन नियतासु ऊर्ध्वादिषु दिक्षु स्थितेन देशेन सह द्रव्यस्य संयोगे कारणं भवति।

ततोऽतिरिक्तं यत्किञ्चित् कर्म जायते, तत् सर्वं गमनात्मकमिति विवेकः।

## सभेदं सामान्यलक्षणनिरूपणम्

**मूलम्– नित्यमेकमनेकानुगतं सामान्यं द्रव्यगुणकर्मवृत्ति। तद् द्विविधं परापरभेदात्। परं सत्ता। अपरं द्रव्यत्वादि।**

**व्याख्या-** नित्यत्वे सति अनेकसमवेतत्वं सामान्यस्य लक्षणम्। सामान्यं जातिरिति द्वौ शब्दौ पर्यायौ। तच्च पर-अपरभेदेन द्विविधमिति तर्कसङ्ग्रहकार आह। परापरभेदेन तृतीयमपि प्रसिद्धमस्ति। परत्वं

व्यापकत्वम्, अपरत्वं व्याप्यत्वम्। सत्तायाः व्यापकत्वम्। घटत्वपटत्वादिजातीनां व्याप्यत्वम्। द्रव्यत्वपृथित्वादिजातीनां सत्तापेक्षया व्याप्यत्वं घटत्वाद्यपेक्षया व्यापकत्वञ्च भवति।

## पदप्रयोजनम्

इदञ्च सामान्यं द्रव्यगुणकर्ममात्रवृत्तिरित्यपि प्रतिपादितम्। अस्योपर्युक्ते लक्षणे च नित्यत्वमात्रोक्तौ गगनादौ, अनेकसमवेतत्वमात्रोक्तौ घटादौ संयोगादौ चातिव्याप्तिरिति द्वयोर्दलयोरावश्यकत्वम्। नित्यत्वे सति समवेतत्वमात्रोक्तौ गगनपरिमाणादावतिव्याप्तिरतोऽनेकेति। नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावेऽप्यस्ति अतो वृत्तित्वसामान्यं विहाय समवेतत्वमिति उक्तम्। ननु तथापि नित्यसंयोगेऽतिव्याप्तिरिति चेन्न, नित्यसंयोगानङ्गीकारात्। अन्यथा तुल्ययुक्त्या नित्यविभागस्यापि सिद्धिप्रसङ्गात्। अथवा तत्रातिव्याप्तिवारणाय संयोगभिन्नत्वे सतीति दलं देयम्। अथवा अनेकसमवेतत्वमित्यत्र अनेकपदं बहुपरम्, नित्यसंयोगश्च द्विसमवेतः, न बहुसमवेत इति न दोषः।

ननु निस्सामान्यत्वे सति विशेषान्यत्वे सति समवेतत्वं सामान्यलक्षणं प्राचामभिमतम्। तत्र घटादौ अतिव्याप्तिवारणाय प्रथमसत्यन्तम्। विशेषेऽतिव्याप्तिवारणाय द्वितीयम्। समवायाभावयोरतिव्याप्तिवारणाय विशेष्यदलम्। ततश्च आकाशत्वं जातिरिति प्रतीयते नित्यत्वे सति अनेकसमवेतत्वं लक्षणन्तु चात्राव्याप्तमिति चेन्न, एकमात्रवृत्तिधर्मस्य जातित्वानभ्युपगमादाकाशत्वं न जातिः। यथा 'अयं गौः' 'अयं गौः' इति अनुगतप्रत्ययस्य कारणं गोत्वादिधर्मः सामान्यमिति कथ्यते। यथोक्तं केशवमिश्रेण–अनुवृत्तिप्रत्ययहेतुः सामान्यम् इति। द्रव्यादित्रयवृत्ति, नित्यमेकमनेकानुगतञ्च। सामान्यं छिन्नास्वप्यच्छिन्नमस्ति। अतस्तन्नित्यमुक्तं वैशेषिकैः। तच्च भिन्नास्वपि व्यक्तिष्वभिन्नमेकमस्ति।

यदेकाधिकेष्वपि वस्तुषु युगपद् वर्तते तद् अनेकानुगतमिति कथ्यते। अनेकेषु समवेतमित्यर्थः। सामान्यं स्वाश्रये समवायेन सम्बन्धेन तिष्ठति। तत् परापरभेदाद् द्विविधमस्तीति मूले प्रदर्शितम्। ययोः सामान्ययोः क्वचिदपि सामानाधिकरण्यं भवति तयोरेव परापरविचारः प्रसरति। अधिकदेशवृत्तित्वं परत्वम्, न्यूनदेशवृत्तित्वमपरत्वमिति च परापरविभागो बोद्धव्यो भवति। यथा द्रव्यगुणकर्मसु त्रिषु विद्यमानत्वादधिकदेशवृत्तित्वाद् वा सत्तायाः परत्वम्। न्यूनदेशवृत्तित्वाद् यथा द्रव्यत्वादेरपरत्वम्। क्वचित् परापरमिति तृतीयप्रकारकं सामान्यमुक्तमस्ति। यथा द्रव्यत्वादेः पृथिवीत्वादेरपेक्षया अधिकदेशवृत्तित्वम्, सत्तापेक्षया तस्यैव न्यूनदेशवृत्तित्वम्। अतश्चोक्तं विश्वनाथेन–**धर्मद्वयसमावेशाद् उभयमविरुद्धम्** इति। सामान्ये सामान्यं न कदापि तिष्ठत्यनवस्थाप्रसङ्गात्।

## विशेषलक्षणनिरूपणम्

**मूलम्– नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।**

**व्याख्या-** नित्यद्रव्येष्ववस्थितः कश्चन भेदकः पदार्थो विशेषोऽस्ति । अत उक्तं नित्यद्रव्यवृत्तयो व्यावर्तका विशेषा इति । ते चानन्ताः सन्ति । मूले विद्यमानस्य व्यावर्तकपदस्य भेदक इत्यर्थः । सावयवद्रव्येभ्यः सावयवद्रव्याणि अवयवादिभेदेन परस्परं भिद्यन्ते । यथा घटस्तदवयवकपालभेदाद् अन्यस्माद् घटाद् भिद्यते ।

परन्तु निरवयवेभ्यो नित्येभ्यो द्रव्येभ्यो निरवयवं नित्यं द्रव्यं कथं भिद्यते ? इति प्रश्ने एवमुच्यते– विशेषपदार्थभेदेन निरवयवं नित्यं द्रव्यमन्यस्माद् नित्यद्रव्याद् भिद्यते । विशेषा नित्यद्रव्येषु तिष्ठन्ति । पृथिवीजलतेजोवायूनां परमाणवो नित्याः । तथैव आकाशादिपञ्चकञ्च नित्यमस्ति । अतः पृथिव्यादीनां परमाणुषु आकाशादिपञ्चद्रव्येषु विशेषाः तिष्ठन्ति । अतश्च विशेषा अनन्ताः सन्ति । स च विशेषो भेदबुद्धेर्जनकोऽस्ति । संहारकाले पार्थिवजलीयतैजसवायवीयपरमाणवः पृथिवीत्वादिभेदेन परस्परं भिद्यन्ते ।

परन्तु समानजातीयानां पार्थिवादिपरमाणूनां परस्परभेदसाधको न कश्चिद् धर्मो भवति । अतस्तद्भेदावबोधार्थं पार्थिवादिपरमाणुषु तद्व्यावर्तकधर्मो विशेषाख्यः स्वीक्रियते । शब्दसमवायिकारणतावच्छेदकतया चाकाशे विशेषाख्यः पदार्थः स्वीक्रियते । तथा च संहारकाले गुणानां लोपे सति दिक्कालयोर्भेदपरिबोधनाय तयोरपि विशेषः स्वीकृतोऽस्ति । अपवर्गेऽपि आत्मनां परस्परभेदसिद्धयर्थं चात्मस्वपि विशेषपदार्थ उररीकृतोऽस्ति । यथाह कणादः- **अन्यत्रान्त्येभ्यो विशेषेभ्यः (वै.सू. १।१।६)** इति ।

## समवायस्वरूपनिरूपणम्

**मूलम्– नित्यसम्बन्धः समवायः । अयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्ये एकमविनश्यद् अपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवाऽवयविनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ।**

**व्याख्या-** वैशेषिकदर्शने प्रतिपादितेषु न्यायदर्शने चाभिमतेषु सप्तपदार्थेषु षष्ठः पदार्थः समवायोऽस्ति । यः सम्बन्धः नित्यः स समवायः । स च एक एव । कणादेन उक्तं यत् **इहेदमिति यतः कार्यकारणयोः स समवायः (वै.सू. ७।२।२६)** इति । एवमेव "नित्यसम्बन्धः समवायः" इत्युपर्युक्तम् । स च सम्बन्धः अयुतसिद्धयोः पदार्थयोर्भवति । यौ विषयौ मिश्रितौ सिद्धौ स्तः तावयुतसिद्धौ । यथा तन्तुपटौ मिलितौ स्तः । उभावपि सिद्धौ स्तः । "ययोर्द्वयोर्मध्ये एकम् अविनश्यदवस्थमपराश्रितमेवावतिष्ठते तौ अयुतसिद्धौ" इति । मिश्रणामिश्रणार्थकस्य युधातोः क्तप्रत्यये निष्पन्नः युतशब्दः प्रकृतप्रसङ्गे असम्बद्धार्थस्य वाचकोऽस्ति ।

असम्बद्धसिद्धो यो न भवति सोऽयुतसिद्धोऽपृथक्सिद्ध इत्यर्थः । अयुतसिद्धौ चावयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्तिपदार्थौ विशेषनित्यद्रव्ये चेति पञ्च सन्ति । तल्लक्षणञ्च नित्यत्वे सति सम्बन्धत्वमिति । अत्र विशेष्यमात्रोक्तौ संयोगादौ, विशेषणमात्रोक्तौ गगनादौ चातिव्याप्तिरित्युभयपदोपादानम् । अथवा अयुतसिद्धसम्बन्धत्वं समवायस्य लक्षणं विधीयते । यथोक्तं विश्वनाथेन–

**घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।**
**तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥** इति ।

तस्मादयुतसिद्धानां द्रव्यगुणकर्मसामान्यपदार्थानां सम्बन्धः समवायो निगद्यते । यः समवायेन विद्यते स समवेत इत्युच्यते । यस्मिन् समवायेन विद्यते स समवायी निगद्यते । समवायसिद्धावनुमानाकार इत्थं वर्तते– 'गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् 'दण्डी पुरुषः' इति विशिष्टबुद्धिवदिति । पृथक्सिद्धद्रव्ययोरेव संयोग इति नियमाद् अत्र संयोगबाधात् समवायसिद्धिर्भवति ।

## अभावचतुष्टयनिरूपणम्

**मूलम्– अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य । सादिरनन्तः प्रध्वंसः । उत्पत्यनन्तरं कार्यस्य । त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । यथा भूतले घटो नास्तीति । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः । यथा घटः पटो नेति ।**

**व्याख्या-** भावभिन्नपदार्थरूपेणाभावो ज्ञायते । तस्य लक्षणं तु प्रतियोगिज्ञानाधीनज्ञानविषयत्वं वर्तते । यस्य अभावः स प्रतियोगी भवति । यथा 'भूतले घटाभावोऽस्ति' इत्यत्र भूतले घटाभावः स्वरूपेण तिष्ठति । तत्र घटश्च घटाभावस्य प्रतियोगी भवति । अतोऽयमभावो 'घटो नास्ति' 'पटो नास्ति' इत्यादिनिषेधज्ञानस्य विषयो भवति । स चाभावो संसर्गाभावान्योन्याभावभेदेन द्विविधो दर्शितो वैशेषिकदर्शने । संसर्गाभावोऽपि त्रिविधः- प्रागभावः, प्रध्वंसाभावोऽत्यन्ताभावश्चेति तर्कभाषायां वर्णितमस्ति । आहत्य अभावाश्चत्वारो भवन्ति ।

१. प्रथमं प्रागभावस्य लक्षणमाह–'अनादिः सान्तः प्रागभावः' इति । कार्यस्य उत्पत्तेः प्राग् योऽभावो भवति स प्रागभावः । यथा कस्यचिद् घटस्य उत्पत्तेः पूर्वं तस्य घटस्याभावः प्रागभावः । तस्य च अभावस्य उत्पत्तिर्नास्ति किन्तु अन्तोऽस्ति । घटोत्पत्तिपूर्वम् 'इह कपाले घटो भविष्यति' इति या प्रतीतिर्जायते तया प्रतीत्या विषयीक्रियमाणोऽभावः प्रागभावो भवति । अयं प्रतियोगिनः जनको भवति । कस्यापि वस्तुन उत्पत्तेः प्रागयमभावः प्रतीतिविषयो भवति । अतोऽयं प्रागभावनाम्ना प्रसिद्ध्यति । स च कार्यमात्रं प्रति साधारणं कारणञ्च भवतीति नैयायिकाः सिद्धान्तयन्ति ।

२. क्रमप्राप्तं प्रध्वंसाभावस्य लक्षणं निरूपयन्नाह–"सादिः अनन्तः प्रध्वंसः" इति । कार्यविनाशानन्तरं तस्य कार्यस्य योऽभावस्तदधिकरणे प्रतीयते स ध्वंसाभावो निगद्यते । यथा मुद्गरप्रहारेण घटनाशानन्तरं तस्य घटस्य योऽभावो भवति स ध्वंसाभावः । अस्योत्पत्तिरस्ति परन्त्वन्तो नास्ति । अयमभावः 'घटो ध्वस्तः' इति प्रतीत्या विषयीभूतो भवति । अतः प्रतियोगिजन्योऽयमभावोऽस्ति ।

३. क्रमप्राप्तमत्यन्ताभावं निरूपयति ग्रन्थकारः–"त्रैकालिकसंसर्गावच्छिन्न-प्रतियोगिताकोऽत्यन्ताभावः" इत्युच्यते । योऽभावः त्रैकालिको संसर्गावच्छिन्न-प्रतियोगितानिरूपको भवति सोऽत्यन्ताभावः कथ्यते । अतोऽयमभावो नित्योऽस्ति । त्रिषु कालेष्वपि विद्यमानोऽभावः अत्यन्ताभाव एव । अपि च यस्मिन् कस्मिन्नपि स्थले भूतलादौ घटादेरवर्तमानत्ववेलायाम् 'इह भूतले घटो नास्ति' इत्याकारिका या प्रतीतिर्भवति । तया प्रतीत्या विषयीक्रियमाणो योऽभावः सोऽत्यन्ताभावनाम्ना व्यवह्रियते । यथा वालुकायां तैलाभावः । भूतकाले वर्तमानकाले भविष्यति च बालुकायां तैलस्य सम्बन्धो नास्ति । अतो भूतभविष्यद्वर्तमानत्रिकालसंसर्गावच्छिन्नतैलनिष्ठप्रतियोगितानिरूपकोऽभावः–वालुकायां तैलं नास्तीत्याकारकाभावः । सोऽत्यन्ताभावः ।

४. वस्तुनोः पारस्परिकभेदोऽन्योन्याभाव इति कथ्यते । अत आह–"तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभाव इति ।

तादात्म्यसम्बन्धेन पदार्थो नेत्युच्यते चेत् तस्य अभावस्य प्रतियोगिनि विद्यमाना प्रतियोगिता तादात्म्यसम्बन्धेनावच्छिन्ना भवति तत्प्रतियोगिताको योऽभावः सोऽन्योन्याभाव इत्युच्यते । यथा–घटः पटो न इत्युच्यते चेत् तत्र नञर्थो भेदः । तादृशभेदीया या प्रतियोगिता, तदवच्छेदकसम्बन्धस्तादात्म्यम् । तथा च प्रतियोगितावच्छेदकतादात्म्यसम्बन्धावच्छिन्ना या घटनिष्ठा प्रतियोगिता तन्निरूपकाभाव एव घटप्रतियोगिताकोऽन्योन्याभाव इति कथ्यते । अतोऽयमभावोऽन्योन्याभावनाम्ना व्यवह्रियते ।

## सप्तपदार्थवादस्थापनम्

**मूलम्– सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।**

**काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।**
**अन्नम्भट्टेन विदुषा रचितस्तर्कसङ्ग्रहः ॥**

**व्याख्या-** न्यायसूत्रे गौतमेन महर्षिणा प्रमाणम्, प्रमेयम्, संशयः, प्रयोजनम्, दृष्टान्तः, सिद्धान्तः, अवयवः, तर्कः, निर्णयः, वादः, जल्पः, वितण्डा, हेत्वाभासाः, छलम्, जातिः, निग्रहस्थानम् इत्येते षोडशपदार्था उक्ताः । कथं सप्तैव पदार्थाः ? इत्याशङ्कायां स्वग्रन्थस्य न्यूनतां परिहरति सर्वेषामिति पदेन ग्रन्थकारः । एष्वेव सप्तसु पदार्थेषु इतरेषां पदार्थानामन्तर्भावो भवति । तस्मान्नास्य ग्रन्थस्य न्यूनता वर्तत इति भावः । अन्तर्भावरीतिस्तु समग्रग्रन्थावलोकनात् तस्य (ग्रन्थस्य) अध्ययनाच्च समवगन्तुं शक्यते । केषां पदार्थानां क्वान्तर्भावो भवतीति ग्रन्थदर्शितरीत्या अवगन्तुं शक्यते । अतः सप्तैव पदार्था इत्येवकारपूर्वकं प्रोक्तं तर्कसङ्ग्रहकारेण । तेन पदार्थाः सप्तैव न ततो न्यूना न ततोऽधिका इति निष्कर्षोऽधिगम्यते । इत्थञ्च नैयायिकानां वैशेषिकाणाञ्च दार्शनिकानां मतेन सप्तपदार्थवादो निर्विवादं प्रतिष्ठापितो भवतीत्यभिप्रायेण सर्वेषां पदार्थानां निरूपणं विधाय तदुपसंहरन् “सप्तैव पदार्थाः” इत्युक्तवान् ग्रन्थकारः । अत्र बालानां काठिन्यं मत्त्वा सा रीतिर्न दर्शिता ग्रन्थकृता । परिचयमात्रं तु प्रकाशितमिति ग्रन्थकाराशयो वर्तते । प्रपञ्चे विद्यमानाः प्रतीतिविषया व्यवहारसिद्धाश्च सर्वेऽपि पदार्थाः पूर्वदर्शितेषु सप्तसु विभागेषु यस्मिन् कस्मिन् वा विभागेऽवश्यमन्तर्भवन्तीति पदार्थाः सप्तैवेति प्रतिज्ञातम् । अनया रीत्या सङ्क्षेपेण सप्त पदार्थाः प्रतिपादिताः । एतद्दिग्दर्शनमेवेति तात्पर्यम् ।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| संशयः | = | सन्देहः / एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानम् |
| तर्कः | = | अनिष्टप्रसङ्गः । |
| सुखम् | = | अनुकूलतया वेद्यम् । |
| दुःखम् | = | प्रतिकूलतया वेदनीयम् । |
| कर्म | = | चलनम् । |
| सामान्यम् | = | जातिः । |
| एकमात्रवृत्तिः | = | एकस्मिन् वस्तुनि एव स्थितः । |
| भेदकः | = | भेदजनकः । |
| अभावः | = | प्रतियोगिज्ञानाधीनज्ञानविषयः । |
| सावयवम् | = | अवयवसहितम् । |
| निर्विवादम् | = | विवादरहितम् । |
| न्यूनता | = | अल्पता । |

# अभ्यासः

## १. अतिसङ्क्षिप्तमुत्तरं दत्त

(क) विपर्ययपदस्यार्थः कः ?

(ख) सुखं किम् ?

(ग) अदृष्टं नाम किम् ?

(घ) संस्कारः कतिविधः ?

(ङ) आकुञ्चनं नाम किम् ?

(च) अयुतसिद्धपदस्य कोऽर्थः ?

(छ) समवायो नित्यो वा अनित्यः ?

(ज) प्रागभावस्य उदाहरणं किम् ?

## २. रिक्तस्थानं पूरयत

(क) स्मृतिः ... भेदेन द्विविधा ।

(ख) संस्कारः ... भेदेन त्रिविधः ।

(ग) ... सामान्यम् ।

(घ) नित्यद्रव्यवृत्तयः ... विशेषाः ।

(ङ) अनादिः ... प्रागभावः ।

(च) सादिः ... प्रध्वंसः ।

## ३. विवेचनात्मकमुत्तरं दत्त

(क) अयथार्थानुभवं विभज्य संशयं विवेचयत ।

(ख) भेदपुरस्सरं संस्कारं निरूपयत ।

(ग) सभेदं सामान्यस्य स्वरूपं प्रतिपादयत ।

(घ) विशेषस्य लक्षणं निर्दिशत ।

(ङ) समवायस्वरूपं ग्रन्थदिशा निरूपयत ।

## ४. व्याख्यात्मकमुत्तरं लिखत

(क) तर्कस्य स्वरूपं व्याख्यात ।

(ख) स्मृतेः स्वरूपं स्पष्टीकुरुत ।

(ग) द्वेषस्य स्वरूपं स्फुटीकुरुत ।

(घ) विशेषस्य लक्षणं प्रकाशयत ।

(ङ) सभेदं कर्मणः स्वरूपं वर्णयत ।

(च) भेदनिदर्शनपूर्वकमभावस्य लक्षणं स्फुटीकुरुत ।

## ५. कक्षाभ्यासो गृहाभ्यासश्च

(क) अयथार्थानुभवमादाय कक्षायां सखिभिः सह चर्चां कुरुत ।

(ख) तर्कविषये एकं लेखं विरचय्य गुरवे प्रदर्शयत ।

(ग) सभेदं सामान्यमादाय गुरुणा सतीर्थ्यैश्च सह संवादो विधेयः ।

(घ) समवायविषये कक्षायां मित्रैः सह प्रश्नोत्तरकार्यं विधेयम् ।

(च) विशेषस्य वैशिष्ट्यविषयकमेकमनुच्छेदं रचयत ।

(ज) कक्षायां भेदसहितस्याभावस्य विषये लक्षणोदाहरणपूर्वकः संवादो विधेयः ।

## ६. परियोजनाकार्यम्

अयथार्थानुभवस्य दश व्यावहारिकाण्युदाहरणान्यन्विष्य कक्षायां विमर्शं कुरुत ।

## ७. रचनात्मकोऽभ्यासः सर्जनात्मकोऽभ्यासश्च

(क) 'सुखदुःखयोर्गुणयोः स्वरूपम्' इति शीर्षके एको नातिविस्तृतो निबन्धो लेखनीयः ।

(ख) 'न्यायवैशेषिकशास्त्रोक्तसंस्काराख्यगुणस्य वैशिष्ट्यम्' इति शीर्षके अन्तर्जालादिमाध्यमेन अनुच्छेदत्रयं रचनीयम् ।